THE

CHOWKHAMBA SANSKRIT SERIES;

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NOS. 160 & 168.

विश्वप्रकाशः ।

नाम शब्दकोषः ।

विद्वद्वर श्रीमहेश्वरसूरिणाप्रणीतः ।

लङ्कायाम्

शैलबिम्बारामविहारे सरस्वतीमण्डपाधिपतिना

पूज्याचार्य्यश्रीशीलस्कन्धाभिधानेनस्थविरेण

प्रयत्नेन तथा श्रीमदाचार्य रत्नगोपालभट्टेन च संशोधितः

VIŜVAPRAKÂŜA

BY ŜRÎ MAHEŜVARA.

EDITED BY

Ŝri Ŝilaskandha Sthavira

of the "Ŝail bimbârâm" Vihâra Ceylon

and Pandita Ratna Gopâla Bhatta, Benares.

PUBLISHED AND SOLD BY THE SECRETARY.

CHOWKHAMBÂ SANSKRIT BOOK-DEPOT.

BENARES.

AGENTS:- OTTO HARRASSOWITZ LEIPZIG:

PANDITA JYESHTHARAMA MUKUNDAJI BOMBAY:

PROBSTHAIN & CO., BOOKSELLERS, LONDON.

Printed by Jai Krishna Dasa Gupta,

AT THE VIDYÂ VILÂSA PRESS

BENARES.

1911.

PREFACE

—:0:—

This Book which is Styled "Namanu Sasana" by its anthor is better known as "Visvaprâkasa". it was compiled in the year 1033 of the Saka Era by Sri Maheswara. His birth place, though within india is uncertain From the adoration to Buddha, with which he begins this work. it is certain that he was a Buddhist. He was an eminent physician, and was well versed in the various Sciences and languages than extant in India. He is said to have written the great poem "Sáhasánka," and the reader will find further information regarding him in the stanzas at the beginning of this work. 1105 A D.

It is the opinion of some Scholars that there have been nearly eighty Six 'kosas' or vocabularies of Sans krit words written by various authors; but we have seen only twenty two. In Compiling this volume our author has employed "Namapáráyana" as his guide, and his derived material aid from the following books:— "*Rajakosa,*" "*Bhógîndra*" "*Katyayana,*" "*Sahasanka,*" "*Vachaspati,*" "*Vyadi,*" "*Vis,varupa,*" "*Amalamangala,*" "*Subhanga*" "*Gopalita*" and *Bhagura,*"

It claims a greater antiquity than any of the Sanskrit vocabularies in use among the Students of the present day, such as "Amarakósa," "Trikánâda kosa" "medinîkósa" and "Hemchandrkósa,"

There is ample evideuce in "Medinikósa" that its venerable and renowned author has taken much valu-

able help from the " Visvaprakàsa " The constant reference to the " Visvaprakása " whilst supporting his arguments in his famous commentaries on *Sisupalbadha* " " *Raghuwamsa* " and " *Kumarasambhawa* " by the great *Mallinatha* will alone decide its value and place.

In them the references are indicated by the words " Hi visvah, " and this has given rise to doubt among certain people as to the identity of the reference. They believe that there existed two books called " Visvakosa " and " Visvaprakósa, " and that the former is now extinct. The greater number of scholars admit that both the names were applied to one and the Same book. The usefulness and the antiquariân value of this work will bo seen from the Contents of this book, and therefore, there is no doubt that its necesscity Could he felt to the careful reader.

Believing that my labours would be of benifit to the modern Samscrit student, I have, with considerable pains, edited the work to place it within the reach of all. Iam indebted to Sir Isána Tarkaratna for lending me an ancient Copy, and I must mention here that the Scarcity of books rendered my work more difficult.

I shall be obliged to those who shall point out any errors which they may find here. so as to enable me to Correct the same in my next edition.

C. A. Seelakkhandha.

" SAILABIM BÁRAMA "

DODANDUWA.

Ceylon.

(विश्वप्राकाशस्य)

(भूमिका)

अयंविश्वप्रकाशनामाकोशोविद्वद्वर श्रीमहेश्वरसुधीविरचितः च्छात्राणामतीवोपयुक्तः शब्दार्थव्युत्पत्तिकारकोविदुषामतीवप्रियो-नाद्यापि मुद्रितः, कस्यापि च भाग्यो दयेन श्रीविद्याविलासनाम्नि सीरीजचौखम्भाहरिदासीययन्त्रालयेहरिदासात्मजजयकृष्णदास-श्रेष्ठिनासर्वजनोपकारायमुद्रापयित्वाप्रकाशितः सर्वशक्तिमतासच्चि-दानन्दस्वरूपेणपरमेश्वरेणान्तर्यामिणा विश्वेषांपरमकरुणया नाना-विधसुधीवराः परोपकारपरायणाविरचिताविवर्त्तभूताः, स्वयंनिर्वि कारोपिसन्स्वमाययाअघटनघटनापटीयस्याद्वारानानाविधलीलांक-रोतिवस्तु तस्तु न करोति च, स्वेमहिम्निस्थितएव, निर्विशेषाद्विती-यः पूर्णसच्चिदानन्दघनो, भक्तानुग्रहायाऽजोपि सन् स्वमाययाजात-इवाविदुषां प्रतीयते, नवस्तुतो जातोऽतोऽजातो भवतीव, तथाचो-क्तंश्रुत्या,ननिरोधोनचोत्पत्तिर्नवद्धोन च साधकः। नमुमुक्षुर्नवैमुक्तइ-त्येषापरमार्थता इति, यस्यजन्मपाश्चात्यंतस्येदं तत्त्वं प्रकाशते, नवि-षयिणांमलिनान्तः करणानामीश्वरविमुखानान्तामसराजसगुणवता-मसुराणामनेकजन्मभाजांयथार्थं शास्त्रहृदयाऽनभिज्ञानांमिथ्याभूत-शास्त्राभासेषुमुह्य तामिति किमिववहुब्रूम इतिशम्।

सर्वमुमुक्षुहितैषी
प्रज्ञानानन्दसरस्वतीस्वामी
कैवल्यधाममठनिवासी
(ब्रह्माघाट)

सूचीपत्रम् ।

सूचीपत्रं समाप्तम् ।

—०*०—

श्रीः ।

विश्वप्रकाशः

विद्वद्वरश्रीमहेश्वरविरचितः ॥

नमः सम्यक्सम्बुद्धाय ॥

स्तुवीमहि महामोहक्लेशान्तकभिषग्वरम् ॥
त्रैधातुकनिदानज्ञं सर्वज्ञं दुःखहानये ॥ १ ॥

कलाविलासान्मकरन्दबिन्दु-
मुद्रां विनिद्रे हृदयारविन्दे ॥
या कल्पयन्ती रमते कवीनां
देवीं नमस्यामि सरस्वतीं ताम् ॥ २ ॥

कवीन्द्रकुमुदानन्दकन्दोद्गमसुधाकरम् ॥
वाचस्पतिमतिस्पर्द्धिशेमुषीचान्द्रिकोज्ज्वलम् ॥ ३ ॥
क्षुभ्यत्क्षीराब्धिकल्लोलमालोल्लासियशःश्रियम् ॥
गुरुं वन्दे जगद्वन्द्यं गुणरत्नैकरोहणम् ॥ ४ ॥
श्रीसाहसाङ्कनृपतेरनवद्यवैद्य-
विद्यातरङ्गपदमद्वयमेव बिभ्रत् ॥
यश्चन्द्रचारुचरितो हरिचन्द्रनामा
स्वव्याख्यया चरकतन्त्रमलञ्चकार ॥ ५ ॥
आसीदसीमवसुधाधिपवन्दनीये
तस्यान्वये सकलवैद्यकलावतंसः ॥
शक्रस्य दस्र इव गाधिपुराधिपस्य
श्रीकृष्ण इत्यमलकीर्त्तिलतावितानः ॥ ६ ॥

सङ्कल्पसम्भवदनल्पविकल्पजल्प-
कल्पानलाकुलितवादिसहस्रसिन्धुः ॥
तर्कत्रयात्रिनयनस्तनयो यदीयो
दामोदरः समभवद्भिषजां वरेण्यः ॥ ७ ॥
तस्याभवत् सूनरुदारवाचो
वाचस्पतिश्रीललनाविलासी ॥
सद्वैद्यविद्यानलिनीदिनेशः
श्रीमह्णः सत्कुमुदाकरेन्दुः ॥ ८ ॥
यद्भ्रातृजः सकलवैद्यकतत्त्वरत्न-
रत्नाकरश्रियमवाप्य च केशवोऽभूत् ॥
कीर्तेर्निकेतनमनिन्द्यपदप्रमाण-
वाक्यप्रपञ्चरचनाचतुराननश्रीः ॥ ९ ॥
कृष्णस्य चाऽजनि सुतः स्मितपुण्डरीक-
षण्डातपत्रपरभागयशःपरागः ॥
श्रीब्रह्म इत्यविकलात्ममुखारविन्द-
सोल्लासलासितरसार्द्रसरस्वतीकः ॥ १० ॥
तस्यात्मजः सरसकैरवकान्तकीर्तिः
श्रीमान्महेश्वर इति प्रथितः कवीन्द्रः ॥
निःशेषवाङ्मयमहार्णवपारदृश्वा
शब्दागमाम्बुरुहषण्डरविर्बभूव ॥ ११ ॥
यः साहसाङ्कचरितादिमहाप्रबन्ध-
निर्म्माणनैपुणगुणागतगौरवश्रीः ॥
यो वैद्यकत्रयसरोजसरोजबन्धु-
र्बन्धुः सतां सुकविकैरवकाननेन्दुः ॥ १२ ॥
इयं कृतिस्तस्य महेश्वरस्य

वैदग्ध्यसिन्धोः पुरुषोत्तमानाम् ॥
देदीप्यतां हृत्कमलेषु नित्य-
माकल्पमाकल्पितकौस्तुभश्रीः ॥ १३ ॥
लब्धैः कथञ्चिदभिजातसुवर्णकार-
लीलेन कोषवररत्नधिशब्दरत्नैः ॥
विश्वप्रकाश इति काञ्चनबन्धशोभां
बिभ्रन्मयाऽत्र घटितो मुखखण्ड एषः ॥ १४ ॥
क्षोणीश्वरोदीरितशब्दकोष-
रत्नाकरालोडनलालसानाम् ॥
सेव्यः कथं नैष सुवर्णशैलो
विश्वप्रकाशो विबुधाधिपानाम् ॥ १५ ॥
भोगीन्द्रकात्यायनसाहसाङ्क-
वाचस्पतिव्याडिपुरःसराणाम् ॥
सविश्वरूपामलमङ्गलानां
शुभाङ्गगोपालितभागुराणाम् ॥ १६ ॥
कोषावकाशात् प्रकटप्रभाव-
सम्भाविताऽनर्घ्यगुणः स एषः ॥
सम्पादयन्नेष्यति वाञ्छितार्थान्
कथं न चिन्तामणितां कवीनाम् ॥ १७ ॥
आ मित्रशैलचरमाचलमेकलाद्रि-
कैलासभूमिवलयाद्यदिहाऽस्ति किञ्चित् ॥
एकत्र सम्भृतमगोचरशब्दरत्न-
मालोक्यतां तदखिलं सुधियः कवीन्द्राः ॥ १८ ॥
यद्यस्ति वाङ्मयमहार्णवमन्थनेच्छा
प्राप्तुं पदं फणिपतेर्यदि कौतुकं वः ॥

विश्वप्रकाशमनिशं तदिमं निषेव्य
सम्भाव्यतां परमशाब्दिकशेखरश्रीः ॥ १९ ॥
सतां पुस्तकसम्भारभारमोक्षः कृतो मया ॥
नामानुशासनमिदं सम्पूर्णं तन्वताऽद्भुतम् ॥ २० ॥
एकाद्वित्रिचतुःपञ्चषड्वर्णानुक्रमोज्ज्वलैः ॥
कान्तादिवर्गैर्नानार्थसङ्ग्रहोऽयं वितन्यते ॥ २१ ॥
नानार्थः प्रथमान्तोऽत्र सर्वत्रादौ प्रदर्शितः ॥
सप्तम्यन्तेषु शब्देषु वर्तमानः सुनिश्चितः ॥ २२ ॥
दृष्टान्तेन सह क्वाऽपि सप्तम्याधार एव च ॥
स्पष्टाय लिङ्गभेदाय क्वाऽप्यत्र पुनरुक्तता ॥ २३ ॥

कैककम् ॥

को ब्रह्मात्मानिलार्केषु शमने सर्वनाम्नि च ॥
पावके च मयूरे च सुखशीर्षजलेषु कम् ॥ २४ ॥

कद्विकम् ॥

अकं पापे च दुःखे च शको राजन्यदेशयोः ॥
वकस्तु वकपुष्पे स्यात् कह्वे श्रीदे च रक्षसि ॥ २५ ॥
शुको व्याससुते कीरे रावणस्य च मन्त्रिणि ॥
ग्रन्थिपर्णे शिरीषे च शुकं स्याच्छोणके क्वचित् ॥ २६ ॥
द्विकः काके च कोके च सृको बाणानिलोत्पले ॥
अर्कोऽर्कपर्णे स्फटिके रवौ ताम्रे दिवस्पतौ ॥ २७ ॥
कर्कः कर्के राशिभेदे शुक्लाश्वे दर्पणे घटे ॥
तर्कः काङ्क्षावितर्कोहकर्मभेदेषु कीर्त्यते ॥ २८ ॥
श्लोको यशसि पद्ये च लोकस्तु भुवने जने ॥
स्तोकोऽल्पे चातके तोकमपत्यपुत्रयोरपि ॥ २९ ॥
कोकश्चक्रे वृके ज्येष्ठ्यां खर्जूरीद्रुमभेकयोः ॥

रोको दीप्तौ बिले रोकं नौकाक्रयणभेदयोः ॥ ३० ॥
बेको विदग्धे छेकश्च विश्वस्तमृगपक्षिणोः ॥
रेको विरेके शङ्कायां रेकः स्यादवमेऽपि च ॥ ३१ ॥
काकः स्याद्वायसे वृक्षप्रभेदे पीठसर्पिणि ॥
शिरोबक्षालिने मानविशेषद्वीपभेदयोः ॥ ३२ ॥
काका स्यात् काकनासायां काकोलीकाकजङ्घयोः ॥
रक्ते कायां मलप्वाञ्च काकमाच्याञ्च कीर्त्तिता ॥ ३३ ॥
काकं स्त्रीरतबन्धे स्यात् काकानामपि संहतौ ॥
पाकः शिशौ जरानिष्ठापचनक्लेदनेषु च ॥ ३४ ॥
शाको द्वीपान्तरे शक्तौ नृपद्रुमविशेषयोः ॥
शाकं हरितके चापि नाकः स्वर्गान्तरिक्षयोः ॥ ३५ ॥
मूकोऽप्यवाङ्मतौ दीने शूकोऽनुक्रोशशृङ्गयोः ॥
भूकश्छिद्रे च काले च भेको मण्डूकमेघयोः ॥ ३६ ॥
एकन्तु केवलं श्रेष्ठ इतरस्मिंश्च वाच्यवत् ॥
शौकं शुकसमूहे च स्त्रीणाञ्च करणान्तरे ॥ ३७ ॥
अङ्कः स्थानेऽन्तिके मन्तौ रूपकोत्सङ्गलक्ष्मसु ॥
नाटिकादिपरिच्छेदे चित्रयुद्धे च भूषणे ॥ ३८ ॥
कङ्कश्छद्मद्विजे ख्यातो लोहपृष्ठकृतान्तयोः ॥
वङ्कः पर्य्याणभागे स्यान्नदीपात्रे च भङ्गुरे ॥ ३९ ॥
टङ्कः कपित्थभेदे स्यान्मानान्तरखनित्रयोः ॥
कोपेऽसिकोशे जङ्घायां टङ्कणे ग्रावदारणे ॥ ४० ॥
रङ्कस्तु कृपणे मल्ले पङ्कः कर्दमपापयोः ॥
न्यङ्कुर्मृगे ऋषौ नाकुर्वामलूरे गिरौ मुनौ ॥ ४१ ॥
शङ्कुः कीले शिवेऽस्त्रे च संख्यायादप्रभेदयोः ॥
कल्कः पापाशये पापे दम्भे विट्किट्टयोरपि ॥ ४२ ॥

वल्कन्तु वल्कले खण्डे शल्कं शकलवल्कयोः ॥
शुल्कं घट्टादिदेये स्याज्जामातुर्बन्धकेऽपि च ॥ ४३ ॥
निष्कमष्टाधिकस्वर्णशते दीनारकर्षयोः ॥
वक्षोऽलङ्करणे हेमपात्रे हेमपलेऽपि च ॥ ४४ ॥
मुष्कोऽण्डकोशे सङ्घाते मुष्को मोक्षे च पादपे ॥
किष्कुर्वितस्तौ हस्ते च प्रकोष्ठे कुत्सितेऽपि च ॥ ४५ ॥
त्रिकाकूपस्य नेमौ स्यात् त्रिकं पृष्ठाधरे त्रये ॥
लङ्का रक्षःपुरीशाखाशाकिनीकुलटासु च ॥ ४६ ॥
शङ्का त्रासे वितर्के च राका तु सरिदन्तरे ॥
कच्छूनवरजकन्यापूर्णेन्दुपूर्णिमासु च ॥ ४७ ॥

कत्रिकम् ॥

कनकं चम्पके स्वर्णे किंशुके नागकेशरे ॥
धुत्तूरे काञ्चनारे च कालीयेऽपि क्वचिन्मतम् ॥ ४८ ॥
करकस्तु करङ्के स्याद्दाडिमे च कमण्डलौ ॥
पक्षिभेदे करे चापि करका च घनोपले ॥ ४९ ॥
नरको निरये दैत्ये सरकः सीधुभाजने ॥
अच्छिन्नाध्वगपङ्क्तौ च सीधुपाने च सीधुनि ॥ ५० ॥
खनकश्चित्ततत्त्वज्ञे सन्धिचौरे च मूषिके ॥
जनकः पितृराजर्ष्योर्युतकं संशये युगे ॥ ५१ ॥
यौतके चलनाग्रे च स्त्रीवस्त्राञ्चलयुक्तयोः ॥
कृषकः कर्षके फाले रजको धावके शुके ॥ ५२ ॥
मधुको वन्दिभेदे स्याज्ज्येष्ठ्याह्वे विहगान्तरे ॥
मधुकं मधुपर्ण्यां स्यादनुको निपुणाल्पयोः ॥ ५३ ॥
वसुकः शिवमल्ल्यां स्यादर्कपर्णे च रोमके ॥
शिशुकः शिशुमारे स्याद्बालकोलूपिनोरपि ॥ ५४ ॥

क्रमुकः पट्टिकालोध्रे भद्रे मुस्तकपूगयोः ॥
फले कार्पासिकायाश्च क्रमुको ब्रह्मदारुणि ॥ ५५ ॥
बहुकः कर्कटेऽर्के च दात्यूहे जलखातके ॥
धनिकः साधुधन्याकधवेषु धनिका स्त्रियाम् ॥ ५६ ॥
प्रियकः पीतशाले स्यान्नीपे चित्रमृगेऽलिनि ॥
कुङ्कुमे च प्रियङ्गौ च पृथुकश्चिपिटे शिशौ ॥ ५७ ॥
यमकं यमजे शब्दालङ्कारे संयमेऽपि च ॥
मशकः कथ्यते क्षुद्ररोगजन्तुविशेषयोः ॥ ५८ ॥
कुलकन्तु पटोले स्याच्छ्लोकसम्बन्धगुच्छके ॥
कुलकः स्यात् कुलश्रेष्ठे वल्मीके काकतिन्दुके ॥ ५९ ॥
तिलकं चित्रके प्राहुर्ललामे तिलकालके ॥
रोगाविद्रुमभेदेषु लोम्नि सौवर्चलेऽपि च ॥ ६० ॥
कुलिको नागभेदे स्याद् द्रुभेदे कुलसत्तमे ॥
कुशिकः स्यान्मुनौ तैलशेषे सर्ज्जाक्षवृक्षयोः ॥ ६१ ॥
चषकन्तु सुरापात्रे मधुमद्यप्रभेदयोः ॥
चटकः कलविङ्के स्याच्चटका तत्स्त्र्यपत्ययोः ॥ ६२ ॥
कटकं वलये सानौ राजधानीनितम्बयोः ॥
सामुद्रलवणे दन्तमण्डले दन्तिनामपि ॥ ६३ ॥
कटुका कटुरोहिण्यां व्योषेऽपि कटुकं स्मृतम् ॥
चुलुकः प्रसृतौ भाण्डभेदे चुलुकवन्मतः ॥ ६४ ॥
पुलकः कृमिभेदे स्याद्गुच्छार्कमणिदोषयोः ॥
गजान्नपिण्डे रोमाञ्चे हरिताले शिलान्तरे ॥ ६५ ॥
रुचकं मङ्गलद्रव्ये ग्रीवाभरणदन्तयोः ॥
उत्कटे बीजपूरे च सौवर्चलविडङ्गयोः ॥ ६६ ॥
रोचनायाञ्च रुचकमश्वाभरणमाल्ययोः ॥

क्षुरकः कोकिलाक्षे स्याद्गोक्षुरे तिलकद्रुमे ॥ ६७ ॥
कामुकः कमनेऽशोकपादपे चातिमुक्तके ॥
पातुकः पातयालौ स्यात् प्रपातजलहस्तिनोः ॥ ६८ ॥
आनकः पटहे भेर्य्यां मृदङ्गे स्वनदम्बुदे ॥
आढ़कं मानभेदे स्यात् तुवर्य्यामाढ़की मता ॥ ६९ ॥
कारकः कर्त्तरि प्रोक्तः कर्म्मादावपि कारकम् ॥
चारकः पालकेऽश्वादेः स्यात् सञ्चारकबन्धयोः ॥ ७० ॥
तारकः कर्णधारे स्याद्दैत्ये च दृशि तारकम् ॥
कनीनिकायां नक्षत्रे तारकं तारकेति च ॥ ७१ ॥
वारकोऽश्वगतावश्वविशेषे च निषेधके ॥
जाहको घोङ्घमार्ज्जारखट्वाकारुण्डिकासु च ॥ ७२ ॥
पावकोऽग्नौ सदाचारे वह्निमन्थे च चित्रके ॥
भल्लातके विडङ्गे च सायकः शरखड्गयोः ॥ ७३ ॥
नायको नेतरि श्रेष्ठे हारमध्यमणावपि ॥
प्राणकः सत्त्वजातीये जीवकद्रुमवेलयोः ॥ ७४ ॥
जालकं कोरके प्रोक्तं कुलाये जालिनीफले ॥
आनाये दम्भभेदे च वस्त्रभेदे च जालिका ॥ ७५ ॥
बालकोऽर्भे शिशौ केशे वाजिवारणबालधौ ॥
अङ्गुलीयकह्रीवेरपारिहार्य्येषु वालकम् ॥ ७६ ॥
वार्द्धकं वृद्धसङ्घाते वृद्धत्वे वृद्धकर्म्मणि ॥
मामकं ममतायुक्ते मातुले मामकः स्मृतः ॥ ७७ ॥
याजको याजिनि ख्यातो याजको राजकुञ्जरे ॥
ग्राहको घातविहगे व्यालानाञ्च ग्रहीतरि ॥ ७८ ॥
दारको भेदकेऽपत्ये रात्रकं पञ्चरात्रके ॥
येन वेश्यागृहे नीतो वत्सरस्तत्र रात्रकः ॥ ७९ ॥

लासकोऽलसके लास्यकारिण्यपि मयूरके ॥
शार्कक: शर्करापिण्डे दुग्धफेने च शार्ककः ॥ ८० ॥
हारकः कितवे चौरे गद्यविज्ञानभेदयोः ॥
स्थासकाख्या च चार्च्चिक्ये जलादेरपि बुद्बुदे ॥ ८१ ॥
द्रावकस्तु शिलाभेदे विदग्धे मोषकेऽपि च ॥
भ्रामको जम्बुके धूर्ते सूर्यावर्ताश्मभेदयोः ॥ ८२ ॥
पिण्याकः सिह्लके हिङ्गौ तिलचूर्णेऽपि कुङ्कुमे ॥
पिनाको हरकोदण्डे पांशुवर्षत्रिशूलयोः ॥ ८३ ॥
कात्त्रकः कृकवाकौ स्यापीतमुस्तककोकयोः ॥
क्षारकः पक्षिमत्स्यादिपिटके जालकेऽपि च ॥ ८४ ॥
पाटकः स्यान्महाकिष्कौ कटकान्तरवाद्ययोः ॥
अक्षादिचालने मूलद्रव्योपचयवेधसोः ॥ ८५ ॥ *
वराकः सङ्गरे शोच्ये पराको व्रतखङ्गयोः ॥
पुलाकस्तुच्छधान्ये स्यात् सङ्क्षेपे भक्तसिक्थके ॥ ८६ ॥
विपाकः कीर्त्यते स्वादौ परिणामे च दुर्गतौ ॥
विपाकः पचने स्वेदेऽप्यसत्कर्म्मफलेऽपि च ॥ ८७ ॥
लम्पाको लम्पटे देशे शिम्फाकः शफमूर्खयोः ॥
सम्पाकस्तार्किके धृष्टे सम्पाकश्चतुरङ्गुले ॥ ८८ ॥
मोचकः कदलीशिग्रुनिर्म्मोचकविरागिषु ॥
पेचको गजलाङ्गूलमूलपर्य्यन्तघूकयोः ॥ ८९ ॥
मेचको बर्हिचन्द्रे स्यान्मेचकः श्यामलेऽपि च ॥
तिमिरे कृष्णवर्णे तु मेचकं वाच्यवद्भवेत् ॥ ९० ॥
सूचकः सीवनद्रव्ये बोधके वृषदंशके ॥
पिशुने शुनि काके च केचकः सेक्तृमेघयोः ॥ ९१ ॥

---

* अत्रादर्शे एकाङ्कस्यानिर्देशात् त्रुटिः संभाव्यते ।

लोचको मांसपिण्डेस्यादक्षिण तारे च कज्जुले ॥
ललाटाभरणे स्त्रीणां कदलीनीलवस्त्रयोः ॥ ९२ ॥
निर्बुद्धौ कर्णपूरे च मौर्व्यां भूश्लथचर्म्मणि ॥
मोदको हर्षके ज्ञेयः खाद्यभेदे च मोदकम् ॥ ९३ ॥
खोलकः पाकवल्मीकपूगकोषशिरस्त्रके ॥
गोलको विधवापुत्रे जाराच्च मणिके गुडे ॥ ९४ ॥
कूपको गुणवृक्षे स्यात्तैलपात्रे कुकुन्दरे ॥
उदपाने चितायाश्च कूपिकाऽम्भोगतोपले ॥ ९५ ॥
कूलकः क्रमिशैले च प्रतीरस्तूपयोरपि ॥
रूपकं नाटके धूर्ते काव्यालङ्करणे विदुः ॥ ९६ ॥
चूतकः कूपकेऽप्याम्रे सूतकं रसजन्मनोः ॥
लूनकः स्यात् पशौ भिन्ने शूचकः प्रावटे रसे ॥ ९७ ॥
कीचको दैत्यभेदे स्याच्छुष्कवंशे द्रुमान्तरे ॥
कीटकः क्रमिभेदे स्यान्निष्ठुरे कीटकोऽन्यवत् ॥ ९८ ॥
जीवकः पीतशाले स्यात् क्षपणे वृद्धजीविनि ॥
सेविनि प्राणकेऽप्याहितुण्डिके पादपान्तरे ॥ ९९ ॥
आजीवे जीविकामाहुर्जीवन्त्यामपि कुत्रचित् ॥
दीपकं वागलङ्कारे दीपको दीप्तिकारके ॥ १०० ॥
चीरको धिक्क्रियालेखे पतङ्ग्यां चीरिका मता ॥
सेवकस्तु प्रसेवे स्यादनुजीविनि चान्यवत् ॥ १०१ ॥
अशोको वञ्जुले माने द्रुमानिःशोकयोर्मतः ॥
अशोका कटुरोहिण्यामशोकं पादपे स्मृतम् ॥ १०२ ॥
आलोको दर्शने द्योते आलोको वन्दिभाषणे ॥
पेटकं पुस्तकादीनां मञ्जूषाणां कदम्बके ॥ १०३ ॥
हेरको बुद्धभेदे स्यान्महाकालगणेऽपि च ॥

धेनुकं करणे स्त्रीणां धेनूनामपि संहतौ ॥ १०४ ॥
विवेकः स्याज्जलद्रोण्यां विचारेऽपि रहस्यपि ॥
गैरिकं कनके धातौ प्रसेकः सेचने च्युतौ ॥ १०५ ॥
वैजिके शिग्रुतैले च हेतौ सद्योऽङ्कुरेऽपि च ।
कोरकं कुड्मले विद्यात् कक्कोलकमृणालयोः ॥ १०६ ॥
कौतुकश्चाभिलाषे स्यादुत्सवे नर्म्महर्षयोः ॥
परम्परासमायातमङ्गले च कुतूहले ॥ १०७ ॥
विवरे सूत्रगीतादिभोगकालेषु च स्मृतम् ॥
कौशिको नकुले व्यालग्राहे गुग्गुलुशक्रयोः ॥ १०८ ॥
विश्वामित्रे च कोशाग्न्योलूकयोरपि कौशिकः ॥
कौशिकी चण्डिकायाश्च नदीभेदे च कौशिकी ॥ १०९ ॥
प्रतीकोऽवयवे प्रोक्तः प्रतिकूलविलोमयोः ॥
भूतीकमपि भूनिम्बदीप्यकर्पूरकत्तृणे ॥ ११० ॥
अभीकः कामुके क्रूरे कवौ च भयवर्जिते ॥
वल्मीको वामलूरे स्यान्मुनिरोगविशेषयोः ॥ १११ ॥
अनीकन्तु प्रिये प्रोक्तं व्यलीको नागरे स्मृतः ॥
व्यलीकमप्रियाकार्य्ये वैलक्ष्येष्वपि पीडने ॥ ११२ ॥
नालीकं शरखण्डेऽब्जे नालीकः शरशल्ययोः ॥
अलीकमप्रिये प्रोक्तमलीकमनृतेऽपि च ॥ ११३ ॥
अनूकन्तु कुले शीलेऽप्यनूको गतजन्मनि ॥
उलूकः कुरविन्दे स्यात् पेचके जम्भभेदिनि ॥ ११४ ॥
शम्बूको गजकुम्भान्ते दैत्यभेदे च घोङ्के ॥
बन्धूको बन्धुजीवे स्याद् बन्धूकः पीतशालके ॥ ११५ ॥
मण्डूकं बन्धुभेदेऽपि दर्दुरे शोणके विदुः ॥
मण्डूकपर्ण्यां मण्डूकी वर्णकश्चारणे स्मृतः ॥ ११६ ॥

विलेपने चन्दने च वर्णकं स्यादथार्भकः ॥
डिम्भे मूर्खे कृशे भ्रूणे वर्तकोऽश्वखुरे खगे ॥ ११७ ॥
पुष्पकं प्रीतिकानेत्ररोगयो रत्नकङ्कणे ॥
कुबेरस्य विमाने च काशीशे च रसाञ्जने ॥ ११८ ॥
लोहे कांस्ये मृदङ्गारशकट्यामपि पुष्पकम् ॥
पूर्णकः स्वर्णचूडे स्यान्नासाच्छिन्न्यान्तु पूर्णिका ॥११९॥
दर्शकः स्यात् प्रतीहारे दर्शयितृप्रवीणयोः ॥
पद्मकं पद्मकाष्ठेभबिन्दुजालकयोरपि ॥ १२० ॥
दीप्यकश्चाजमोदे स्याद्यवानीबर्हिचूडयोः ॥
सस्यकः स्यान्मणौ खड्गे नारिकेलस्य चान्तरे ॥ १२१ ॥
रक्तको म्लानबन्धूकरक्तवस्त्रानुरागिषु ॥
चित्रकः स्यात्तरुव्याघ्रभेदयोर्भेषजान्तरे ॥ १२२ ॥
वृश्चिकस्तु द्रुणे राशौ शूककीटे तथौषधे ॥
अंशुकं सूक्ष्मवस्त्रे स्याद्वस्त्रमात्रोत्तरीययोः ॥ १२३ ॥
अन्तिकं निकटे चुल्ल्यामन्तिका शीतलौषधे ॥
तथा ज्येष्ठभगिन्याश्च नाट्योक्तौ कीर्त्यतेऽन्तिका ॥ १२४ ॥
स्वस्तिको मङ्गलद्रव्ये चतुष्कगृहभेदयोः ॥
पिष्टकस्य विकारे च स्वस्तिको रजतालिके ॥ १२५ ॥
कञ्चुको वारबाणे स्यान्निर्म्मोके कवचेऽपि ॥
वर्द्धापकगृहीताङ्गास्थितवस्त्रे च चोलके ॥ १२६ ॥
औषधौ कञ्चुकी चाथ वञ्चकः खलधूर्त्तयोः ॥
जम्बूके गृहबभ्रौ च गुह्यकश्छेकनिघ्नयोः ॥ १२७ ॥
बन्धकः स्याद्विनिमये पुँश्चल्यां स्याच्च बन्धकी ॥
गान्धिकं लेखके प्राहुः सुगन्धिव्यवहारिणि ॥ १२८ ॥
ग्रन्थिकं पिप्पलीमूले ग्रन्थिकं गुग्गुलुद्रुमे ॥

माद्रेये च करीरे च दैवज्ञे च प्रकीर्त्तितम् ॥ १२९ ॥
वाह्लिको देशभेदेऽश्वे वाह्लिकं धीरहिङ्गुनोः ॥
अनयोरपि वाह्लीको याज्ञिको याजके कुशे ॥ १३० ॥
वार्षिकं त्रायमाणे स्याद्वर्षाकालभवेऽन्यवत् ॥
खङ्गिको महिषीक्षीरे फेनसौनिकयोरपि ॥ १३१ ॥
आह्निकं दिननिर्वर्त्ये भोजने नित्यकर्मणि ॥
गुण्डको मलिने धूलौ कलोक्तिस्नेहपात्रयोः ॥ १३२ ॥
गण्डकः खड्गिनि ख्यातः सङ्ख्याविद्याप्रभेदयोः ॥
अवच्छेदेऽन्तराये च गण्डकी सरिदन्तरे ॥ १३३ ॥
तण्डकः खञ्जने फेने समासप्रायवाचि च ॥
गृहदारौ तरुस्कन्धमायाबहुलयोरपि ॥ १३४ ॥
कण्टकः क्षुद्रशत्रौ च कर्म्मस्थानकदोषयोः ॥
रोमाञ्चे च द्रुमाङ्गे च कण्टको मकरेऽपि च ॥ १३५ ॥
तक्षकः फणिभेदे च वर्द्धकिद्रुमभेदयोः ॥
पक्षकः पार्श्वमात्रे च पक्षद्वारे च पक्षकः ॥ १३६ ॥
शङ्खकं वलये कम्बौ शिरोरोगे च शङ्खकः ॥
नन्दको हरिखड्गे स्याद्धर्षके कुलपालके ॥ १३७ ॥
शीतकः शीतकाले च सुस्थिते दीर्घसूत्रिणि ॥
उष्णकस्तु निदाघे स्यादातुरे क्षिप्रकारिणि ॥ १३८ ॥
दुच्छको गन्धकुट्यां स्याद्विहाराभ्यवकाशयोः ॥
दुन्दुकः शोणके क्रूरे क्षुल्लकः स्वल्पनीचयोः ॥ १३९ ॥
पिष्टको नेत्ररोगे स्याद्धान्यादिचमसेऽपि च ॥
भस्मकं रोगभेदे स्याद्विडङ्गकलधौतयोः ॥ १४० ॥
तुम्बकः स्याद् बहुगुरुधूर्त्तायस्कान्तकामुके ॥
जम्बुकः श्वापदे नीचे प्रतीचीदिक्पतावपि ॥ १४१ ॥

कार्म्मुकं वंशधनुषोः कर्म्मशक्ते तु वाच्यवत् ॥
निर्म्मोको मोक्षके व्योम्नि सन्नाहे सर्पकञ्चुके ॥ १४२ ॥
रुडुक्को वाद्यभेदे स्याद्दात्यूहे मदमत्तके ॥
तुरुष्कः सिह्लके म्लेच्छजातौ श्रीवासके क्वचित् ॥ १४३ ॥
इक्ष्वाकुः कटुतुम्ब्याञ्च सूर्य्यवंशनृपेऽपि च ॥
कुण्ठाकुश्च दुराधर्षे दुःशीले च बिलेशये ॥ १४४ ॥
कुषाकुर्मर्कटे भानौ परोत्तापिनि पावके ॥
पृदाकुर्वृश्चिके व्याघ्रे चित्रके च सरीसृपे ॥ १४५ ॥
सृदाकुरनिले वज्रे दावाग्नौ प्रतिसूर्य्यके ॥
गोरङ्कुः पक्षिजातौ च भवेन्नग्नकवन्दिनोः ॥ १४६ ॥
त्रिशङ्कुः शलभे राजविशेषे वृषदंशके ॥
पल्यङ्को मञ्चपर्य्यङ्कवृषीपर्य्यस्तिकासु च ॥ १४७ ॥
करङ्को मस्तके शस्यनारिकेलफलास्थिनि ॥
कलङ्कोऽङ्केऽपवादे च कालायसमलेऽपि च ॥ १४८ ॥
भालाङ्कः करपत्रे स्याच्छाकभेदे च रोहिते ॥
महालक्षणसम्पन्नपुरुषे कच्छपे हरे ॥ १४९ ॥
वृषाङ्कः शङ्करे साधौ भल्लातकमहोक्षयोः ॥
मृगाङ्को मारुते चन्द्रे स्तवकः शुभ्रगुच्छयोः ॥ १५० ॥
आतङ्को रोगसन्तापशङ्कासु मुरजध्वनौ ॥
पालङ्कः शल्लकीशाकभेदयोः प्राजिपक्षिणि ॥ १५१ ॥
अलर्को धवलार्के स्याद्योगोन्मादिनि कुक्कुरे ॥
उदर्क एष्यत्कालीये फले मदनकण्टके ॥ १५२ ॥
सम्पर्कः सरते पृक्तौ वितर्कः संशयोहयोः ॥
अम्बिका पार्वतीपाण्डुजनन्योरपि मातरि ॥ १५३ ॥
अन्धिका कैतवे मिश्रे सर्षप्यामपि कीर्त्यते ॥

अम्लिका तिन्त्रिडीकाम्लोद्गारचाङ्गेरिकासु च ॥ १५४ ॥
यूथिकाऽम्लानके पुष्पविशेषेऽपि च यूथिका ॥
राजिकापि च केदारे राजसर्षपरेखयोः ॥ १५५ ॥
रसिकापि रसालायां काञ्चीरसनयोरपि ॥
रुण्डिका द्वारपिण्ड्याञ्च दूतिकायां रणक्षितौ ॥ १५६ ॥
भूमिका रचनायां स्यान्मूर्त्यन्तरपरिग्रहे ॥
कर्णिका करिहस्ताग्रे करमध्याङ्गुलावपि ॥ १५७ ॥
क्रमुकादिच्छटांशे च कर्णिका कर्णभूषणे ॥
बीजकोशे सरोजस्य कुट्टन्यामपि कुत्रचित् ॥ १५८ ॥
कार्णिका कथ्यतेऽत्यन्तं सूक्ष्मवस्त्वग्निमन्थयोः ॥
गणिका यूथिकावेश्यातर्कारीकरिणीषु च ॥ १५९ ॥
गणकोऽपि च दैवज्ञे कारिकानटयोषिति ॥
कृतौ विवरणश्लोके यातनायाञ्च कारिका ॥ १६० ॥
नापितादिकशिल्पेऽपि जालिका जालिनीफले ॥
भटानामश्मरचिताङ्गरक्षिण्याञ्च जालिका ॥ १६१ ॥
गिरिसारे जलौकायामपि स्याद्विधवास्त्रियाम् ॥
जालिकः पुनरुद्दिष्टो ग्रामकूटे च धीवरे ॥ १६२ ॥
नीलिका नीलिनीक्षुद्ररोगशेफालिकास्वपि ॥
कालिका योगिनीभेदे कार्ष्ण्ये गौर्य्यां घनावलौ ॥ १६३ ॥
क्रमदेये वस्तुमूल्ये भूसरीनवमेघयोः ॥
पटोलशाखारोमालीमांसीकाकीषु कालिका ॥ १६४ ॥
तथा वृश्चिकपत्रेऽपि मालिका सरिदन्तरे ॥
ग्रैवेये पुष्पमालायां पक्षिमल्ले च मालिका ॥ १६५ ॥
बालिका वालुकाबालापिच्छोलाकर्णभूषणे ॥
तूलिका कथिता लेख्यकूर्चिकातूलशय्ययोः ॥ १६६ ॥

चूलिका नाटकस्याऽङ्के कर्णमूले च दन्तिनाम् ॥
मल्लिका तृणशून्येऽपि मीनमृत्पात्रभेदयोः ॥ १६७ ॥
मल्लिको हंसभेदे स्याज्झिल्लिका झिलिकापि च ॥
विलेपने मले झिल्ल्यामातपस्य रुचि स्मृता ॥ १६८ ॥
वालुका सिकतासु स्याद्वालुकन्त्वैलवालुके ॥
नग्निका तु कुमार्य्यां स्यादथ क्षपणवन्दिनोः ॥ १६९ ॥
नग्नको धेनुकाधेनौ स्त्रीकरेण्वोः प्रसूतयोः ॥
रेणुकापि हरेणौ स्याज्जामदग्निस्त्रियामपि ॥ १७० ॥
जतुका जिनपत्रायां जतुकं हिङ्गुलाक्षयोः ॥
कूर्चिका सूचिकायाञ्च तूलिकायाञ्च कुड्मले ॥ १७१ ॥
कवाटकुट्टके क्षीरविकृतावपि कूर्चिका ॥
मातृका धात्रिकामात्रोर्मात्रिकं करणेऽम्बरे ॥ १७२ ॥
पताका वैजयन्त्याञ्च सौभाग्येऽङ्के ध्वजेऽपि च ॥
स्यात् पुत्रिका पुत्तलिका दुहित्रोर्यावतूलिके ॥ १७३ ॥
पुत्रकः शरभे धूर्त्ते शैलवृक्षप्रभेदयोः ॥
उष्ट्रिका मृत्तिकाभाण्डभेदेऽपि करभस्त्रियाम् ॥ १७४ ॥
डिम्बिका जलनिम्बे स्यान्मोणके कामुकस्त्रियाम् ॥
कामिका नीलिकायाञ्च स्यमीको नाकुवृक्षयोः ॥ १७५ ॥
दूषिका तूलिकायाञ्च दूषिका नेत्रयोर्मले ॥
ऊर्म्मिका चाङ्गुलीये स्याद्वस्त्रभङ्गतरङ्गयोः ॥ १७६ ॥
तथोद्बाहुलकेऽपि स्यादूर्म्मिका मधुपध्वनौ ॥
स्याच्छलाकापि मदनशारिकाशल्ययोः शला ॥ १७७ ॥
छत्रपञ्जरकाष्ठयाञ्च शल्लकी पशुवृक्षयोः ॥
नर्त्तकीलासिकायाञ्च करेण्वामपि नर्त्तकी ॥ १७८ ॥
नर्त्तकः केलके [illegible]रणयो र्नटे ॥

चुलुकी शिशुमारेऽपि कुण्डीभेदे कुलान्तके ॥ १८० ॥
चतुष्की मशके हर्म्यां चतुष्की यष्टिकान्तरे ॥

कचतुष्कम् ॥

अलिमकः पिके भेके मधुके पद्मकेशरे ॥ १८१ ॥
भवेदलिपको भृङ्गे कोकिले रथहिण्डके ॥
स्मृतः कुरवकः शोणाम्लानाझिण्टीप्रभेदयोः ॥ १८२ ॥
भवेन्मरुवकः पुष्पविशेषे मदनद्रुमे ॥
वलाहको गिरौ मेघे दैत्यनागविशेषयोः ॥ १८३ ॥
भ्रमरको जले भृङ्गे गिरिजे चूर्णकुन्तले ॥
वराटकः स्थूलरज्जौ पद्मबीजे कपर्दके ॥ १८४ ॥
शृङ्गाटकं भवेद्वारिकण्टके च चतुष्पथे ॥
गोकण्टको गोक्षुरके स्थपुटे च गवां खुरे ॥ १८५ ॥
आकल्पकस्तमोमोहग्रन्थीषूत्कलिकामुदोः ॥
आक्षेपकोऽनिलव्याधौ व्याधे निन्दाकरेऽपि च ॥ १८६ ॥
प्रचलाकः शराघाते दन्दशूके भुजङ्गमे ॥
वृन्दारकः सुरे श्रेष्ठे मनोज्ञे पुनरन्यवत् ॥ १८७ ॥
नियामकः कर्णधारे पोतवाहे नियन्तरि ॥
विनायकस्तु हेरम्बे तार्क्ष्ये विघ्ने जिने गुरौ ॥ १८८ ॥
निश्वारकः पुरीषस्य क्षये स्वैरे समीरणे ॥
भट्टारकः सुरे राज्ञि कथितश्च तपोधने ॥ १८९ ॥
दासेरकः स्यात् करभे दासीपुत्रे च धीवरे ॥
अङ्गारकं कुजे विद्यादुल्मुकांशे कुरुण्टके ॥ १९० ॥
अङ्गारिकेक्षुकाण्डे स्यात् कोरके किंशुकस्य च ॥
दलाढकस्तु कुन्दे स्यात् करिकर्णशिरीषयोः ॥ १९१ ॥
स्वयञ्जाततिले फेने खातके नागकेशरे ॥

वात्यायां प्रश्निकायाञ्च गैरिके च महत्तरे ॥ १९२ ॥
भवेत् पूर्णानकं पूर्णपात्रे पटहपात्रयोः ॥
प्रकीर्णकं ग्रन्थभेदे चामरे विस्तरे हये ॥ १९३ ॥
स्मृतः पुष्कलको गन्धमृगे क्षपणकीलयोः ॥
कोशातकः कचे ज्यौत्स्निपटोलीघोषकेषु तु ॥ १९४ ॥
कोशातकी वाणिजके वाडवाग्नौ वणिज्यपि ॥
निर्ग्रन्थकः स्यात् क्षपणे निष्फलेऽप्यपरिच्छदे ॥ १९५ ॥
स्यादश्मन्तकमुद्धाने मालुकाच्छदनेऽपि च ॥
कटिल्लकस्तु पर्णासे वर्षाभूकारवेल्लयोः ॥ १९६ ॥
कपर्दको वराटे स्याज्जटाजूटेऽपि धूर्ज्जटेः ॥
गोमेदकं पीतमणौ काकोले पत्रकेऽपि च ॥ १९७ ॥
मण्डोदकश्चित्रराग भवेदातर्पणेऽपि च ॥
शतानीको मुनेर्भेदे वृद्धे चातखरालिकः ॥ १९८ ॥
ग्रामणीर्भाण्डभारावोपधानेषु प्रयुज्यते ॥
लेखनिको लेखहारे यः स्वहस्तं विलेखयेत् ॥ १९९ ॥
लेखेषु परहस्तेन तत्राप्येष प्रदर्शितः ॥
भवेन्मण्डलकं बिम्बे कुष्ठभेदे च दर्पणे ॥ २०० ॥
पिप्पलकं स्तनवृन्ते मतं सीवनसूत्रके ॥
पिण्डीतकः स्यात्तगरे मदनद्रौ फणिज्यके ॥ २०१ ॥
त्रिवर्णकं गोक्षुरके त्रिफलायां कटुत्रिके ॥
शालावृकः शृगालेऽपि सारमेये बलीमुखे ॥ २०२ ॥
कौलेयकः कुलश्रेष्ठे स्यादिन्द्रमहकामुके ॥
सुप्रतीकः शोभनाङ्गे भवेदीशानदिग्गजे ॥ २०३ ॥
जैवातृकः कृशे चन्द्रे भैषज्यायुष्मतोरपि ॥
रतार्द्धिकं स्याद्दिवसे सुखस्नानेऽष्टमङ्गले ॥ २०४ ॥

वैनाशिकः स्यात् क्षणिके परतन्तोर्णनाभयोः ॥
वैदेहको वाणिजके शूद्राद्वैश्यासुतेऽपि च ॥ २०५ ॥
वितुन्नकन्तु धन्याके तथा झाण्टामलौषधौ ॥
गोकुणिकः केकरे स्यात् पङ्कस्थे गव्युपेक्षके ॥ २०६ ॥
भार्याटिको भवेद्भार्या निर्ज्जिते हरिणान्तरे ॥
कापटिकोऽन्यमर्मज्ञे छात्रस्याकादशासिनि ॥ २०७ ॥
कौक्कुटिको दाम्भिके स्याददूरप्रेरितेक्षणे ॥
लालाटिकः प्रभोर्भावदर्शिन्याश्लेषणान्तरे ॥ २०८ ॥
कार्याक्षमेऽप्याकलितः शिलाटकः शिलाट्टयोः ॥
कर्कोटकः स्यान्मालूरकाद्रवेयप्रभेदयोः ॥ २०९ ॥
वरण्टकस्तु मातङ्गवेद्यां यौवनकण्टके ॥
संवर्त्तुलेऽप्याखनिकश्चौरे क्रोडे च मूषके ॥ २१० ॥
वैतालिको बोधकरे खेटितालेऽप्युदीरितः ॥
तिक्तशाकस्तु खदिरे वरुणे पत्रसुन्दरे ॥ २११ ॥
मयूरकोऽप्यपामार्गे तुच्छके तु मयूरकम् ॥
विशेषकः स्यात्तिलके विशेषावाहकेऽपि च ॥ २१२ ॥
विदूषकश्चाटुपटौ परनिन्दाकरेऽपि च ॥
भवेत् सैकतिकं मातृयात्रामङ्गलसूत्रयोः ॥ २१३ ॥
तथा सन्यस्तसन्देहजीवक्षेपणकेष्वपि ॥
एडमूकः स्मृतोधीरैः शठे वाक्श्रुतिवर्ज्जिते ॥ २१४ ॥
वर्त्तरूको नदीभेदे काकनीले जलावटे ॥
काकरूक उलूके स्यान्निःस्वे स्त्रीजितदम्भयोः ॥ २१५ ॥
दिगम्बरे भीरुके च दन्दशूकोऽहिरक्षसोः ॥
मुष्टेरुको वदान्येऽपि मिष्टाशिन्यतिथिद्विषि ॥ २१६ ॥
कृकवाकुर्मयूरेऽपि सरटे चरणायुधे ॥

राधरङ्कस्तु नासीरे शीकरे च घनोपले ॥ २१७ ॥
कलविङ्कः स्मृतो ग्रामचटकेऽपि कुलिङ्कके ॥
सौगन्धिकन्तु कह्लारे पद्मरागे च कत्तृणे ॥ २१८ ॥
गन्धोपले गान्धिकेऽपि सौगन्धिक इति ध्वनिः ॥
सोमवल्कस्तु धवलखदिरे खट्फलेऽपि च ॥ २१९ ॥
भयानकः स्मृतो व्याघ्रे सैंहिकेयेऽपि भीषणे ॥
पुण्डरीकं सिताम्भोजे सितच्छत्रे च भेषजे ॥ २२० ॥
कोशकारान्तरे व्याघ्रे पुण्डरीकोऽग्निदिग्गजे ॥
जर्ज्जरीकं बहुच्छिद्रे जर्ज्जरीको जरातुरे ॥ २२१ ॥
चर्चरीको महाकाले केशविन्यासशाकयोः ॥
तर्त्तरीकं वहित्रे स्यात्तर्त्तरीकश्च पारगे ॥ २२२ ॥
फर्फरीकश्च पेटे स्यात् फर्फरीकन्तु मार्दवे ॥
भवेदुत्कलिकोत्कण्ठाहेलासलिलवीचिषु ॥ २२३ ॥
शृगालिका शिवायां स्यात् त्रासादपि पलायने ॥
चण्डालिका किन्नरायामुमायामोषधीभिदि ॥ २२४ ॥
पाञ्चालिका भवेद्वस्त्रपुत्रिकागीतभेदयोः ॥
कनीनिका तारकेऽक्ष्णः स्यात् कनिष्ठाङ्गुलावपि ॥ २२५ ॥
भवेद् गुणनिका नृत्ये शून्याङ्के पाठनिश्चितौ ॥
सन्तानिकाऽपि क्षीरादिसारे मर्कटजालके ॥ २२६ ॥
सन्दंशिकाऽपि सुचुटीलोहयन्त्रविशेषयोः ॥
सङ्घाटिका तु युग्मे स्यात् कुट्टनीघ्राणयोरपि ॥ २२७ ॥
जीवन्तिकाऽपि जीवाख्यशाकवन्दीगुडूचिषु ॥
विद्याद् बृहन्तिकाऽभिख्यामूरुवस्त्रप्रभेदयोः ॥ २२८ ॥
चक्रेरुका बलाकाभिद्वातवेल्लितशाखयोः ॥
स्मृता घर्घरिका क्षुद्रघण्टिकाभ्रष्टधान्ययोः ॥ १२९ ॥

वाद्यप्रभेदवादित्रे दण्डयोरापगान्तरे ॥

कपञ्चकम् ॥

स्यादाऽच्छुरितकं हासनखाघातप्रभेदयोः ॥ २३० ॥
प्रतिसूर्य्यकमिच्छन्ति कृकलासोपसूर्य्ययोः ॥
अनेडमूकमिच्छन्ति वाक्यश्रुतिविवर्ज्जिते ॥ २३१ ॥
राजपटस्य काचस्य गुडके काचवर्त्तिकः ॥
गोजागरिकमित्याहुर्मङ्गले कण्टकारके ॥ २३२ ॥
स्यात्क्रमिकण्टकश्चित्राविडङ्गोदुम्बरेषु च ॥
सुवसन्तक इत्येष वासन्त्यां मदनोत्सवे ॥ २३३ ॥
कक्षावेक्षकमिच्छन्ति शुद्धान्तोद्यानपालयोः ॥
द्वारपाले कवौ षिङ्गे रङ्गाजीविन्यपि क्वचित् ॥ २३४ ॥
नागचारिक उद्दिष्टो राजकुञ्जरहस्तिपे ॥
गणस्थराजे गरुडे चित्रमेखलके क्वचित् ॥ २३५ ॥
स्याद्व्रीहिराजिकः कामलिकायां चीनधान्यके ॥
शीतचम्पकशब्दोऽयं स्यादातर्पणदीपयोः ॥ २३६ ॥
अन्धौ जलकरङ्कः स्यान्नालिकेरजलेऽम्बुदे ॥
शङ्खे जललतायाञ्च कथ्यते जलवापिका ॥ २३७ ॥
काकचीरादिशफरमत्स्ययोः कटखादकः ॥
खादके काचकलशे बलिपुष्टे च जम्बुके ॥ २३८ ॥
स्याच्चिलनीलिका कण्ठीभेदे खद्योतविद्रुतोः ॥
स्यान्नवफलिका नव्ये नवजातरजःस्त्रियाम् ॥ २३९ ॥
स्याच्छतपर्विकादूर्वावचयोरुपकारिका ॥
विष्टभेदे गृहे राज्ञामुपकर्य्यामपीष्यते ॥ २४० ॥
स्याद्व्यवहारिकालोकयात्रा सम्मार्ज्जनीङ्गुदे ॥
स्याद्धेमपुष्पिका यूथ्यां चम्पके हेमपुष्पकः ॥ २४१ ॥

कषट्कम् ॥

लूतामर्कटकः पुत्र्यां नवमाल्यां प्लवङ्गमे ॥
सिन्दूरतिलको नागे सिन्दूरतिलका स्त्रियाम् ॥ २४२ ॥
वर्णविलोडकः श्लोके छायाहारिणि कुम्भिले ॥
मातुलपुत्रको धूर्त्तफले स्यान्मातुलात्मजे ॥ २४३ ॥
ग्राममद्गुरिका शृङ्ग्यां ग्रामयुद्धे च कीर्त्यते ॥
स्यान्मदनशलाकाऽपि शार्य्यां कामोदयोषधौ ॥ २४४ ॥

इति कान्तवर्गः ॥

खैककम् ॥

खमिन्द्रिये सुखे स्वर्गे शून्ये बिन्दौ विहायसि ॥
पुरे संवेदने क्षेत्रे कुलाहलफले क्वचित् ॥ १ ॥

खद्विकम् ॥

नखः कररुहे शण्डे गन्धद्रव्ये नखं नखी ॥
मुखं निःसरणे वक्त्रे प्रारम्भोपाययोरपि ॥ २ ॥
सुखं शर्म्मणि नाके च सुखा पुर्यां प्रचेतसः ॥
शङ्खो निध्यन्तरे कम्बुललाटास्थिनखीषु च ॥ ३ ॥
रेखा स्यादल्पके छद्मिन्याम्भोगोल्लेखयोरपि ॥
लेखो लेख्ये सुरे लेखा लिपिराजिकयोर्मता ॥
मुखः सैम्यग्मनोज्ञेऽपि साम्नः षट्प्रणयेष्वपि ॥ ४ ॥
शिखा शिफायां चूडायां ज्वालायामग्रमात्रके ॥
लाङ्गल्याश्चापि शाखायां चूडायाञ्च शिखण्डिनः ॥ ५ ॥
सखा मित्रे सहाये च शाखापक्षान्तरे भुजे ॥
शाखा वेदविभागे च पादपाङ्गेऽन्तिकेऽपि च ॥ ६ ॥
प्रेङ्खा पर्यटने नृत्ये भवेदश्वगतावपि ॥

खङ्गा गतिविशेषेऽपि शूकशिम्ब्याञ्च नर्त्तने ॥ ७ ॥

खत्रिकम् ॥

त्रिशिखं शेखरे विद्या स्त्रीलेखाराक्षसान्तरे ॥
सुमुखं तार्क्ष्यतनये फणिभेदे च पण्डिते ॥ ८ ॥
दुर्मुखो नागराजेऽपि मुखरे वानराश्वयोः ॥
गोमुखं कुटिलागारे वाद्यभाण्डे च लेपके ॥ ९ ॥
प्रमुखः प्रथमे श्रेष्ठे विशिखस्तोमरे शरे ॥
रथ्यां खनित्र्यां विशिखा नलिकायामपि क्वचित् ॥ १० ॥
विशाखस्तारके स्कन्दे विशाखर्षौ कटिल्लके ॥
मयूखास्त्विट्करज्वाले वैशाखो राधमन्थयोः ॥ ११ ॥

खचतुष्कम् ॥

अग्निमुखो द्विजे देवे भल्लाते चित्रके क्वचित् ॥
पञ्चनखो गजे कूर्मे शिलीमुखोऽलिबाणयोः ॥ १२ ॥
भवेद्व्याघ्रनखः कन्दगन्धद्रव्यविशेषयोः ॥
महाशङ्खो नरास्थ्नि स्यान्निधिसङ्ख्याप्रभेदयोः ॥ १३ ॥
इन्दुलेखाऽमृतासोमलताशशिकलासु च ॥
शशिलेखा कलाभागे बाकुचीवृत्तभेदयोः ॥ १४ ॥
अग्निशिखा लाङ्गलिक्यां कुङ्कुमेऽग्निशिखं मतम् ॥
बद्धशिखा जटायां स्याद् बाले बद्धशिखो मतः ॥ १५ ॥

खपञ्चकम् ॥

स्यान्मलिनमुखः प्रेते गोलाङ्गूले खलेऽनले ॥
अथ शीतमयूखोऽपि शशाङ्कघनसारयोः ॥ १६ ॥
सर्वतोमुखमाख्यातमन्तरिक्षे च पाथसि ॥
विधिक्षेत्रज्ञरुद्रेषु कथितः सर्वतोमुखः ॥ १७ ॥

इति खान्तवर्गः ॥

गैककम् ॥

गौः स्वर्गे वृषभे रश्मौ वज्रे चन्द्रमसि स्मृतः ॥
अर्ज्जुने नेत्रदिग्बाणभूवाग्वारिषु गौर्मता ॥ १ ॥

गद्विकम् ॥

अगः शैले द्रुमे भानौ नगवत्पवनासने ॥
खगः सूर्य्ये ग्रहे देवे मार्गणे च विहङ्गमे ॥ २ ॥
भगमैश्वर्य्यमाहात्म्यज्ञानवैराग्ययोनिषु ॥
यशोवीर्य्यप्रयत्नेच्छाश्रीधर्म्मरविमुक्तिषु ॥ ३ ॥
युगं हस्तचतुष्केऽपि रथसीराङ्गयोर्युगः ॥
युगं कृतादौ युगले वृद्धिनामौषधेऽपि च ॥ ४ ॥
मृगः पशौ कुरङ्गे च करिनक्षत्रभेदयोः ॥
याच्ञायां मृगयायाञ्च मृगी स्याद्वनितान्तरे ॥ ५ ॥
भृगुः शुक्रे प्रपाते च जमदग्नौ पिनाकिनि ॥
भागे रूपार्द्धके प्रोक्तो भागधेयैकदेशयोः ॥ ६ ॥
नागन्तु सीसके रङ्गे स्त्रीबन्धे करणान्तरे ॥
नागः पन्नगमातङ्गक्रूरचारिषु तोयदे ॥ ७ ॥
नागकेशरपुन्नागनागदन्तकमुस्तके ॥
देहानिलप्रभेदेऽथ श्रेष्ठे स्यादुत्तरस्थितः ॥ ८ ॥
रागोऽनुरक्तौ मात्सर्य्ये क्लेशादौ लोहितादिषु ॥
गान्धारादौ नृपे रागस्त्यागो वर्ज्जनदानयोः ॥ ९ ॥
भोगः सुखे धने चाहेः शरीरफणयोर्मतः ॥
पालनेऽभ्यवहारे च निर्वेशे पण्ययोषिताम् ॥ १० ॥
योगोऽपूर्वार्थसम्प्राप्तौ सङ्गतिध्यानयुक्तिषु ॥
वपुस्थैर्य्ये प्रयोगे च विष्कम्भादिषु भेषजे ॥ ११ ॥
विश्रब्धघातिनि द्रव्योपायसंनहनेष्वपि ॥

कार्म्मणेऽपि च योगः स्याद्रोगः कुष्ठौषधे गदे ॥ १२ ॥
वेगो जवे प्रवाहे च महाकालफलेऽपि च ॥
पूगस्तु क्रमुके वृन्दे चङ्गः शोभनदक्षयोः ॥ १३ ॥
अङ्गं गात्रान्तिकोपायप्रतीकेष्वप्रधानके ॥
अङ्गा देशविशेषे स्युरङ्ग सम्बोधनेऽव्ययम् ॥ १४ ॥
इङ्गः स्यादद्भुते ज्ञाने जङ्गमेङ्गितयोरपि ॥
टङ्कः कृपाणभेदे स्याज्जङ्घायाञ्च खनित्रके ॥ १५ ॥
तुङ्गः पुन्नागनगयोस्तुङ्गः स्यादुन्नतेऽन्यवत् ॥
वर्वरानिशयोस्तुङ्गी तङ्गं सीसकरङ्गयोः ॥ १६ ॥
वङ्गः कार्पासवार्त्ताकदेशभेदेषु भाषितः ॥
लङ्गः सङ्गे च पिङ्गे च व्यङ्गो हीनाङ्गभेकयोः ॥ १७ ॥
भङ्गस्तरङ्गे रुग्भेदे भेदे जयविपर्यये ॥
भङ्गा शणाख्यसस्येऽपि भृङ्गो धूम्याटविङ्गयोः ॥ १८ ॥
मधुव्रतेऽपि भृङ्गन्तु केशराजगुडत्वचोः ॥
रङ्गो रणे खले रागे नृत्ये रङ्गं त्रपुन्यपि ॥ १९ ॥
लिङ्गं चिह्नेऽनुमानेऽपि साङ्ख्योक्तप्रकृतावपि ॥
शिवमूर्त्तिविशेषेऽपि मेहने च प्रचक्षते ॥ २० ॥
शृङ्गं प्रभुत्वे शिखरे चिह्ने क्रीडाम्बुयन्त्रके ॥
विषाणोत्कर्षयोश्चाथ शृङ्गः स्यात्कूर्चशीर्षके ॥ २१ ॥
शृङ्गी विषायामृषभे स्वर्णमीनविशेषयोः ॥
गाङ्गस्तु गङ्गासम्भूते भीष्मे शक्तिधरेऽपि च ॥ २२ ॥
पिङ्गः पिशङ्गे पिङ्गी तु शम्यां पिङ्गन्तु बालके ॥
रामटे नाडिकायाञ्च पिङ्गा गोरोचनोमयोः ॥ २३ ॥
खड्गो गण्डकशृङ्गासिबुद्धभेदेषु गण्डके ॥
दुर्गः स्याद् दुर्गमे दुर्गा गौरीनीलकयोरपि ॥ २४ ॥

सर्गस्तु निश्चयाध्यायमोहोत्साहात्मसृष्टिषु ॥
मार्गो मृगमदे मासप्रभेदेऽन्वेषणाध्वनोः ॥ २५ ॥
शार्ङ्गं कार्म्मुकमात्रेऽपि विष्णोरपि शरासने ॥
वल्गु छागे मनोज्ञे च वल्गुभाषितमन्यवत् ॥ २६ ॥
फल्गुः प्रोक्तो मले सारे निःसारे फल्गु वाच्यवत् ॥
शुङ्गी वटाम्रातकयोः पर्कट्यामपि विश्रुता ॥ २७ ॥

गत्रिकम् ॥

पन्नगः पद्मकाष्ठे स्यात् पन्नगोऽपि भुजङ्गमे ॥
प्लवगो वानरे भेके सारथौ चोष्णदीधितेः ॥ २८ ॥
जिह्मगो मन्दगे सर्पे विहगश्चाग्रजे खगे ॥
सर्वगं सलिले ख्यातं सर्वगः शङ्करे विभौ ॥ २९ ॥
आभोगो वारुणच्छत्रे पूर्णतायत्नयोरपि ॥
आयोगो व्यापृतौ रोधगन्धमाल्योपहारयोः ॥ ३० ॥
अयोगो विधुरे कूटे विश्लेषे कठिनोद्यमे ॥
आशुगो मारुते वाणेऽप्युद्वेगं क्रमुकीफले ॥ ३१ ॥
उद्वेगोऽप्युद्बाहुलकोद्वेजनाकोद्गमेऽपि च ॥
सम्भोगः सुरते भोगे सम्भोगो जिनशासने ॥ ३२ ॥
परागः पुष्परजसि धूलीस्नानीययोरपि ॥
गिरिप्रभेदे विख्यातावुपरागे च चन्दने ॥ ३३ ॥
प्रयागस्तीर्थभेदे स्याद्यज्ञे शतमखाश्वयोः ॥
प्रयोगः कार्मणे प्रोक्तः प्रयुक्तौ च निदर्शने ॥ ३४ ॥
वातिगः कथितो भण्ट्यां धातुवादिनि वातिगः ॥
तडागस्तु जलाधारविशेषे कटकेऽपि च ॥ ३५ ॥
पुन्नागः पुरुषश्रेष्ठे पाण्डुनागे सितोत्पले ॥
जातीफले च पुन्नागो निसर्गः सर्गशीलयोः ॥ ३६ ॥

विसर्गस्त्यागवदाने विसर्गो मलनिर्गमे ॥
विसर्ज्जनीयेऽप्ययनप्रभेदेऽपि विभावसोः ॥ ३७ ॥
उत्सर्गो वर्ज्जने त्यागे सामान्यन्यायदानयोः ॥
त्रिवर्गो धर्मकामार्थे त्रिफलायां कटुत्रिके ॥ ३८ ॥
वृद्धिस्थानक्षये सत्त्वरजस्तमसि चेष्यते ॥
तातगुः क्षुद्रताते स्याज्जनयित्रीहितेऽपि च ॥ ३९ ॥
अनङ्गो मदनेऽनङ्गमाकाशमनसोः स्मृतम् ॥
मृदङ्गः पटहे घोषे भुजङ्गः षिङ्गसर्पयोः ॥ ४० ॥
पतङ्गः शलभे शालिप्रभेदे विहगे रवौ ॥
पतङ्गं पारदे क्वापि नरङ्गन्तु वरण्डके ॥ ४१ ॥
शेफे नरङ्गमप्याहु र्निषङ्गः सङ्गतूणयोः ॥
विडङ्गं कृमिघ्ने ख्यातं विडङ्गो नागरेऽन्यवत् ॥ ४२ ॥
कलिङ्गः पूतिकरजे धूम्याटे नीवृदन्तरे ॥
कलिङ्गं कौटजफले कलिङ्गा योषिति स्मृता ॥ ४३ ॥
अपाङ्गमङ्गहीने स्यान्नेत्रान्ते तिलकेऽपि च ॥
वराङ्गं योनिमातङ्गमस्तकेषु गुडत्वाचि ॥ ४४ ॥
पत्राङ्गं पद्मके भूर्ज्जे पत्राङ्गं रक्तचन्दने ॥
रथाङ्गश्चक्रवाकेऽपि रथाङ्गश्चक्र इष्यते ॥ ४५ ॥
रक्ताङ्गं विद्रुमे भौमे विद्यात् कम्पिल्लधीरयोः ॥
रक्ताङ्गश्चापि जीवन्त्यां मातङ्गः श्वपचे गजे ॥ ४६ ॥
कालिङ्गो भूमिकर्कारौ दन्तावलभुजङ्गयोः ॥
कालिङ्गी राजकर्कट्यां धारङ्गः खड्गतीर्थयोः ॥ ४७ ॥
हेमाङ्गो द्रुहिणे तार्क्ष्ये नारङ्गं पिप्पलीरसे ॥
नागरङ्गे विटे जन्तौ यमजेऽपि प्रकीर्त्तितम् ॥ ४८ ॥
सारङ्गश्चातके भृङ्गे कुरङ्गे च मतङ्गजे ॥

पक्षभेदे च सारङ्गः सारङ्गः शबलेऽन्यवत् ॥ ४९ ॥
प्रियङ्गुः फलिनीकङ्गुपिप्पलीराजिकासु च ॥
नीलाङ्गुः कृमिभेदे स्याद्भ्रमरालीप्रसारयोः ॥ ५० ॥
तुरङ्गी चाश्वगन्धायां तुरङ्गश्चित्तवाजिनोः ॥
चक्राङ्गी कटुरोहिण्यां चक्राङ्गो मानसौकसि ॥ ५१ ॥

गचतुष्कम् ॥

ईहामृगो वृके जन्तौ प्रभेदे रूपकस्य च ॥
मल्लनागोऽभ्रमातङ्गे वात्स्यायनमुनावपि ॥ ५२ ॥
उपरागः परीवादे राहुग्रस्तार्कचन्द्रयोः ॥
दुर्नये ग्रहकल्लोलेऽपवर्गस्त्यागमोक्षयोः ॥ ५३ ॥
क्रियावसानसाफल्येऽप्यपवर्गः प्रयुज्यते ॥
उपसर्गः स्मृतो रोगभेदोपप्लवयोरपि ॥ ५४ ॥
समायोगस्तु संयोगे समवाये प्रयोजने ॥
सम्प्रयोगं रते विद्यादन्विते कार्म्मणेऽपि च ॥ ५५ ॥
दीर्घाध्वगः शृङ्खलके लेखहारे तु भेद्यवत् ॥
अभिषङ्गस्तु शपथे स्यादाक्रोशे पराभवे ॥ ५६ ॥
छत्रभङ्गोऽपि वैधव्ये स्वातन्त्र्यनृपनाशयोः ॥
कटभङ्गस्तु सस्यानां हस्तच्छेदे नृपात्यये ॥ ५७ ॥

गपञ्चकम् ॥

कथाप्रसङ्गो वातूले विषवैद्ये च वाच्यवत् ॥
नाडीतरङ्गः काकोले हिण्डके रतहिण्डके ॥ ५८ ॥

इति गान्तवर्गः ॥

घैककम् ॥

घो घर्घरे च घण्टायां काञ्चिकाघातयोरपि ॥

घद्विकम् ॥

अघं तु व्यसने प्रोक्तमघं पातकदुःखयोः ॥ १ ॥
अर्घः पूजाविधौ मूल्येऽप्यङ्घ्रिपादद्रुमूलयोः ॥
ओघो वृन्दे पयोवेगे द्रुतनृत्योपदेशयोः ॥ २ ॥
ओघः परम्परायाञ्च मेघः स्यान्मुस्तके घने ॥
लघुर्मनोज्ञनिःसारागुरुषु प्रथितो लघु ॥ ३ ॥
कृष्णागुरुणि शीघ्रे च स्पृक्कायाञ्च स्मृता लघुः ॥
उद्घः स्यात्पावके हस्तपुटके देहजानिले ॥ ४ ॥
मोघाऽपि पाटलायां स्यान्मोघो निष्फलहीनयोः ॥
मघा माघी च नक्षत्रे भेषजे च यथाक्रमम् ॥ ५ ॥
श्लाघा मता प्रशंसायां परिचर्य्याभिलाषयोः ॥

घत्रिकम् ॥

अनघो निर्म्मलापापमनोज्ञेष्वभिधेयवत् ॥ ६ ॥
पलिघः काचकलशघटप्राकारगोपुरे ॥
परिघो योगभेदे स्यान्मुद्गरेऽर्गलघातयोः ॥ ७ ॥
प्रतिघः प्रतिघाते च रोषे च प्रतिघो मतः ॥
काचिघः काञ्चने प्रोक्तोऽन्नमण्डे मूषकेऽपि च ॥ ८ ॥
महार्घस्तु महामूल्ये तथा लावकपक्षिणि ॥
निदाघो ग्रीष्मकाले स्यादुष्णस्वेदाम्बुनोरपि ॥ ९ ॥
उल्लाघस्तु शुचौ हृष्टे दक्षनीरोगयोरपि ॥
सर्वौघो गुरुवेगार्थसर्वसंहननार्थयोः ॥
अमोघः सफलेऽमोघा विडङ्गाभययोः स्मृता ॥ १० ॥

इति घान्तवर्गः ॥

—:०:—

चद्विकम् ॥

कचः केशे गुरोः पुत्रे बन्धे शुष्कव्रणे कचः ॥
कचा करिण्यां काचस्तु मनौ शिक्ये मृदन्तरे ॥ १ ॥
नेत्ररोगेऽपि नीचस्तु वामने पामरे स्मृतः ॥
मोचः शोभाञ्जने प्रोक्तो मोचा शाल्मलिरम्भयोः ॥ २ ॥
पिचुस्तूले च कर्षे च कुष्ठरोगेऽसुरान्तरे ॥
भैरवस्य प्रभेदेऽपि पिचुः क्काऽपि प्रकीर्त्तितः ॥ ३ ॥
कूर्चो विकत्थने मध्ये भ्रुवोः श्मश्रुणि कैतवे ॥
क्रौञ्चः खगनगद्वीपप्रभेदेषु प्रयुज्यते ॥ ४ ॥
चञ्चो नलादिनिर्माणे चञ्चा तु तृणपूरुषे ॥
चञ्चुः पञ्चाङ्गुले त्रोट्यां गोनाडीकेऽपि पठ्यते ॥ ५ ॥
शुचिः शुद्धेऽनुपहते शृङ्गाराषाढयोः सिते ॥
ग्रीष्मे हुतवहेऽपि स्यादुपधाशुद्धमन्त्रिणि ॥ ६ ॥
रुचिर्मयूखे शोभायामभिष्वङ्गाभिलाषयोः ॥
वीचिः स्वल्पे तरङ्गे स्यादवकाशे सुखेऽपि च ॥ ७ ॥
सूची कराद्यभिनये नारीणां करणान्तरे ॥
सूची च सीवनद्रव्ये शचीऽन्द्राण्यां शतावरौ ॥ ८ ॥
काञ्ची स्यान्मेखलादाम्नि गुञ्जायां नीवृदन्तरे ॥
वचा स्यादुग्रगन्धायां सारिकायां शुके वचः ॥ ९ ॥
अर्चा पूजा प्रतिमयोश्चर्चा स्थासकचिन्तयोः ॥
चर्चिकायाश्च रुक् शोभाकिरणेच्छासु चेष्यते ॥ १० ॥
त्वक् चर्मवल्कयो स्त्वाचे न्यङ् नीचे निम्नकार्ण्ययोः ॥
वाग् वचने सरस्वत्यां भाषागीर्भारती यथा ॥ ११ ॥

चत्रिकम् ॥

कवचो गर्दभाण्डे स्यात् सन्नाहे पटहेऽपि च ॥

विकचः क्षपणे केतुग्रहे च स्फुटितेऽन्यवत् ॥ १२ ॥
क्रकचः करपत्रे स्याद्ग्रन्थिलाख्यद्रुमेऽपि च ॥
सङ्कोचमपि काश्मीरे सङ्कोचो मीनबन्धयोः ॥ १३ ॥
नाराचो लोहबाणे स्यान्नाराचो जलहस्तिनि ॥
नाराच्येषणिकायाञ्च सम्यक् सम्मतहृद्ययोः ॥ १४ ॥
प्रपञ्चः सञ्चये प्रोक्तो विस्तरे च प्रतारणे ॥
मरीचिः कृपणे दीप्त्यामृषिभेदेऽपि दृश्यते ॥ १५ ॥
मारीचो रक्षसो भेदे कक्कोले याज्ञके द्विजे ॥
मारीची देवताभेदे नमुचिः स्मरदैत्ययोः ॥ १६ ॥
कनीचिः पुष्पितलता गुञ्जयोः शकटेऽपि च ॥
अवीचिर्नरकानूर्म्योर्विपञ्ची केलिवीणयोः ॥ १७ ॥
प्रागुदक्प्रत्यगित्येते दिग्देशे कालतोऽव्ययम् ॥
प्राच्योदीच्यप्रतीच्यानां वाचकं स्यादनव्ययम् ॥ १८ ॥

चचतुष्कम् ॥

मलिम्लुचोऽनिले चौरे जलसूचिर्जलौकसि ॥
शृङ्गाटे शिशुमारे च कङ्के शेटिझषेऽपि च ॥ १९ ॥

चपञ्चकम् ॥

रतनारीच इत्येष कथितो रतवल्लभे ॥
कुक्कुरे रतनारीचः सीत्कारे वरयोषिताम् ॥ २० ॥

इति चान्तवर्गः ॥

—:०:—

छद्विकम् ॥

अच्छः स्फटिकभल्लूकनिर्मलेष्वच्छमव्ययम् ॥
आभिमुख्येऽथ कच्छः स्यादनूपे तुन्नकद्रुमे ॥ १ ॥
नौकान्ते परिधानस्य पश्चादञ्चलपल्लवे ॥

कच्छा तु चीरिकायाञ्च वाराह्याञ्च निगद्यते ॥ २ ॥
स्याद् गुच्छः स्तबके स्तम्बे हारभेदकलापयोः ॥
पुच्छः पाश्चात्यभागे स्याल्लाङ्गूले पुच्छमिष्यते ॥ ३ ॥
म्लेच्छः पापतरे जातिभेदे स्यादपभाषिणि ॥
पिच्छा तु शाल्मलीवेष्टे मण्डे चाश्वपदामये ॥ ४ ॥
पङ्क्तौ पूगच्छटाकोशमोचानिजयिनेषु च ॥

छचतुष्कम् ॥

पिच्छपुच्छे महाकच्छः समुद्रे च प्रचेतसि ॥ ५ ॥

इति छान्तवर्गः ॥

—:०:—

जैककम् ॥

जो जन्यां जातमात्रे च मृत्युञ्जये जनार्दने ॥
जूराकाशे सरस्वत्यां पिशाच्यां जवनेऽपि च ॥ १ ॥

जद्विकम् ॥

कञ्जः केशे विरिञ्चौ च कञ्जः पीयूषपद्मयोः ॥
अजो हरौ हरे कामे विधौ छागे रघोः सुते ॥ २ ॥
व्रजो गोष्ठाध्ववृन्देषु निजमात्मीयनित्ययोः
ध्वजं चिह्ने पताकायां ध्वजः शौण्डिकशेफयोः ॥ ३ ॥
खट्वाङ्गे च स्वजं रक्ते स्वजः प्रस्वेदपुत्रयोः ॥
द्विजो विप्रेऽण्डजे दन्ते भार्गीरेणुकयोर्द्विजा ॥ ४ ॥
बीजं रेतसि तत्त्वे च हेतावङ्कुरकारणे ॥
आधानेऽपि च सज्जः स्यात् सन्नद्धे सम्भृतेऽपि च ॥ ५ ॥
वाजं घृतेऽपि यज्ञान्ने वाजो निःस्वनपक्षयोः ॥
वाजं जले मुनौ वाजो व्याजः शाठ्यापदेशयोः ॥ ६ ॥
भुजः पाणौ च बाहौ च कुजः स्यान्नरकारयोः ॥

अब्जो धन्वन्तरौ चन्द्रे निचुले शङ्खपद्मयोः ॥ ७ ॥
अब्जं स्यादथ कुब्जोऽपि न्युब्जः स्यात् पादपान्तरे ॥
न्युब्जन्तु कर्णरोगे स्यान्न्युब्जः प्रोक्तः कुशस्रुचि ॥ ८ ॥
अधोमुखे च कुब्जे च न्युब्जो वाच्यवदिष्यते ॥
आजिः समावनौ युद्धे राजिः स्यात् पङ्क्तिरेफयोः ॥ ९ ॥
लाजाः स्युर्भृष्टधान्येषु लाजः स्यादार्द्रतण्डुले ॥
उशीरे लाजमुद्दिष्टं प्रजासन्तानलोकयोः ॥ १० ॥
गुञ्जाऽपि पटहे प्रोक्ता काकचिञ्च्यां कलध्वनौ ॥
गञ्जा खानौ सुरागेहे स्याद्भाण्डागाररीढयोः ॥ ११ ॥
गञ्जः कुञ्जो निकुञ्जेऽपि हनौ दन्ते च दन्तिनाम् ॥
सञ्जः प्रजापतौ रुद्रे लञ्जः स्यात् पट्टकच्छयोः ॥ १२ ॥
भर्ज्जो बले महोत्साहे खजा मन्थप्रहस्तयोः ॥
पिञ्जा तूले हरिद्रायां पिञ्जस्तु व्याकुलेऽन्यवत् ॥ १३ ॥
पिञ्जो बले चये पिञ्जं रज्जुर्वेण्यां गुणे स्मृता ॥
खर्ज्जूः कण्ड्वाश्च कीटे च खर्जूरीपादपेऽपि च ॥
मर्जूः स्याद्रजके शुद्धौ सर्ज्जूर्वणिजविद्युति ॥ १४ ॥

जत्रिकम् ॥

करजस्तु करञ्जे स्यान्नखे व्याघ्रनखेऽपि ॥
कुटजो वृक्षभेदे स्यादगस्त्यद्रोणयोरपि ॥ १५ ॥
सहजस्तु निसर्गे स्यात् सहोत्थे पुनरन्यवत् ॥
नीरजं कमले कुष्ठे जलजं शङ्खपद्मयोः ॥ १६ ॥
वलजं गोक्षुरे क्षेत्रे सस्यसङ्गरयोरपि ॥
वलजा वरयोषायां वसुमत्यामपि स्मृता ॥ १७ ॥
कारुजः शिल्पिनाश्चित्रे कलभे नागकेशरे ॥
स्वयञ्जाततिले फेने वल्मीके गैरिकेऽपि च ॥ १८ ॥

बाहुजः क्षत्रिये कीरे स्वयञ्जाततिलेऽपि च ॥
वनजो मुस्तके पद्मे वनजं वनजो गजे ॥ १९ ॥
वनजा मुद्गपर्ण्यांश्च वणिग् वाणिज्यजीविनि ॥
वणिक् करणभेदे च वणिज्यायामपीष्यते ॥ २० ॥
सामजस्तु गजे प्रोक्तः सामोत्थे पुनरन्यवत् ॥
भूमिजो नरकेऽङ्गारे सीतायामपि भूमिजा ॥ २१ ॥
गिरिजश्चाभ्रके ख्यातं शिलाजतुसुगन्धयोः ॥
लोहेऽपि गिरिजा गौरीमातुलुङ्ग्योरुदीरिता ॥ २२ ॥
कम्बोजो हस्तिभेदे स्याच्छङ्खदेशविशेषयोः ॥
अङ्गजं रुधिरेऽनङ्गपुत्रकेशमदेऽङ्गजः ॥ २३ ॥
काम्बोजस्तुरगे सोमवल्के पुन्नागपादपे ॥
काम्बोजी मासपर्ण्यांश्च हिङ्गुपर्ण्यामपि क्वचित् ॥ २४ ॥
अण्डजः कृकलासे स्यात् खगे मीने भुजङ्गमे ॥
कस्तूर्यामण्डजा प्रोक्ता परञ्जस्तैलयन्त्रके ॥ २५ ॥
फेने च करवाले च परञ्जः क्षुरिकाफले ॥
हिमजाऽपि शचीगौर्योर्मैनाके हिमजः स्मृतः ॥ २६ ॥

जचतुष्कम् ॥

जघन्यजोऽनुजे शूद्रे भारद्वाजः स्मृतो मुनौ ॥
द्रोणे च वनकार्पास्यां भारद्वाजी च कथ्यते ॥ २७ ॥
भारद्वाजो गुरोः पुत्रे ऽ[illegible] ॥
काश्मीरजाख्याऽतिविषा कुष्ठकुङ्कुमपौष्करे ॥ २८ ॥
क्षीराब्धिजं तु सामुद्रलवणे मौक्तिके क्वचित् ॥
क्षीराब्धिजा श्रियां प्रोक्ता चन्द्रे क्षीराब्धिजो भवेत् ॥ २९ ॥
द्विजराजः शशधरे सुपर्णेऽनन्तभोगिनि ॥
धर्मराजो यमे बुद्धे धर्मराजो युधिष्ठिरे ॥ ३० ॥

राजराजः कुबेरेऽपि सार्वभौमे सुधाकरे ॥
भृङ्गराजस्तु मधुपे मार्कवे विहगान्तरे ॥ ३१ ॥
ग्रहराजो रवौ चन्द्रेऽप्यहिशुकेकिताक्ष्र्ययोः ॥
यक्षराट् त्र्यम्बकसखे मल्लानां रङ्गचत्वरे ॥ ३२ ॥

जपञ्चकम् ॥

मुनिभेषजमागस्त्ये हरीतक्याञ्च लङ्घने ॥
वृषभध्वजशब्दोऽसौ शङ्करे चार्हदन्तरे ॥ ३३ ॥

इति जान्तवर्गः ॥

झद्विकम् ॥

झञ्झा ध्वनिविशेषेऽपि झञ्झाऽणुजलवर्षणे ॥
झञ्झा वाते तारवायौ नष्टेऽपि परिकीर्त्तिता ॥ १ ॥

इति झान्तवर्गः ॥

ञैककम् ॥

ज्ञो विरिञ्चे बुधे सौम्ये

ञद्विकम् ॥

चाज्ञस्तु जडमूर्खयोः ॥
प्रज्ञा बुद्धौ पण्डितेऽपि प्रज्ञो वाच्यवदिष्यते ॥ १ ॥
संज्ञा नामनि गायत्र्यां चेतनायां रविस्त्रियाम् ॥
अर्थसूचनिकायाञ्च हस्ताद्यैरपि कथ्यते ॥ २ ॥

ञत्रिकम् ॥

सर्वज्ञः शङ्करे बुद्धे कृतज्ञः कुक्कुरेऽपि च ॥
दैवज्ञो गणकेऽपि स्यात् क्षेत्रज्ञश्छेक आत्मनि ॥ ३ ॥

इति ञान्तवर्गः ॥

टद्विकम् ॥

कटः श्रोणौ क्रियाकारे किलिञ्जेऽतिशये शवे ॥
समये गजगण्डे च पिप्पल्याश्च कटी मता ॥ १ ॥
खटोऽन्धकूपकफयोः प्रहारान्तरटङ्कयोः ॥
भटः पामरभेदे च वीरे च प्रगमे भटिः ॥ २ ॥
घटः समाधिभेदेभशिरःकूटकुटेषु च ॥
घटा घटनगोष्ठीभघटनासु च दृश्यते ॥ ३ ॥
कुटः कोटे घटे गेहे शिलाकुट्टकपूरुषे ॥
स्याच्छुटी कुम्भदास्याश्च सुरायाश्चित्रमुस्तके ॥ ४ ॥
पटः प्रियालवृक्षे च सुचेले च पुरस्कृतौ ॥
पटः प्रम[illegible]द्वेषयोरप्युदाहृतः ॥ ५ ॥
वटो गोले गुले भक्ष्ये वटो साम्यवराटयोः ॥
वटः कपर्दे न्यग्रोधे शुम्बरक्तिकयोर्वटी ॥ ६ ॥
विटोऽद्रौ लवणे पिङ्गे मूषके खदिरेऽपि च ॥
स्फुटो व्यक्ते प्रफुल्ले च व्याप्ते च कलितेऽन्यवत् ॥ ७ ॥
निर्भिन्नकर्कटीसस्ये पादस्फोटे स्फुटिर्मता ॥
कूटं यन्त्रेऽनृते राशौ निश्चले लोहमुद्गरे ॥ ८ ॥
मायाद्रिशृङ्गयोस्तुच्छे सीरावयवदम्भयोः ॥
पुरद्वारे च शंसन्ति लाटो देशेंऽशुकेऽपि च ॥ ९ ॥
झाटो निकुञ्जे कान्तारे व्रणसम्मार्ज्जनेऽपि च ॥
वटो वृतौ च मार्गेऽपि वाटी तु गृहनिष्कुटे ॥ १० ॥
चटुश्चाटौ पिचण्डे च व्रतिनामासनान्तरे ॥
कटुः सुगन्धे तीक्ष्णे स्यादकार्ये मत्सरे रसे ॥ ११ ॥
कटुः प्रियङ्गुकटुका राजिकास्वथ दूषणे ॥
कटु प्रोक्तं पटुस्तीक्ष्णे नीरोगे चतुरेऽन्यवत् ॥ १२ ॥

पट्टुः पटोलपत्रेऽपि छत्रालवणयोः पट्टुः ॥
खेटः कफे ग्रामभेदे निन्दिते वसुनन्दके ॥ १३ ॥
अट्टं भक्ते च शुष्के च क्षौमेऽत्यर्थे गृहान्तरे ॥
पट्टः पेषणपाषाणे व्रणादीनाञ्च बन्धने ॥ १४ ॥
चतुष्पथे च राजादिशासनान्तरपीठयोः ॥
पट्टी ललाटभूषायां पट्टी लाक्षाप्रसाधने ॥ १५ ॥
कुष्टश्च रोदने रावे कष्टं गहनकृच्छ्रयोः ॥
इष्टमाशंसिते पूज्यतमे प्रियतमेऽन्यवत् ॥ १६ ॥
इष्टं संस्कारयोगे च यागे च क्रतुकर्मणि ॥
रिष्टं क्षेमाशुभाभावकृपाणेषु प्रचक्ष्यते ॥ १७ ॥
म्लिष्टमव्यक्तवाचि स्यान्म्लिष्टं म्लानेऽन्यवन्मतम् ॥
दिष्टं दैवे च काले स्याद्दिष्टः सृष्टं तु निर्मिते ॥ १८ ॥
युक्तनिश्चितयोः प्राज्ये हृष्टो हृषितवन्मतः ॥
रोमाञ्चिते प्रहसिते जातदर्पे च विस्मिते ॥ १९ ॥
व्युष्टं दिने प्रभाते च फले पर्युषितेऽपि च ॥
त्वष्टा शिल्पिनि देवानां तथा वर्द्धकिसूर्ययोः ॥ २० ॥
इष्टिः स्यादभिलाषेऽपि सङ्ग्रहश्लोकयागयोः ॥
विष्टिः कर्मकरे भद्रे प्रेषणे वेतनेऽपि च ॥ २१ ॥
दिष्टिः परीमाणमुदोर्दृष्टिर्विदर्शनाक्षिषु ॥
रिष्टिः खड्गे समृद्धौ च कृष्टिः स्यात् कर्षणे बुधे ॥ २२
सृष्टिः स्वभावे निर्माणे पुष्टिर्वृद्धौ च पोषणे ॥
यष्टिर्हारलताशस्त्रभेदयोर्ध्वजदण्डके ॥ २३ ॥
भाण्ड्याञ्च मधुयष्ट्याञ्च मुष्टिर्बद्धकरे पले ॥
व्युष्टिः स्याद् घर्षणे विष्णुक्रान्तास्पर्द्धाकिरिष्वपि ॥२४
जटालग्नकचे मूले प्लक्षमाक्षिकयोर्जटी ॥

सटा जटाकेशरयोः फटा च फणदम्भयोः ॥ २५ ॥
घोण्टा स्याद् बदरे पूगे घटीखण्डे च वाससः ॥
परीक्षार्थतुलायाश्च घटः सूरिभिरिष्यते ॥ २६ ॥
पटिः पटविशेषेऽपि द्राशुले कुष्टिकाद्रुमे ॥
स्यात् कोटिरश्रौ चापाग्रे सङ्ख्याभेदप्रकर्षयोः ॥ २७ ॥
स्यात् त्रुटिः संशये लेशे सूक्ष्मैलाकालमानयोः ॥
त्रोटिः स्यात् कट्फले चञ्च्वां खगमीनविशेषयोः ॥ २८ ॥
खाटिः किणे शवरथे खाटिरेकग्रहे स्मृता ॥
नटी हट्टविलासिन्यां शोणके नर्त्तके नटः ॥ २९ ॥

टत्रिकम् ॥

अवटः स्यात् खिले गर्त्ते कूपे कुहकजीविनि ॥
विकटः सुन्दरे प्रोक्तो विशालविकरालयोः ॥ ३० ॥
करटो गजगण्डे स्यात् कुसुम्भे निन्दजीविनि ॥
एकादशाहसार्द्धेऽपि दुर्दुरूढेऽपि वायसे ॥ ३१ ॥
करटो वाद्यभेदेऽपि निर्द्दटो निर्द्दये स्मृतः ॥
परापवादसंरक्ते निर्द्दटो निष्प्रयोजने ॥ ३२ ॥
चिपिटः खाद्यभेदेऽपि चिपिटो विस्तृतेऽन्यवत् ॥
जकुटो यमले ख्यातो वार्त्ताकुकुसुमे शुनि ॥ ३३ ॥
निष्कुटस्तु गृहोद्याने केदारककपाटयोः ॥
इम्मुटः कच्छपे सूर्येऽप्युत्कटस्तीव्रमत्तयोः ॥ ३४ ॥
चर्पटः स्फारविपुलचपेटे पर्पटेऽपि च ॥
पर्पटः पिष्टविकृतौ पर्पटो भेषजान्तरे ॥ ३५ ॥
पिच्चटो नेत्ररोगे स्यात् पिच्चटं त्रपुसीसयोः ॥
सम्पाटं शिक्यभेदेऽपि धौताञ्जन्यामपि स्मृतम् ॥ ३६ ॥
कर्द्दटः करहाटे स्यात् पङ्कपङ्कारयोरपि ॥

कूपीटमुदरेनीरे कार्पटो जतुकार्यिणोः ॥ ३७ ॥
कुक्कुटस्ताम्रचूडे स्यात् कुक्कुभेऽग्निकणेऽपि च ॥
निषादशूद्रयोः पुत्रे तालमध्ये तु कुक्कुटम् ॥ ३८ ॥
रसो नस्यप्रभेदे स्यादुचटा दम्भचर्चयोः ॥
केकटः श्रोणके विष्णावर्गटोऽन्तर्गले गले ॥ ३९ ॥
कर्कटः करणे स्त्रीणां राशिभेदे कुलीरयोः ॥
शाल्मलीफलवालुक्योः कर्कटी कर्कटः खगे ॥ ४० ॥
कीकटस्तुरगे निःस्वे देशभेदे मितम्पचे ॥
मोचाटः कृष्णजीरे स्याद्रम्भास्थिन मलयोद्भवे ॥ ४१ ॥
चक्राटो विषवैद्येऽपि धूर्त्तदीनारयोरपि ॥
वर्णाटो गायने चित्रकारे स्त्रीकृतजीविनि ॥ ४२ ॥
भावाटो भावके साधुनिवेशे कामुकेऽपि च ॥
शैलाटो देवले सिंहे शुक्लकाचकिरातयोः ॥ ४३ ॥
द्रोहाटः कथितो गाथाप्रभेदे मृगलुब्धके ॥
वैडालवृत्तिकेऽपि स्याद्धाराटश्चातकाश्वयोः ॥ ४४ ॥
मोरटस्तु भवेदिक्षुमूलाङ्कोटप्रसूनयोः ॥
सप्तरात्रात् परे क्षीरे मूर्विकायान्तु मोरटा ॥ ४५ ॥
वेकटः स्याद्वैकटिके तथा सञ्जातयौवने ॥
वेरटो मिश्रिते नीचे वेरटं बदरीफले ॥ ४६ ॥
त्रिकूटं सिन्धुलवणे त्रिकूटश्च सुवेलके ॥
भाकूटः कथ्यते मीनभेदे शैलान्तरेऽपि च ॥ ४७ ॥
अरिष्टः फेनिले निम्बे लशुने काककङ्कयोः ॥
अरिष्टं सूतिकागारे तक्रे चिह्ने शुभाशुभे ॥ ४८ ॥
संसृष्टं तद्गते विद्यात् संशुद्धे वसनादिना ॥
अवटुः कथितो घाटा कूपगर्त्तेषु सूरिभिः ॥ ४९ ॥

प्रतिकृष्टं मतं गुह्ये द्विरावृत्त्या च कर्षिते ॥
प्रतिकृष्टः प्रेषिते स्यात् प्रत्याख्याते च वाच्यवत् ॥ ६२ ॥
शिपिविष्टस्तु खलतौ शिवे दुश्चर्मणि स्मृतः ॥
चतुःषष्टि[illegible]ऽपि चतुःषष्टि[illegible]पि ॥ ६३ ॥
स्याद्गाढमुष्टिः कृपणे कृपाणादिषु चेष्यते ॥

टपञ्चकम् ॥

अथ स्या[illegible]ष्ठो निश्वासाधरचुम्बयोः ॥ ६४ ॥

इति टान्तवर्गः ॥

—:०:—

ठद्विकम् ॥

कठः स्वर ऋचाम्भेदे स्यात्तदध्येतृवेदिनोः ॥
मुनावपि हठो वारिपर्ण्यां स्यात् प्रसभेऽपि च ॥ १ ॥
शठो मध्यस्थपुरुषे शठो धुत्तूरधूर्त्तयोः ॥
शठोऽलसे च मूर्खे च कुण्ठो कर्मण्यमूर्खयोः ॥ २ ॥
पाठः स्यात् पठने विद्धकर्ण्यां पाठाऽपि पठ्यते ॥
कण्ठो गले संविधाने ध्वनौ मदनपादपे ॥ ३ ॥
वण्ठः स्यादकृतोद्वाहे खर्वे कुन्तायुधेऽपि च ॥
पृष्ठं चरमगात्रे स्याद्देहस्यावयवान्तरे ॥ ४ ॥
कोष्ठः कुशूले चात्मीये कुक्षेरन्तर्गृहस्य च ॥
कुष्ठो रोगे सुगन्धे च गोष्ठं गोस्थानकेऽपि च ॥ ५ ॥
गोष्ठी सभायां संलापे दुष्ठुः स्याद् दुर्बलेऽधमे ॥
प्रष्ठः श्रेष्ठाग्रयोरुक्तः प्रष्ठा चाण्डालिकौषधौ ॥ ६ ॥
ज्येष्ठः श्रेष्ठेऽतिवृद्धे च ज्येष्ठो मासान्तरेऽपि च ॥
गृहगोधर्क्षयोर्ज्येष्ठा श्रेष्ठा वैश्रवणे वरे ॥ ७ ॥
काष्ठा दारुहरिद्रायां कालमानप्रकर्षयोः ॥

स्याद्दिशि स्थानमात्रे च काष्ठमाख्यातमिन्धने ॥ ८ ॥
निष्ठा निष्पत्तिनाशान्तयाच्ञानिर्वहणेषु च ॥
षष्ठी षण्णाञ्च पूरण्यां कात्यायन्यामपीष्यते ॥ ९ ॥

ठत्रिकम् ॥

कमठः कच्छपे भाण्डभेदे च कमठं मतम् ॥
जरठः कर्कशे पाण्डौ जरठः कठिनेऽन्यवत् ॥ १० ॥
नर्म्मठश्चूचुके षिङ्गे वैकुण्ठः कृष्णशक्रयोः ॥
श्रीकण्ठः खण्डपरशौ श्रीकण्ठः कुरुजाङ्गले ॥ ११ ॥
वरिष्ठः स्यादुरुतरे प्रवरे तित्तिरावपि ॥
वरिष्ठं मरिचे ताम्रे सादिष्ठोऽतिदृढार्य्ययोः ॥ १२ ॥
अम्बष्ठो देशभेदेऽपि विप्राद्वैश्यासुतेऽपि च ॥
अम्बष्ठा चाम्ललोण्यां स्यात् पाठायूतिकयोरपि ॥ १३ ॥
कनिष्ठोऽल्पेऽनुजे यूनि कनिष्ठा दुर्बलाङ्गुलौ ॥
लघिष्ठोऽत्यल्पके भेलेऽप्यपष्ठुः कालबालयोः ॥ १४ ॥
प्रकोष्ठो विस्तृतकरे भूपकक्षान्तरेऽपि च ॥
कूर्परादधरे चापि प्रतिष्ठा स्थानमात्रके ॥ १५ ॥
गौरवे यागनिष्पत्तिचतुरक्षरपद्ययोः ॥
प्रकुष्ठो व्रीहिभेदे स्यात्प्रकुष्ठो मन्थरेऽन्यवत् ॥ १६ ॥

ठचतुष्कम् ॥

दन्तशठः स्याज्जम्बीरे कपित्थे कर्म्मरङ्गके ॥
नागरङ्गेऽपि चाङ्गेर्य्यां स्मृता दन्तशठा बुधैः ॥ १७ ॥
सूत्रकण्ठो द्विजे प्रोक्तः खञ्जरीटकपोतयोः ॥
हारिकण्ठः परभृते हारान्वितगलेऽपि च ॥ १८ ॥
कालकण्ठस्तु दात्यूहे कलविङ्के च खञ्जने ॥
सितापाङ्गे हरे पीते सारके नीलकण्ठवत् ॥ १९ ॥

कलकण्ठः कलध्वाने हंसे पारावते पिके ॥
देवकाष्ठन्तु सरलदेवदारुमहीरुहोः ॥ २० ॥
कालपृष्ठं भवेत् कर्णचापे कोदण्डमात्रके ॥
कालपृष्ठस्तु सारङ्गविशेषे कङ्कपक्षिणि ॥ २१ ॥

इति ठान्तवर्गः ॥

—:०:—

डाद्विकम् ॥

गुडः स्याद्गोलके हस्ते सन्नाहेक्षुविकारयोः ॥
गुडा स्नुहीगुडिकयोर्गजे मीनान्तराययोः ॥ १ ॥
जडो मूर्खे हिमग्रस्ते शूकाशिम्ब्यां जडा मता ॥
गडुः पुष्टगुडे कुब्जे षडः पेयान्तरे भिदि ॥ २ ॥
व्याडो हिंस्रपशौ सर्पे ताडस्ताडनघोषयोः ॥
मुष्टिमेयतृणादौ च ताडी तालीदलद्रुमे ॥ ३ ॥
नीडं स्थाने कुलाये च सकारपूर्वकोऽन्तिके ॥
क्रोडः सूकरपातङ्ग्योः क्रोडं क्रौडे च वक्षसि ॥ ४ ॥
चोडो देशविशेषे स्याच्चोडः प्रावरणान्तरे ॥
क्ष्वेडः कर्णामये ध्वाने गरले कुटिलेऽपि च ॥ ५ ॥
लोहितार्कफले क्ष्वेडं घोषपुष्पे दुरासदे ॥
योधानां सिंहनादे तु क्ष्वेडा स्याद्वंशशल्यके ॥ ६ ॥
अण्डं खगादिकोशे स्यान्मुष्के वीर्येऽपि च क्वचित् ॥
स्यात् खण्डः शकले चेक्षुविकारमणिदोषयोः ॥ ७ ॥
गण्डः कपोले पिटके योगभेदे च गण्डके ॥
गण्डः प्रवीरे चिह्ने स्यादश्वभूषणबुद्बुदे ॥ ८ ॥
चण्डो दैत्यान्तरे तीव्रे चण्डो दासे यमस्य च ॥
चण्डा धनहरीशङ्खपुष्प्योश्चण्डोऽतिकोपने ॥ ९ ॥

चण्डी कात्यायनीहिंस्राकोपनस्त्रीषु सम्मता ॥
षण्डं पद्मादिसङ्घाते खण्डः स्याद् गोपतावपि ॥ १० ॥
कुण्डं देवजलाधारे पिठरेऽथ कमण्डलौ ॥
कुण्डी कुण्डः स्मृतो जारात् पतिवत्नीसुतेऽपि च ॥ ११ ॥
दण्डी यमे मानभेदे लगुडे दमसैन्ययोः ॥
व्यूहभेदे प्रकाण्डेऽश्वे कोणमन्थानयोरपि ॥ १२ ॥
अभिमाने ग्रहे दण्डश्चण्डांशोः पारिपार्श्विके ॥
गौडः पामरजातौ च वृद्धनाभौ च वाच्यवत् ॥ १३ ॥
पिण्डं सान्द्रे बलं वोले गृहांशे जीवनायसोः ॥
पिण्डो देहे जवापुष्पे निवापे सिह्लकेऽपि च ॥ १४ ॥
पिण्डी स्यात्तगरेऽलाबुखर्ज्जूरीभेदयोरपि ॥
पण्डः षण्डे धियां पण्डा पाण्डुः कुन्तीपतौ सिते ॥ १५ ॥
मण्डं मस्तुनि शाके च मण्डः स्यात् सारपिच्छयोः ॥
एरण्डे भूषणे चाथ मण्डा धात्र्यामुदीरिता ॥ १६ ॥
मुण्डो दैत्यान्तरे राहौ मूर्द्धमुण्डितयोरपि ॥
शौण्डो मत्तेऽपि विख्यातः शौण्डा पिप्पलिचर्य्ययोः ॥१७॥
काण्डं नाले तरुस्कन्धे बाणेऽवसरनीरयोः ॥
कुत्सिते रहसि स्तम्बे काण्डं गर्वेऽप्युदाहृतम् ॥ १८ ॥
भाण्डं भूषणमात्रेऽपि भाण्डं मूलवणिग्धने ।
नदीपात्रे तुरङ्गाणां भूषणे भाजनेऽपि च ॥ १९ ॥
इडा वाचि गवि क्षोणाविडा च बुधयोषिति ॥
क्रीडा केलिप्रकारे स्यात् खेलावज्ञानयोरपि ॥ २० ॥
चूडा शिखायां वलभौ चूडा बाहुविभूषणे ।
पीडा कृपाशिरोमालापमर्दसरलद्रुषु ॥ २१ ॥
नाडी नाले शिरागण्डदूर्वयोः स्याद्गुणान्तरे ॥

नाडी षट्क्षणकालेऽपि चर्य्यायां कुहनस्य च २२ ॥
रण्डा मूषिकपर्ण्याञ्च रण्डा विधवयोषिति ॥
चण्डाऽपि पांसुलायां स्याद्रण्डो हस्तादिवर्ज्जिते ॥ २३ ॥
शुण्डाऽपि जलहस्तिन्यां मदिराकरिहस्तयोः ॥
नलिन्यां वारयोषायां शुण्डस्तु मदनिर्झरे ॥ २४ ॥

डत्रिकम् ॥

गारुडं स्यान्मरकते विषशास्त्रेऽपि गारुडम् ॥
द्राविडः स्याज्जानपदे वेधमुख्यकशङ्कयो ॥ २५ ॥
प्रचण्डो दुर्वहे श्वेतकरवीरे प्रतापिनि ॥
पिचण्डमुदरे विद्यात् पशोरवयवेऽपि च ॥ २६ ॥
तरण्डो वडिशीसूत्रबद्धवस्तुनि मेलके ॥
वरण्डोऽप्यन्तरावेदौ सन्दोहमुखरोगयोः ॥ २७ ॥
पूत्यण्डो गन्धकीटेऽपि तथा गन्धमृगे स्मृतः ॥
मार्त्तण्डस्तपने क्रोडे शिखण्डो बर्हचूडयोः ॥ २८ ॥
प्रकाण्डो विटपे शस्ते मूलस्कन्धान्तरे तरोः ॥
कोदण्डो भ्रूलतायां स्याद्देशभेदे च कार्म्मुके ॥ २९
सरण्डः सरटे धूर्त्ते सरण्डो भूषणान्तरे ॥
मारुण्डोऽण्डे भुजङ्गीनां मार्गे गोमयमण्डले ॥ ३० ॥
करण्डो मधुकोशासिकारण्डवदलाढके ॥
कूष्माण्डो गणभेदे स्याद् भ्रूणे कर्कारुकेऽपि च ॥ ३१ ॥
कूष्माण्डी चौषधीगौर्य्योर्भेरुण्डो भीमदर्शने ॥
भेरुण्डो देवताभेदे पक्षिणो भिदि चेष्यते ॥ ३२ ॥
वारुण्डः सेकपात्रे स्यान्मले दृक्कर्णयोरपि ॥
गणिस्थराजे वारुण्डी द्वारपिण्ड्यामुदीरिता ॥ ३३ ॥
तिन्तिडी भूरुहे कालदामे दैत्यान्तरेऽपि च ॥

तिन्तिडस्तिन्तिडी तु स्याच्चिञ्चावृक्षाम्लयोरपि ॥ ३४ ॥
विचण्डा सारिकावर्त्तिखड्गधेनुषु कथ्यते ॥
वितण्डा वादभेदे स्यात् कच्छीशाके शिलाह्वये ॥ ३५ ॥
वितण्डा करवीर्याञ्च निर्गुण्डी सिन्दुवारके ॥
नीलशेफालिकायाञ्च करहाटेऽपि कुत्रचित् ॥ ३६ ॥

डचतुष्कम् ॥

भवेद्वातथुडो वात्या वामव्योर्वातशोणिते ॥
पिच्छिलस्फोटिकायाञ्च देवताडस्तु घोषके ॥ ३७ ॥
सैंहिकेयग्रहे चापि देवताडो हुताशने ॥
चक्रवाडोऽद्रिभेदे स्याच्चक्रवाडन्तु मण्डले ॥ ३८ ॥
जलरुण्डो जलावर्त्ते पयोरेणौ भुजङ्गमे ॥
अपोगण्डस्तु शिशुके विकलाङ्गेऽतिभीरुके ॥ ३९ ॥

इति डान्तवर्गः ॥

—:०:—

ढद्विकम् ॥

दृढः स्थूले भृशे शक्ते प्रगाढेऽपि दृढो मतः ॥
बाढं दृढे प्रतिज्ञायां मूढस्तन्द्रितबालयोः ॥ १ ॥
गूढं रहसि गुह्ये च संवृते पुनरन्यवत् ॥
व्यूढः संहतविन्यस्तपृथुलेषु च भेद्यवत् ॥ २ ॥
षण्ढो वर्षधरे क्लीबे गोपतौ बन्ध्यपूरुषे ॥
वोढा स्याद्धारिते सूते सोढा मर्षणशक्तयोः ॥ ३ ॥
राढा सूक्ष्मे च शोभायां दाढा दंष्ट्राभिलाषयोः ॥
माढिः पत्रादिभङ्गौ स्यान्माढिर्दैन्यप्रकाशने ॥ ४ ॥

ढत्रिकम् ॥

आषाढो व्रतिनां दण्डे मासे मलयपर्वते ॥

वारूढः शम्बलेऽपि स्याद्वस्त्राञ्चलकपाटयोः ॥ ५ ॥
पञ्जरे पावके वाथ प्ररूढो जठरे स्मृतः ॥
बद्धमूले विरूढस्तु सञ्जातेऽङ्कुरितेऽन्यवत् ॥ ६ ॥
समूढः पुञ्जिते भुग्ने सद्योजातेऽनुपप्लुते ॥
उदूढ ऊढे स्थूले स्यादुपोढो निकटोढयोः ॥ ७ ॥
निगूढो गर्हिते गुप्ते प्रमीढो मूत्रिते घने ॥
संरूढोऽङ्कुरिते प्रौढे प्रगाढो दृढपृच्छयोः ॥ ८ ॥
अध्यूढा कृतसापत्न्यां नार्यामध्यूढ ईश्वरे ॥

ढचतुष्कम् ॥

अध्यारूढं समारूढेऽप्यधिके चाऽप्यऽभेद्यवत् ॥ ९ ॥

इति ढान्तवर्गः ॥

णद्विकम् ॥

कणोऽतिसूक्ष्मे धान्यांशे कृष्णाजीरकणादिषु ॥
पणो वराटमाने स्यान्मूल्ये कार्षापणे ग्लहे ॥ १ ॥
क्रय्यशाकटिकद्यूतव्यवहारे भृतौ धने ॥
गणः समूहे प्रथमे सङ्ख्यासैन्यप्रभेदयोः ॥ २ ॥
घ्राणं घ्राते च नासायां काणः काकैकचक्षुषोः ॥
बाणः स्यात् केवले काण्डे काण्डावयवदैत्ययोः ॥ ३ ॥
बाणा झिण्ट्यां मता धीरैः शणी मासचतुष्टये ॥
कषणे करपत्रे च शाणी प्रावरणान्तरे ॥ ४ ॥
त्राणा तु त्रायमानायां रक्षिते रक्षणेऽपि च ॥
प्राणो हृन्मारुते बाले काव्यजीवेऽनिले बले ॥ ५ ॥
वाच्यवत् पूरिते प्राणं प्राणाश्चाऽसुषु कीर्त्तिताः ॥
द्रुणं चापे च खड्गे च द्रुणो वृश्चिकभृङ्गयोः ॥ ६ ॥

द्रुणी कच्छपिकायाञ्च जलद्रोण्यामुदाहृता ॥
द्रोणः कृपीपतौ कृष्णकाके स्यादाढकेऽपि च ॥ ७ ॥
आढवापचतुष्के(१) च द्रोणी स्यान्नीवृदन्तरे ॥
द्रोणी काष्ठाम्बुवाहिन्यां गवाङ्गासभुजि स्थितौ ॥ ८ ॥
मोणः शुष्कफले नक्रमक्षिकाहिकरण्डयोः ॥
कोणो वाद्यप्रभेदे स्यात् कोणोऽस्त्रे लगुडेऽर्कजे ॥ ९ ॥
वीणा वाद्यादिनोपायेऽप्येकदेशे गृहस्य च ।
शोणः श्योणाकनदयोः शोणः कोकनदच्छदे ॥ १० ॥
लोहिताश्वे कृशानौ च भ्रूणः स्त्रीगर्भडिम्भयोः ॥
तीक्ष्णं सामुद्रलवणे विषलोहाग्निमुष्कके ॥ ११ ॥
तीक्ष्णः सारे च तिग्मात्मत्यागिनोर्वाच्यवद्भवेत् ॥
कर्णः पृथाज्येष्ठसुते सुवर्णालौ श्रुतावपि ॥ १२ ॥
जर्णश्चन्द्रे च वृक्षे च वर्णः काञ्चनयज्ञयोः ॥
वर्णो द्विजादौ शुक्लादौ स्तुतौ रूपयशोऽक्षरे ॥ १३ ॥
विलेपने कथायाञ्च वर्णः स्याद् गुणभेदयोः ॥
पर्ण्यं स्यात् किंशुके पत्रे शीर्णं तनुविशीर्णयोः ॥ १४ ॥
पूर्णः शब्दे समग्रे च पूरिते चापि वाच्यवत् ॥
चूर्णं क्षोदे क्षारभेदे चूर्णा निवासयुक्तिषु ॥ १५ ॥
कीर्णं छन्ने परिक्षिप्ते हिंसिते कीर्णमिष्यते ॥
जीर्णं पक्के पुराणे च दीर्णं दारितभीतयोः ॥ १६ ॥
उष्णः स्यादातपे ग्रीष्मे दक्षे कृष्णस्तु केशवे ॥
व्यासेऽर्ज्जुने कोकिले च कृष्णं मरिचलोहयोः ॥ १७ ॥
कृष्णा तु द्रौपदीनीलीहारहूरासु कथ्यते ॥
वाच्यवन्मेचके कृष्णे जिष्णुः शक्रे धनञ्जये ॥ १८ ॥

---

१ आदर्शे, जाभुजापचतुष्क इति पाठः ।

जित्वरे चाथ विष्णुः स्यात् कृष्णेऽर्के वसुदैवते ॥
गेष्णुर्नटे गायने च देष्णुर्दातरि दुर्दमे ॥ १९ ॥
वृष्णिस्तु यादवे मेषे वृष्णिः पाखण्डिचण्डयोः ॥
पार्ष्णिः पाश्चात्यभागे स्यात् पादमूलोन्मदास्त्रियोः ॥ २० ॥
सेनापृष्ठे च कुम्भ्याश्च तृष्णा लिप्सापिपासयोः ॥
ऊर्णा मेषादिलोम्नि स्यादन्तरावर्त्तके भ्रुवोः ॥ २१ ॥
मणिर्गोले मेहनाग्रे रत्ने चाजागलस्तने ॥
अणिराणिवदक्षाग्रकीले स्यादस्तिसीमयोः ॥ २२ ॥
कुणिस्तुन्नकवृक्षेऽपि कुणिः स्यात् कुकरेऽन्यवत् ॥
घूणिः क्रमुकभेदेऽपि तुष्टदैवश्रुतावपि ॥ २३ ॥
श्रेणिः पङ्क्तौ सेकपात्रे श्रेणिः स्यात् कारुसंहतौ ॥
वाणिः स्यादूतिभारत्योर्वाणिर्मूल्ये बलाहके ॥ २४ ॥
वेणी कचस्य बन्धे स्यान्नदीनां मेलकेऽपि च ॥
देवताडे च तूणी तु नील्यां तूणौ निषङ्गके ॥ २५ ॥
घृणा जुगुप्साकृपयोः फाणिर्गुडकरम्बयोः ॥
श्राणा यवाग्वां पक्वे तु श्राणं स्थूणाऽयसः स्मृता ॥२६॥
प्रतिमायां गृहस्तम्भे वीणा वल्लकिविद्युतोः ॥
वेणुर्भूपान्तरे वंशे स्थाणुः कीले स्थिरे हरे ॥ २७ ॥
रेणुः पर्पटके धूल्यामल्पेऽणुर्व्रीहिसूक्ष्मयोः ॥

णत्रिकम् ॥

अरुणो व्यक्तरागे स्यात् सन्ध्यारागेऽर्कसारथौ ॥ २८ ॥
निःशब्दे कपिले कुष्ठे द्रव्ये वाच्यवदिष्यते ॥
अरुणाऽतिविशाश्यामामञ्जिष्ठात्रिवृतासु च ॥ २९ ॥
करुणस्तु रसे वृक्षे कृपायां करुणा मता ॥
वरुणः सम्मतो नीरे स्वर्लोके परमेष्ठिनि ॥ ३० ॥

वरुणस्तरुभेदेऽप्सु प्रतीचीपतिसूर्ययोः ॥
[illegible]ेऽपि प्राकारे वरणं वृतौ ॥ ३१ ॥
तरुणः स्यान्नवे यूनि कुब्जपुष्पोरुबूकयोः ॥
चरणं बह्वृचादौ स्यान्मूले गोत्रे पदेऽपि च ॥ ३२ ॥
चरणं भ्रमणेऽत्तौ च चरणं रासभध्वनौ ॥
लवणो रसरक्षोऽब्धिभेदेषु लवणान्विते ॥ ३३ ॥
करणं साधनक्षेत्रकाचकायस्थकर्म्मसु ॥
गीताङ्गहारसंवेशक्रियाभेदेन्द्रियेषु च ॥ ३४ ॥
बालवादौ च करणः स्मृतः शूद्राविशोः सुते ॥
जरणं जीरकाजाजिहिङ्गुसौवर्चलेष्वपि ॥ ३५ ॥
धरणं मानभेदेऽपि धारणे धरणीभुवि ॥
रमणं स्यात् पटोलस्य मूलेऽपि रमणः प्रिये ॥ ३६ ॥
शरणं वधरक्षित्रोः शरणं रक्षणे गृहे ॥
कत्तृणं तृणभेदेऽपि वारिपर्ण्याश्च कत्तृणम् ॥ ३७ ॥
यन्त्रणं स्यान्नियमने बन्धने रक्षणेऽपि च ॥
[illegible]घूणस्ताम्रकुम्भे स्यादलिन्दे लोहमुद्गरे ॥ ३८ ॥
द्रुघणो मुद्गरेऽपि स्याद् द्रुघणा च परश्वधे ॥
प्रवणः क्रमनिम्नोर्व्यामायत्ते च चतुष्पथे ॥ ३९ ॥
प्रगुणेऽपि क्षणेऽपि स्यादीरणं शून्य ऊषरे ॥
ग्रहणं तूपलब्धौ स्यादादरे ग्रहणं करे ॥ ४० ॥
ग्रहोपरागस्वीकारबन्दिषु ग्रहणं मतम् ॥
ईक्षणं दर्शने दृष्टौ प्रोक्षणं सेचने वधे ॥ ४१ ॥
लक्षणं नाम्नि चिह्ने च सौमित्रे चाऽपि लक्षणः ॥
लक्ष्मणं लाञ्छने नाम्नि रामभ्रातरि लक्ष्मणः ॥ ४२ ॥
लक्ष्मणौषधिसारस्योः सश्रीके चाभिधेयवत् ॥

दक्षिणः सरलावामपरच्छन्दानुवर्त्तिषु ॥ ४३ ॥
वाच्यवद्दक्षिणावाची यज्ञदानप्रतिष्ठयोः ॥
द्रविणं काञ्चने वित्ते द्रविणश्च पराक्रमे ॥ ४४ ॥
मसृणः कर्कशे स्निग्धे क्षुमायां मसृणा भवेत् ॥
ऊषणं मरिचे ख्यातं कणायामूषणा भवेत् ॥ ४५ ॥
धिषणस्त्रिदशाचार्य्ये धिषणा धियि सम्मता ॥
धर्षणं स्यात् परिभवे रतेऽसत्यां तु धर्षणी ॥ ४६ ॥
भीषणो दारुणे रुद्रे भीषणं सल्लकीरसे ॥
हरणं यौतुकद्रव्ये भुजेऽपि हरणं हृतौ ॥ ४७ ॥
हिरणं रेतसि स्वर्णे वराटे च हिरण्यवत् ॥
हरिणः स्यात् कुरङ्गेऽपि हरिणः पाण्डुरेऽन्यवत् ॥ ४८ ॥
हरिणी हरितायाञ्च चारुस्त्रीवृत्तभेदयोः ॥
सुवर्णप्रतिमायाञ्च हर्षणोऽक्षिरुगन्तरे ॥ ४९ ॥
हर्षके योगभेदे च श्राद्धदेवेऽपि क्वचित् ॥
श्रवणं स्याद् वृक्षभेदे श्रवणं श्रुतिकर्णयोः ॥ ५० ॥
श्रावणो मासपाषण्डे दध्याल्यां श्रावणी मता ॥
श्रमणो यतिभेदेऽपि श्रमणो निन्द्यजीविनि ॥ ५१ ॥
सुदर्शनामुण्डतिकामांसीषु श्रमणां विदुः ॥
कल्याणमक्षये स्वर्णे कल्याणं मङ्गलेऽपि च ॥ ५२ ॥
कृपाणोऽसौ कृपाणी तु छुरिकायां च कर्त्तरौ ॥
सिंहाणं काचपात्रे च लोहनासिकयोर्मले ॥ ५३ ॥
पुराणं वाच्यवत् प्रत्ने पुराणं पञ्चलक्षणे ॥
प्रमाणं नित्यमर्यादासत्यवादिप्रमातृषु ॥ ५४ ॥
एकतायामियत्तायां हेतुशास्त्रेषु च स्मृतम् ॥
निर्याणं वानरापाङ्गदेशे मोक्षे च निर्गमे ॥ ५५ ॥

निर्माणं निर्मितौ सारे निर्माणश्च समञ्जसे ॥
निर्वाणमस्तङ्गमने निर्वृतौ गजमज्जने ॥ ५६ ॥
अपवर्गे च कुर्वाणे भृत्यकारकयोरपि ॥
दौर्वाणं नष्टपर्णे स्याद् दूर्वायाः स्वरसेऽपि च ॥ ५७ ॥
वारणं प्रतिषेधे स्याद्वारणस्तु मतङ्गजे ॥
कारणं करणे हेतुबन्धयोरपि कारणम् ॥ ५८ ॥
कारणा यातनायाञ्च कृपणः कुत्सिते कृमौ ।
कार्म्मणं मन्त्रतन्त्रादियोजने कर्म्मकारके ॥ ५९ ॥
मार्गणं प्रार्थनेऽन्वेषे मार्गणो याचके सरे ॥
मत्कुणो निर्विषाणेभे निःश्मश्रुपुरुषेऽपि च ॥ ६० ॥
उद्दंशे नारिकेले च धर्म्मणोऽहिद्रुभेदयोः ॥
कोङ्कणो देशभेदे स्याच्छस्त्रभेदे तु कोङ्कणम् ॥ ६१ ॥
कङ्कणं शेखरे हस्तसूत्रमण्डनयोरपि ॥
पूरणः पूरके पिष्टभेदे पूरणमिष्यते ॥ ६२ ॥
पटारम्भकसूत्रे च शाल्मली पूरणी मता ॥
सुषेणः करमर्देऽपि विष्णुसुग्रीववैद्ययोः ॥ ६३ ॥
रोषणः पारदे हेमघर्षणोपलयोस्तथा ॥
रोषणेऽपि विषाणन्तु क्रोडद्विरददन्तयोः ॥ ६४ ॥
पशोः शृङ्गे विषाणा तु मेषशृङ्ग्यां प्रकीर्त्तिता ॥
करेणुर्गजहस्तिन्योः कर्णिकारेऽपि च क्वचित् ॥ ६५ ॥
हरेणुस्तु सतीले स्याद्रेणुकाकुलयोषितोः ॥
सुवर्णं स्वर्णमात्रे स्यात् सुवर्णं कर्षबिस्तयोः ॥ ६६ ॥
सुवर्णश्च सुवर्णालुकृष्णागुरुमखान्तरे ॥
सुपर्णस्ताम्रचूडे स्याद्गरुडे कृतमालके ॥ ६७ ॥
सुपर्णा कमलिन्याञ्च सुपर्णा तार्क्ष्यमातरि ॥

श्रीपर्णमग्निमन्थेऽब्जे श्रीपर्णी शाल्मलौ हठे ॥ ६८ ॥
दुर्वर्णश्च कुवर्णे स्याद्वास्तुके रजतेऽपि च ॥
पत्रोर्णं धौतकौषेये पत्रोर्णः शोणकेऽपि च ॥ ६९ ॥
सङ्कीर्णं निचिते प्रोक्तमशुद्धे चापि भेद्यवत् ॥
गोकर्णोऽश्वतरे सर्पे सारङ्गे प्रमथान्तरे ॥ ७० ॥
अङ्गुष्ठानामिकोन्माने गोकर्णी मूर्विकौषधौ ॥
अरणिर्वह्निमन्थेऽपि स्मृतो निर्म्मन्थ्यदारुणि ॥ ७१ ॥
तरणिस्तरणे भानौ कुमार्योषधिनौकयोः ॥
विपणिः पण्यवीथ्याश्च भवेदापणपण्ययोः ॥ ७२ ॥
प्रवेणिर्वेणिकुथयोः सरणिः पङ्क्तिवर्त्मनोः ॥
निःश्रेणिस्त्वधिरोहिण्यां खर्ज्जूरीपादपेऽपि च ॥ ७३ ॥
भरणी शोणके ऋक्षे भरणं वेतने भृतौ ॥
भ्रमणी कारुण्डिकायां क्रीडाद्यायामधीशितुः ॥ ७४ ॥
ग्रामणीर्भोगिके पत्यौ प्रधाने नापितेऽपि च ॥
ग्रामणी नीलिकायाश्च ग्रामेयीपण्ययोषितोः ॥ ७५ ॥
धारणी नाडिकायां स्याद्बुद्धोक्तमन्त्रभिद्यपि ॥
इन्द्राणी करणे स्त्रीणां पौलोमीसिन्धुवारयोः ॥ ७६ ॥
एषणी व्रणमार्गानुसारिण्याश्च तुलाभिदि ॥
क्षेपणी जालभेदे स्यान्नौकादण्डे च कथ्यते ॥ ७७ ॥
वारुणी गण्डदूर्वायां प्रतीचीसुरयोरपि ॥
सारणी स्वल्पसरिते प्रसारण्याश्च सारणी ॥ ७८ ॥
सारणः स्यादतीसारे सचिवे रावणस्य च ॥
काकिणी पणतुर्यांशे मानदण्डे च काकिणी ॥ ७९ ॥
कृष्णलैकवराट्योः स्यादुदमानांशकेऽपि च ॥
ब्राह्मणी पञ्जिकास्पृक्काद्विजपत्नीषु विश्रुता ॥ ८० ॥

विप्रे तु ब्राह्मणो वेदे ब्राह्मणं द्विजसंहतौ ॥
पक्षिणी पूर्णिमायां स्यात् पक्षिणी शाकिनीभिदि ॥८१॥
आगामिवर्त्तमानाहर्युक्तायां निशि पक्षिणी ॥
रोहिणी कटुरोहिण्यां रोहिणी लोहितागवोः ॥ ८२ ॥
कण्ठरोगान्तरेभे च सोमवल्के च रोहिणी ॥

णचतुष्कम् ॥

आतर्पणञ्च सौहित्ये विद्यादालिम्पनेऽपि च ॥ ८३ ॥
आथर्वणोऽप्यथर्वज्ञे ब्राह्मणेऽपि पुरोधसि ॥
आरोहणं स्यात् सोपाने समारोहे प्ररोहणे ॥ ८४ ॥
रक्तरेणुस्तु सिन्दूरे पलाशकलिकोद्गमे ॥
उत्क्षेपणन्तु व्यजने धान्यमर्द्दनवस्तुनि ॥ ८५ ॥
उद्धरणं समुद्धारवान्तान्नोन्मूलनेष्वपि ॥
निगरणं भोजनेऽपि गले निगरणो मतः ॥ ८६ ॥
निःशरणं स्यान्मरणोपायनिर्याणमुक्तिषु ॥
संसरणं रणारम्भे पुरनिर्गमगोपुरे ॥ ८७ ॥
घण्टापथे च संसारेऽप्यसम्बाधचमूगतौ ॥
निस्तरणं स्यादुपाये निस्तारे निर्गमेऽपि च ॥ ८८ ॥
विदारणं रणे भेदे विडम्बे च विदारणम् ॥
निरूपणं स्यादालोके विचारे च निदर्शने ॥ ८९ ॥
नारायणोऽच्युतेऽभीरुगौर्य्योर्नारायणीं विदुः ॥
परायणमभीष्टे स्यात् तत्पराश्रययोरपि ॥ ९० ॥
पारायणं समासङ्गे कात्स्न्यें पारगतावपि ॥
कार्षापणः कार्षिके स्यात् पणषोडशकेऽपि च ॥ ९१ ॥
कामगुणः स्मृतो रागे विषयाभोगयोरपि ॥
परीरणः स्यात् कमठे दण्डे च पट्टशाटके ॥ ९२ ॥

समीरणः स्यात् पवने पथिके च फणिज्झके ॥
पर्वरीणस्तु पर्णस्य शिरायां द्यूतकम्बले ॥ ९३ ॥
पर्णवृन्तरसेऽपि स्यात् पर्वरीणश्च पर्वणि ॥
तण्डुरीणः कीटमात्रे वर्वरे तण्डुलोदके ॥ ९४ ॥
मीनाम्रीणो दर्दुराम्रे [illegible]श्च खञ्जने ॥
प्रवारणं निषेधे स्यात् काम्यदाने प्रवारणम् ॥ ९५ ॥
जुहुराणोऽनलेऽध्वर्यौ रेरिहाणो हरेऽम्बरे ॥
देवमणिः शिवेऽश्वस्य कण्ठावर्त्ते च कौस्तुभे ॥ ९६ ॥
चूडामणिः शिरोरत्ने काकचिञ्चाफलेऽपि च ॥
परवाणिः स्मृतो धर्म्माध्यक्षवत्सरयोरपि ॥ ९७ ॥
शर[illegible]णिः शरमुखे षाण्डकये शरजीविनि ॥
लम्बकर्णः स्मृतः कोलपादपे छगलेऽपि च ॥ ९८ ॥
रागचूर्णः स्मरे दन्तधावने रक्तवालुके ॥
हस्तिकर्णोऽरुबूके स्यात् पलाशगणभेदयोः ॥ ९९ ॥
चीर्णपर्णस्तु निम्बे स्यात् खर्ज्जूरीभूरुहेऽपि च ॥
तैलपर्णी मलयजे श्रीवासे सिह्लकेऽपि च ॥ १०० ॥
पीलुपर्णी तु बिम्बायां मूर्वायामोषधीभिदि ॥
दाक्षायणी त्वपर्णायां रोहिण्यां तारकासु च ॥ १०१ ॥
पुष्करिणी सरोजिन्यां हस्तिन्याञ्च जलाशये ॥
शिखरिणी स्याद्रोमाल्यां रसालावृत्तभेदयोः ॥ १०२ ॥
स्त्रीरत्ने मल्लिकायाञ्च प्रोक्ता शिखरिणी बुधैः ॥
अङ्गारिणी हसन्त्याञ्च भास्करत्यक्तदिश्यपि ॥ १०३ ॥
भवेद्वैतरणी नद्यां प्रेतानां यातुमातरि ॥

णपञ्चकम् ॥

अवग्रहणमित्याहुः प्रतिरोधेऽप्यनादरे ॥ १०४ ॥

प्रविदारणमाख्यातं सङ्गरे च विदारणे ॥
अवतारणं भूतादिग्रहे वस्त्राञ्चलेऽर्चने ॥ १०५ ॥
रोमहर्षणमित्येतद् रोमाञ्चेऽपि बिभीतके ॥
परिभाषणमालापे नियमे परिभाषणम् ॥ १०६ ॥
निन्दोपालम्भवचने परिभाषणमिष्यते ॥
मत्तवारणमिच्छन्ति दानक्लिन्नकटद्विपे ॥ १०७ ॥
महाप्रासादवीथीनां वरण्डे चाप्यपाश्रये ॥
वातरायणमुन्मत्ते निष्प्रयोजनपूरुषे ॥ १०८ ॥
काण्डे च करपत्रे च कूटे च शरसङ्क्रमे ॥
मण्डूकपर्णोऽरलुके शोणके च कपीतने ॥ १०९ ॥
मण्डूकपर्णी मञ्जिष्ठाब्राह्मीगोजिह्वकासु च ॥

णषट्कम् ॥

दोहदलक्षणं गर्भे वयःसन्धौ च दृश्यते ॥
यौवनलक्षणाऽभिख्यालावण्ये च पयोधरे ॥ ११० ॥

इति णान्तवर्गः ॥

—:०:—

तद्विकम् ॥

ततं विततवद्व्याप्ते विस्तृते वाच्यवन्मतम् ॥
ततं वीणादिवाद्ये च पवमाने ततः पुनः ॥ १ ॥
इतं गते स्याद्विज्ञाते रतं सुरतगुह्ययोः ॥
ऋतमुञ्छशिले तोये दीप्ते सत्येऽभिपूजिते ॥ २ ॥
कृतं युगेऽपि पर्याप्ते विहिते हिंसिते फले ॥
घृतमाज्ये प्रदीप्ते च सलिले च घृतं मतम् ॥ ३ ॥
मृतं स्याद्याचिते मृत्यौ मृत्युमत्यभिधेयवत् ॥
गतन्तु यात्राधिगते मतं पूजितसन्धिते ॥ ४ ॥

धुतं त्यक्ते विधूते च धूतं कम्पितभर्त्सिते ॥
पूतं पवित्रे रटिते पूतश्च बहुलीकृते ॥ ५ ॥
श्रुतं शास्त्रावधृतयोः पोतमोतप्रसूतयोः ॥
नतं स्याद्वाच्यवन्नम्रे नतस्तगरपादपे ॥ ६ ॥
द्रुतं शीघ्रे विलीने च विद्रावे चाभिधेयवत् ॥
युतं हस्तचतुष्के स्याद्युतं युक्ते युतं पृथक् ॥ ७ ॥
स्थितं भवेद्गत्यभावे सुप्रतिज्ञे सुनिश्चिते ॥
सितः समाप्ते धवले निबद्धज्ञातयोरपि ॥ ८ ॥
शितं शातश्च निशिते कृशे शान्तश्च शर्मणि ॥
हितं धृते गते पथ्ये सुतः पार्थिवपुत्रयोः ॥ ९ ॥
प्लुतं तुरङ्गमगतौ प्लुतमाहुस्त्रिमात्रके ॥
प्रोतन्तु गुम्फिते वस्त्रे प्रेतो भूतान्तरे मृते ॥ १० ॥
सूतस्तु सारथौ ताक्ष्ण प्रसूते प्रेरितेऽपि च ॥
क्षत्रियाद् ब्राह्मणीजेऽपि सूतः पारदबन्दिनोः ॥ ११ ॥
श्वेतं रूप्येऽन्यवच्छुक्ले श्वेतो द्वीपाद्रिभेदयोः ॥
श्वेता वराटिका काष्ठपाटलीशङ्खिनीषु च ॥ १२ ॥
सत् प्रशस्ते विद्यमाने सत्याभिहितसाधुषु ॥
सती पतीव्रतागौर्योरेतः कर्बूर आगते ॥ १३ ॥
तातोऽनुकम्प्ये जनके जातं जात्योघजन्मसु ॥
पातः स्यात् पतने त्राते घातः काण्डप्रहारयोः ॥ १४ ॥
पोतः शिशौ वहित्रे च लते श्मश्रुणि चोरिते ॥
गीतन्तु शब्दिते गाने प्रीतं हृषितनर्मणोः ॥ १५ ॥
वीतश्चासारहस्त्यश्वे वीतमङ्कुशकर्मणि ॥
भीतं भये भययुते वाच्यवत् परिकीर्त्तितम् ॥ १६ ॥
भूतं क्ष्मादौ पिशाचादौ न्याय्ये सत्योपमानयोः ॥

प्रविदारणमाख्यातं सङ्गरे च विदारणे ॥
अवतारणं भूतादिग्रहे वस्त्राञ्चलेऽर्चने ॥ १०५ ॥
रोमहर्षणमित्येतद् रोमाञ्चेऽपि बिभीतके ॥
परिभाषणमालापे नियमे परिभाषणम् ॥ १०६ ॥
निन्दोपालम्भवचने परिभाषणमिष्यते ॥
मत्तवारणमिच्छन्ति दानक्लिन्नकटद्विपे ॥ १०७ ॥
महाप्रासादवीथीनां वरण्डे चाप्यपाश्रये ॥
वातरायणमुन्मत्ते निष्प्रयोजनपूरुषे ॥ १०८ ॥
काण्डे च करपत्रे च कूटे च शरसङ्क्रमे ॥
मण्डूकपर्णोऽरलुके शोणके च कपीतने ॥ १०९ ॥
मण्डूकपर्णी मञ्जिष्ठाब्राह्मीगोजिह्वकासु च ॥

णषट्कम् ॥

दोहदलक्षणं गर्भे वयःसन्धौ च दृश्यते ॥
यौवनलक्षणाऽभिख्यालावण्ये च पयोधरे ॥ ११० ॥

इति णान्तवर्गः ॥

—:०:—

तद्विकम् ॥

ततं विततवद्व्याप्ते विस्तृते वाच्यवन्मतम् ॥
ततं वीणादिवाद्ये च पवमाने ततः पुनः ॥ १ ॥
इतं गते स्याद्विज्ञाते रतं सुरतगुह्ययोः ॥
ऋतमुञ्छशिले तोये दीप्ते सत्येऽभिपूजिते ॥ २ ॥
कृतं युगेऽपि पर्याप्ते विहिते हिंसिते फले ॥
घृतमाज्ये प्रदीप्ते च सलिले च घृतं मतम् ॥ ३ ॥
मृतं स्याद्याचिते मृत्यौ मृत्युमत्यभिधेयवत् ॥
गतन्तु यात्राधिगते मतं पूजितसन्धिते ॥ ४ ॥

धुतं त्यक्ते विधूते च धूतं कम्पितभर्त्सिते ॥
पूतं पवित्रे रटिते पूतश्च बहुलीकृते ॥ ५ ॥
श्रुतं शास्त्रावधृतयोः पोतमोतप्रसूतयोः ॥
नतं स्याद्वाच्यवन्नम्रे नतस्तगरपादपे ॥ ६ ॥
द्रुतं शीघ्रे विलीने च विद्रावे चाभिधेयवत् ॥
युतं हस्तचतुष्के स्याद्युतं युक्ते युतं पृथक् ॥ ७ ॥
स्थितं भवेद्गत्यभावे सुप्रतिज्ञे सुनिश्चिते ॥
सितः समाप्ते धवले निबद्धज्ञातयोरपि ॥ ८ ॥
शितं शातश्च निशिते कृशे शान्तश्च शर्मणि ॥
हितं धृते गते पथ्ये सुतः पार्थिवपुत्रयोः ॥ ९ ॥
प्लुतं तुरङ्गमगतौ प्लुतमाहुस्त्रिमात्रके ॥
प्रोतन्तु गुम्फिते वस्त्रे प्रेतो भूतान्तरे मृते ॥ १० ॥
सूतस्तु सारथौ ताक्ष्ण प्रसूते प्रेरितेऽपि च ॥
क्षत्रियाद् ब्राह्मणीजेऽपि सूतः पारदबन्दिनोः ॥ ११ ॥
श्वेतं रूप्येऽन्यवच्छुक्ले श्वेतो द्वीपाद्रिभेदयोः ॥
श्वेता वराटिका काष्ठपाटलीशङ्खिनीषु च ॥ १२ ॥
सत् प्रशस्ते विद्यमाने सत्याभिहितसाधुषु ॥
सती पतीव्रतागौर्योरेतः कर्बूर आगते ॥ १३ ॥
तातोऽनुकम्प्ये जनके जातं जात्योघजन्मसु ॥
पातः स्यात् पतने त्राते घातः काण्डप्रहारयोः ॥ १४ ॥
पोतः शिशौ वहित्रे च लते श्मश्रुणि चोरिते ॥
गीतन्तु शब्दिते गाने प्रीतं हृषितनर्मणोः ॥ १५ ॥
वीतश्चासारहस्त्यश्वे वीतमङ्कुशकर्मणि ॥
भीतं भये भययुते वाच्यवत् परिकीर्त्तितम् ॥ १६ ॥
भूतं क्ष्मादौ पिशाचादौ न्याय्ये सत्योपमानयोः ॥

भूतो देवलके प्रा: वृत्तयोरभिधेयवत् ॥ १७ ॥
केतुर्द्युतौ पताकायां ग्रहोत्पातारिलक्ष्मसु ॥
सेतुरालौ च वरुणे क्रतुर्यज्ञे मुनेर्भिदि ॥ १८ ॥
धातुः स्यादश्मविकृतौ विषयेष्विन्द्रियेषु च ॥
भूवादिरसरक्तादिश्लेष्मादिवसुधादिषु ॥ १९ ॥
वर्त्तते धातुशब्दोऽयं विशेषादस्थ्नि गैरिके ॥
ऋतुः स्त्रीकुसुमे मासि वसन्तादिषु धारयोः ॥ २० ॥
गातुः पुंस्कोकिले भृङ्गे गन्धर्वे रोषणेऽपि च ॥
मन्तुः स्यादपराधेऽपि मनुष्येऽपि प्रजापतौ ॥ २१ ॥
धूर्त्तः स्यात् खण्डलवणे खलधुत्तूरयोरपि ॥
पूर्त्तस्तु पूरिते छन्ने पूर्त्तं खातादिकर्मणि ॥ २२ ॥
मूर्त्तं मूर्त्तिमित प्रोक्तं मूर्च्छाले कठिनेऽपि च ॥
गर्त्तास्त्रिगर्त्तभेदे स्यादवटे च कुकुन्दरे ॥ २३ ॥
आप्तः सभ्ये च लब्धे च प्राप्तं वित्ते समञ्जसे ॥
व्याप्तं ख्याते समाक्रान्ते गुप्तं रक्षितगूढयोः ॥ २४ ॥
लिप्तं विषाप्ते गुप्ते च वाच्यवत् स्याद्विलेपिते ॥
दीप्तं निर्भासिते दग्धे वदन्ति ज्वलितेऽपि च ॥ २५ ॥
अस्तं क्षिप्ते गते प्रोक्तमस्तः पश्चिमभूधरे ॥
ग्रस्तं ग्रासीकृतेऽपि स्याल्लुप्तवर्णपदोदिते ॥ २६ ॥
पुस्तन्तु पुस्तके लेख्यकर्मविज्ञानयोरपि ॥
शस्तं क्षेमे प्रशस्ते च व्यस्तं व्याप्ते च सङ्कुले ॥ २७ ॥
हस्तो नक्षत्रभेदे स्यात् करेभकरयोरपि ॥
कचात्परः कलापार्थे सप्रकोष्ठे तताङ्गुलौ ॥ २८ ॥
वित्तं ख्याते धने लब्धे वित्तं ज्ञाते विचारिते ॥
कृत्तन्तु चेष्टिते छिन्ने दत्तं विश्राणितेऽर्चिते ॥ २९ ॥

वृत्तोऽतीते दृढे ख्याते वर्त्तुलेऽपि वृते मृते ॥
वाच्यवद्वर्त्तते वृत्तं चरित्रच्छन्दसोरपि ॥ ३० ॥
अन्तः प्रान्तेऽन्तिके नाशे स्वरूपेऽतिमनोहरे ॥
वृन्तं प्रसवबन्धे स्याद्घटधाराकुचाग्रयोः ॥ ३१ ॥
दन्तो निकुञ्जे दशने दन्तः सानुनि कथ्यते ॥
दन्ती स्यादोषधीभेदे कान्तचेतसि गह्वरे ॥ ३२ ॥
कुन्तः प्रासे चण्डभावे क्षुद्रजन्तौ गवेधुके ॥
कुन्ती पाण्डुप्रियायाञ्च शल्लक्यां गुग्गुलुद्रुमे ॥ ३३ ॥
कान्तोऽश्मनि गृहे चारौ कान्तानुफलिनीस्त्रियोः ॥
शान्तो रसविशेषे स्याददतिभुक्तकदान्तयोः ॥ ३४ ॥
उक्तमेकाक्षरं छन्दस्युक्तं स्याद्भाषितेऽपि च ॥
शुक्तोऽम्ले परुषे पूते व्यक्तं स्फुटमनीषिणोः ॥ ३५ ॥
तिक्तो रसे सुगन्धे च तिक्तं पर्पटके स्मृतम् ॥
तिक्ता तु कटुरोहिण्यां रिक्तं काननशून्ययोः ॥ ३६ ॥
रक्तं स्यात् कुङ्कुमे ताम्रे प्रचीनामलकेऽसृजि ॥
अनुरागिणि नील्यादिरञ्जिते लोहितेऽन्यवत् ॥ ३७ ॥
यन्ता हस्तिपके सूते वप्ता पितरि पावके ॥
त्रेता युगेऽग्नित्रितये भर्त्ता स्वामिनि धारके ॥ ३८ ॥
शास्ता च शासके बुद्धे वक्ता वाग्मिनि पण्डिते ॥
मुक्ता तु मौक्तिके मुक्तः प्राप्तमुक्ते च मोचने ॥ ३९ ॥
क्षत्ता शूद्रात् क्षत्रियाजे प्रतीहारे च सारथौ ॥
भुजिष्यतनये क्षत्ता नियुक्ते च प्रजासृजि ॥ ४० ॥
धाता हिरण्यगर्भे स्यात् पालके त्वभिधेयवत् ॥
माता कात्याप्रसूगोषु ब्रह्मण्याद्यास्तु मातरः ॥ ४१ ॥
लता ज्योतिष्मती स्पृक्का शाखावल्लीप्रियङ्गुषु ॥

लताकस्तूरिकायाञ्च माधवीदूर्वयोरपि ॥ ४२ ॥
लूता पिपीलिकायां स्यादूर्णनाभे गदान्तरे ॥
पीता स्मृता हरिद्रायां पीतं स्याद्गौरपीतयोः ॥ ४३ ॥
सीता रामकलत्रे स्यात् तथा लाङ्गलपद्धतौ ॥
नभोनद्याञ्च शीतस्तु वानीरबहुवारयोः ॥ ४४ ॥
शीतं हिमगुणे प्रोक्तं वाच्यवच्छीतलेऽलसे ॥
चिता च्छन्ने चुल्लिकायां चिता संहतिचिन्तयोः ॥ ४५ ॥
वार्त्ता वातिङ्गणे वृत्तौ वार्त्ता कृष्याद्युदन्तयोः ॥
वृत्तिमन्नीरजोर्वार्त्ता वार्त्तमारोग्यफल्गुनोः ॥ ४६ ॥
गतिर्मार्गे दशायांञ्च ज्ञाने यात्राभ्युपाययोः ॥
नाडीव्रणसरण्याञ्च मतिर्हीच्छास्मृतिष्वपि ॥ ४७ ॥
चितिः समूहे चिन्तायां दितिः स्यात् खण्डने दितौ ॥
पतिः प्रभौ गतौ मूले दृतिश्चर्म्मपुटे झषे ॥ ४८ ॥
यतिर्निकारे यतिनि पाठच्छेदक्रमे यतिः ॥
शितिः कृष्णे शितिर्भूर्ज्जे भृतिर्भरणमूल्ययोः ॥ ४९ ॥
क्षितिर्निवासे मेदिन्यां स्थानमात्रेऽपि च क्षितिः ॥
धृतिर्योगान्तरे धैर्ये धारणाध्वरतुष्टिषु ॥ ५० ॥
श्रुतिः श्रोत्रे तथाऽऽम्नाये वार्त्तायां श्रोत्रकर्मणि ॥
स्मृतिरिच्छाधियोर्धर्मसंहितायामपि स्मृतिः ॥ ५१ ॥
रतिः स्मरप्रियायाञ्च रागे च रमणे रतिः ॥
ऋतिर्गतौ जुगुप्सायां स्पर्द्धामङ्गलयोरपि ॥ ५२ ॥
वृत्तिः स्याद्वरणे वाटे सृतिर्गगनमार्गयोः ॥
मितिर्मानेऽप्यवच्छेदे कृतिः करणहिंसयोः ॥ ५३ ॥
ईतिः प्रवासे डिम्बे स्यादतिवृष्ट्यादिषट्सु च ॥
वीतिर्गतौ च दीप्तौ च धावने प्रजनेऽशने ॥ ५४ ॥

गीतिश्छन्दसि गाने च नीतिस्तु प्रापणे नये ॥
रीतिः प्रसारे स्यन्दे च लोहाकिट्टारकूटयोः ॥ ५५ ॥
पीतिः पाने तुरङ्गे च भीतिः साध्वसकम्पयोः ॥
प्रीतिर्योगान्तरे प्रेम्णि स्मरपत्नीप्रमोदयोः ॥ ५६ ॥
भूतिर्मातङ्गशृङ्गारे जातौ भस्मनि सम्पदि ॥
स्यूतिः सीवनसन्तत्योरूतिः स्यूतौ च रक्षणे ॥ ५७ ॥
हेतिः स्यादायुधे ज्वाले हेतिस्तरणितेजसि ॥
वृत्तिर्विवरणे जीव्ये कौशिक्यादिषु चेष्यते ॥ ५८ ॥
कृत्तिश्चर्मत्वचो भूर्ज्जे कृत्तिकायाश्च कीर्त्तिता ॥
पत्तिः पदातौ गमने वीरसैन्यप्रभेदयोः ॥ ५९ ॥
वित्तिर्ज्ञाने विचारे च लाभसम्भवयोरपि ॥
भित्तिः कुड्ये प्रदेशे च संविभागावकाशयोः ॥ ६० ॥
आप्तिः संवरणप्राप्त्योः प्राप्तिर्लाभे महोदये ॥
गुप्तिः कारागृहे प्रोक्ता भूगर्त्ते रक्षणे यमे ॥ ६१ ॥
सुप्तिः स्पर्शज्ञतायाश्च स्वापे विश्रम्भघातिनि ॥
शान्तिः शमेऽपि कल्याणे कान्तिः शोभाभिलाषयोः ॥६२॥
जातिश्छन्दसि सामान्ये मालत्यां गोत्रजन्मनोः ॥
जातिर्जातीफले धात्र्यां चुल्लीकाम्पिल्लयोरपि ॥ ६३ ॥
ज्ञातिः सगोत्रे पितरि व्याप्तिर्व्यापनलम्भयोः ॥
सातिर्दानेऽवसाने च प्राप्तिः पूर्त्तिप्रदेशयोः ॥ ६४ ॥
वर्त्तिर्दीपदशादीपगात्रानुलेपनीषु च ॥
वर्त्तिर्भेषजनिर्म्माणनयनाञ्जनलेखयोः ॥ ६५ ॥
आर्त्तिः पीडाधनुष्कोट्योर्मूर्त्तिः काठिन्यकाययोः ॥
कीर्त्तिः प्रसादयशसोर्विस्तारे कर्दमेऽपि च ॥ ६६ ॥
भ्रान्तिर्मिथ्यामतौ ख्याता भ्रमणे चाऽनवस्थितौ ॥

नृतिः क्रमौ नर्त्तने च सन्नः सरिति वर्त्मनि ॥ ६७ ॥
भक्तिर्विभागे सेवायां पङ्क्तिर्गौरवपाकयोः ॥
मुक्तिः स्यान्मोचने मोक्षे युक्तिर्न्याये च योजने ॥ ६८ ॥
पङ्क्तिर्दशाक्षरच्छन्दोदशसङ्ख्यावलीष्वपि ॥
शक्तिर्बले प्रभावादौ शक्तिः प्रहरणान्तरे ॥ ६९ ॥
शुक्तिः कपालशकले नख्यश्वावर्त्तयोरपि ॥
मुक्तास्फोटे च दुर्नामा शङ्खशङ्खनखेषु च ॥ ७० ॥

तत्रिकम् ॥

अमृतं यज्ञशेषे स्यात् पीयूषे सलिले घृते ॥
अयाचिते च मोक्षे च धन्वन्तरिसुपर्वणोः ॥ ७१ ॥
स्यादमृतोऽमृतापथ्यागुडूच्यामलकीषु च॥
अनृतं कृषावसत्येऽप्याजितः कमलापतौ ॥ ७२ ॥
अनिर्ज्जिते चाच्युतस्तु स्थिरे स्याद्गरुडध्वजे ॥
आर्द्दितं याचिते ज्ञेयं वातव्याधौ च हिंसिते ॥ ७३ ॥
अक्षतश्चापि लाजेषु तृतीयप्रकृतावपि ॥
अहिंसितेऽपि चापातस्तदात्वे पतनेऽपि च ॥ ७४ ॥
आघ्रातं शिङ्घिते क्रान्तेऽप्याख्यातं भाषिते तिङि ।
आध्मातं पवनव्याधौ दग्धशब्दितयोरपि ॥ ७५ ॥
आप्लुतः स्नातके स्नातेऽप्याहृतः सादरेऽर्चिते ॥
आचितः शकटोन्मेये पलानामयुतद्वये ॥ ७६ ॥
छन्नेऽपि सङ्गृहीते स्यादाहतन्तु मृषार्थके ॥
आहतं गुणितेऽपि स्यात् ताडिते नामितेऽपि च ॥ ७७ ॥
स्यात् पुरातनवस्त्रे च नूतनवस्त्रे त्वाहतम् ॥
आनर्त्तो देशभेदे स्यान्नृत्यस्थाने जने रणे ॥ ७८ ॥
आवर्त्त आवर्त्तने स्याच्चिन्तने चाम्भसाम्भ्रमे ॥

संवर्त्तः प्रलये प्रोक्तो विभीतकतरावपि ॥ ७९ ॥
त्रिगर्त्तः स्याज्जनपदे त्रिगर्त्तो गणितान्तरे ॥
भवेद् घर्घरिकायान्तु त्रिगर्त्ता कामुकस्त्रियाम् ॥ ८० ॥
विवर्त्तः समुदाये स्यादपवर्त्तननृत्ययोः ॥
उत्तप्तं शुष्कमांसेऽपि सन्तप्ते च परिप्लुवे ॥ ८१ ॥
उचितं प्रोक्तमभ्यस्ते मिते ज्ञाते समञ्जसे ॥
उद्वृत्तं स्यादुत्तुलिते परिमुक्तोज्झितेऽपि च ॥ ८२ ॥
उत्थितं वृद्धियुक्ते च प्रोद्यतोत्पन्नयोरपि ॥
उषितं व्युषिते दग्धे मुषितं खण्डिते हृते ॥ ८३ ॥
उद्घातः कथ्यते पादस्खलने समुपक्रमे ॥
पवनाभ्यासयोगस्य कुम्भकादित्रयेऽपि च ॥ ८४ ॥
उत्तुङ्गे मुद्गरेऽपि स्यादुदितं प्रोक्त उद्गते ॥
स्यादुच्छ्रितन्तु सञ्जाते समुन्नद्धप्रवृद्धयोः ॥ ८५ ॥
रजतं विशदे दन्तिदन्तयोस्तारहारयोः ॥
सुरतं स्यान्निधुवने देवत्वे सुरता मता ॥ ८६ ॥
प्रहतं विजिते क्षुण्णे संहतं संहते दृढे ॥
रसितन्तु सुवर्णादिखचिते स्तनिते रुते ॥ ८७ ॥
पलितं शैलजे तापे पाण्डुकेशे च कर्दमे ॥
ललितं हारभेदे स्यादीप्सिते ललितेऽपि च ॥ ८८ ॥
स्खलितं चलिते भ्रंशे कलितं विदिताप्तयोः ॥
ज्वलितं भास्वरे दग्धे त्वरितं प्रजवे द्रुते ॥ ८९ ॥
स्तिमितोऽचञ्चलक्लिन्ने हंसितं क्षिप्तदग्धयोः ॥
सुहितोऽतिहिते तृप्ते मूर्च्छितं सोच्छ्रये दृढे ॥ ९० ॥
हृषितं विस्मिते प्रीते प्रणते हृष्टरोमणि ॥
गर्ज्जितो मत्तमातङ्गे गर्ज्जितं जलदध्वनौ ॥ ९१ ॥

वर्द्धितं प्रसुते च्छिन्ने पूरिते चापि वर्द्धितम् ॥
स्थापितं निश्चिते न्यस्ते चेङ्गितं गतिचेष्टयोः ॥ ९२ ॥
वेष्टितं रसके रुद्धे स्त्रीणाञ्च करणान्तरे ॥
भावितं वासिते प्राप्ते विदितं विदितार्थयोः ॥ ९३ ॥
वेल्लितं कुटिले प्रोक्तं वाच्यवद्विधृते प्लुते ॥
ग्रथितं गुम्फिताक्रान्तहिंसितेषु समीरितम् ॥ ९४ ॥
प्रथितं निर्ज्जलोदश्वित्यालोडितानिघृष्टयोः ॥
प्रार्थितं याचिते शत्रुसंरुद्धेऽभिहितेऽपि च ॥ ९५ ॥
जृम्भितं करणे स्त्रीणामीहास्फुटितयोरपि ॥
क्रन्दितं रुयातमाह्वाने क्रान्दितं रुदितेऽपि च ॥ ९६ ॥
प्रोक्षितं निहते क्षिप्ते वापितं मुण्डितं मतम् ॥
बीजाकृते दंशितस्तु दुष्टचर्म्मितयोरपि ॥ ९७ ॥
क्षारितः स्राविते सारे चाभिशस्ते च संशितः ॥
सुकृतश्च शुभे पुण्ये सुविधाने च वाच्यवत् ॥ ९८ ॥
निकृतं विप्रलब्धे स्यान्नीचे विप्रकृतेऽपि च ॥
विकृतौ संस्कृतेऽपि स्याद् बीभत्से रोगितेऽपि च ॥ ९९ ॥
संस्कृतः कृत्रिमे शस्ते भूषिते भेद्यवन्मतः ॥
संस्कृतं लक्षणोपेता प्रभूतं प्राज्य उद्गते ॥ १०० ॥
प्रसृतः सम्प्रसारे स्याद्विनीते विगतेऽपि च ॥
अर्द्धाञ्जलौ च प्रसृतं जङ्घायां प्रसृता मता ॥ १०१ ॥
सूनृतं मङ्गले सत्याप्रियवाचि च सूनृतम् ॥
प्रसूतं वाच्यवज्जाते प्रसूतं कुसुमेऽपि च ॥ १०२ ॥
विसृतं ज्ञातसंहृष्टप्रतीतेष्वभिधेयवत् ॥
निर्म्मुक्तस्त्यक्तसङ्गे स्यान्मुक्तकञ्चुकभोगिनि ॥ १०३ ॥
अव्यक्तः शङ्करे विष्णावव्यक्तं महदादिके ॥

आत्मन्यपि स्याद्व्यक्तमस्फुटे चाऽभिधेयवत् ॥ १०४ ॥
विविक्तं स्यादसम्पृक्ते विवेकान्वितपूतयोः ॥
वाच्यवद्दर्शितो धीरैर्विविक्तं रहसि स्मृतम् ॥ १०५ ॥
रोहितं रुधिरे धीर ऋजुशक्रशरासने ॥
रोहितो मानमृगयोर्भेदे रोहितकद्रुते ॥ १०६ ॥
लोहितं कङ्कुमे रक्ते गोशीर्षे च कुचन्दने ॥
लोहितः स्यान्नदे भौमे वर्णभेदे तु वाच्यवत् ॥ १०७ ॥
कुटितं स्याद्धस्तपुटे पाटितस्यूतयोरपि ॥
पीडितं बाधिते स्त्रीणां करणे चापि यन्त्रिते ॥ १०८ ॥
पिण्डितं गणिते सान्द्रे पण्डितः सल्लके कवौ ॥
हारीतः पक्षिभेदे स्यान्मुनिभेदेऽपि कैतवे ॥ १०९ ॥
प्रणीतः संस्कृते वह्नौ विहिते च प्रवेशिते ॥
निक्षिप्ते चोपसम्पन्ने प्रणीतो भेद्यवन्मतः ॥ ११० ॥
प्रतीतः सादरे ज्ञाते प्रख्यातः ख्यातहृष्टयोः ॥
वाच्यवत् स्यात् प्रमीतन्तु प्रोक्षितेऽपि मृतेऽपि च ॥१११॥
विनीतमुपनीते स्यादपनीते जितेन्द्रिये ॥
वाणिजे सुवहेऽश्वे च निभृते चाभिधेयवत् ॥ ११२ ॥
पृषतो हरिणे बिन्दौ पृषतश्चाश्वरोहिते ॥
भवेत् पृषादिव श्वेते बिन्दुयुक्ते तु वाच्यवत् ॥ ११३ ॥
भरतो वाद्यभेदेऽपि दौष्यन्तौ सञ्चरे नटे ॥
रामानुजे च भरतस्तन्तुवायेऽपि च क्वचित् ॥ ११४ ॥
भारतं ग्रन्थभेदे स्याज्जम्बूद्वीपेऽपि भारतम् ॥
भारती तु सरस्वत्यां पक्षिणीवृत्तिभेदयोः ॥ ११५ ॥
दुर्जातं व्यसने प्रोक्तमसम्यग्जातवस्तुनि ॥
परेतो भूतभेदे स्यात् परेतो वाच्यवन्मृते ॥ ११६ ॥

कपोतः पारावते स्यात् कवकाख्यविहङ्गमे ॥
कापोतमञ्जनेऽपि स्यात् कपोतानाञ्च संहतौ ॥ ११७ ॥
व्यायतं व्यापृते दीर्घे दृढे चातिशयेऽन्यवत् ॥
व्याघातो योगभेदे स्यादन्तरायप्रहारयोः ॥ ११८ ॥
सङ्घातः संहतौ घाते सङ्घातो नरकान्तरे ॥
रैवतस्तु सुवर्णालौ शैलभेदेऽपि शूलिनि ॥ ११९ ॥
स्यात् किरातस्तु भूनिम्बे म्लेच्छे चाल्पतनावपि ॥
मन्दाकिन्यां किराती स्यात् कुट्टिन्यामपि दृश्यते ॥१२०॥
आस्फीतश्चार्कपर्णे स्यादास्फीतः कोविदारके ॥
आस्फीता गिरिकर्ण्यां स्याद्वनमल्ल्याञ्च विश्रुता ॥१२१॥
उदात्तः स्वरभेदे स्यात् काव्यालङ्कारहृद्ययोः ॥
उदात्तो दातृमहतोर्निमित्तं हेतुलक्ष्मणोः ॥ १२२ ॥
उन्मत्त उन्मादवति धुत्तूरमुचुकुन्दयोः ॥
पर्वतः शैलदेवर्षौ प्रपातो निर्झरे भृगौ ॥ १२३ ॥
पर्याप्तन्तु यथेष्टे स्यात् तृप्तौ शक्ते निवारणे ॥
जीमूतः स्याद् धृतिकरे शक्रेऽद्रौ घोषके घने ॥ १२४ ॥
जीवातुर्जीविते भक्ते जीवातुर्जीवनौषधे ॥
एधतुः पुरुषे वह्नौ वाहेतुः पथिके वृषे ॥ १२५ ॥
विहस्तो विह्वले पण्डे पर्यस्तः पतिते हते ॥
आयस्तः स्तिमिते क्षिप्ते क्लेशिते कुपिते हते ॥ १२६ ॥
निरस्तः क्लेशितेषौ स्यान्निष्ठ्यूते त्वरितोदिते ॥
सन्त्यक्ते च प्रतिहते विश्वस्तो निभृते स्मृतः ॥ १२७ ॥
विश्वासयोगे विश्वस्तो विश्वस्ता विधवास्त्रियाम् ॥
निवातो दृढसन्नाहे वातान्ते चाश्रयेऽपि च ॥ १२८ ॥
अनन्तः शेषविष्ण्वोः स्यादनन्तः सुरवर्त्मनि ॥

अनन्तश्चाप्यनवधौ वाच्यवत् समुदाहृतः ॥ १२९ ॥
अनन्ता शारिवादूर्वाविशल्यालाङ्गलीषु च ॥
अनन्ता हैमवत्याञ्च गुडूच्याञ्च निरूप्यते ॥ १३० ॥
शकुन्तः पक्षिभेदे स्याद्भासपक्षिविहङ्गयोः ॥
दृष्टान्तः शास्त्र उभयोदाहरणे प्रकीर्त्तितः ॥ १३१ ॥
कृतान्तो यमसिद्धान्तदैवाकुशलकर्म्मसु ॥
निशान्तः कथितः शान्ते निशान्तं भवनोषसोः ॥ १३२ ॥
वृत्तान्तोऽवसरे भावकार्त्स्न्यवार्त्ताविशेषयोः ॥
वृत्तान्तः प्रक्रियायाञ्च क्वचिदेकान्तवाचकः ॥ १३३ ॥
उद्दान्तो निर्मदगजे समुद्दीर्णे च वाच्यवत् ॥
शुद्धान्तोऽन्तःपुरे राज्ञो रहःकक्षान्तरेऽपि च ॥ १३४ ॥
अस्वन्तमशुभे चुल्ल्यां मरणेऽनवधावपि ॥
क्षेत्रेऽपि कथ्यतेऽस्वन्तमुदन्तः साधुवार्त्तयोः ॥ १३५ ॥
जयन्तः शङ्करेऽपि स्याज्जयन्तः पाकशासनौ ॥
जयन्ती पादपे गौर्यामिन्द्रपुत्रीपताकयोः ॥ १३६ ॥
गोदन्तो हरिताले स्याद्दंशिते हरितेऽपि च ॥
भासन्तः सुन्दराकारे भासन्तो भासपक्षिणि ॥ १३७ ॥
महद्राज्ये विशाले च महती वल्लकीभिदि ॥
मरुद्देवे समीरे स्यादर्हन् पूज्ये जिनेऽपि च ॥ १३८ ॥
जगदाख्या स्मृता वाते विष्टपे जङ्गमेऽपि च ॥
जगती भुवने क्ष्मायां छन्दोभेदे जनेऽपि च ॥ १३९ ॥
पित्सन् पिपतिषन्नेतौ पतनेच्छुविहङ्गयोः ॥
हरित् ककुभि वर्णे च तृणवाजिविशेषयोः ॥ १४० ॥
हरितेऽपि च दूर्वायां हरिद्वर्णयुतेऽन्यवत् ॥
विद्युत् सौदामिनीसन्ध्योर्निष्प्रभे त्वभिधेयवत् ॥ १४१ ॥

गर्मुत् सुवर्णलतयो रोहित् सूर्यलताभिदोः ॥
भूभृन्नरेन्द्रे शैले च पतन् पातुकपक्षिणोः ॥ १४२ ॥
कुर्वन् कर्मकरे भृत्ये स्यादर्वन् कुत्सितेऽन्यवत् ॥
अर्वती कुम्भदास्याञ्च वाम्याञ्च परिकीर्त्तिता ॥ १४३ ॥
श्रीमांस्तिलकवृक्षे स्यान्मनोज्ञे धनकेऽपि च ।
धीमान् वाचस्पतौ धीरे भास्वान् भास्वरसूर्ययोः ॥१४४॥
सुव्रता पुङ्गसन्दोह्यसुरभ्यां शोभनव्रते ॥
वाच्यवद्विद्रुता क्षुद्ररोगे स्याद्विद्रुतं स्फुटे ॥ १४५ ॥
वनिता जनितात्यर्थानुरागायाञ्च योषिति ॥
वनितं याचितेऽपि स्याद्वनितं शोचितेऽपि च ॥ १४६ ॥
जामाता वल्लभे सूर्यावर्त्तेऽपि दुहितुः पतौ ॥
विनेता देशिके राज्ञि विधाता वेधसि स्मरे ॥ १४७ ॥
विनता पिटकाभेदे विनता तार्क्ष्यमातरि ॥
विनतः प्रणते भुग्ने शिक्षितेऽप्यभिधेयवत् ॥ १४८ ॥
पञ्चता पञ्चभावे स्यात् पञ्चता मरणेऽपि च ॥
विजाताख्या प्रसूतायां जनिते विकृतेऽपि च ॥ १४९ ॥
सिकता वालुकायां स्युः सिकताऽप्यामयान्तरे ॥
सिकतान्वितदेशे च शर्करायाञ्च कीर्त्तिता ॥ १५० ॥
वासिता करिणीनार्योर्वासितं सुरभीकृते ॥
ज्ञानमात्रे खगारावे वासितं वस्त्रवेष्टिते ॥ १५१ ॥
पिशिता मांसिकायां स्यादामिषे पिशितं मतम् ॥
तृणताऽपि तृणत्वे स्यात्तृणता कार्मुकेऽपि च ॥ १५२ ॥
द्विजातिरण्डजे विप्रे श्रीपतिः क्ष्मापतौ हरौ ॥
गोपतिः शङ्करे षण्डे पार्थिवेऽपि विकर्त्तने ॥ १५३ ॥
स्थपतिः शिल्पिभेदेऽपि स्थपतिः कञ्चुकिन्यपि ॥

जीवेष्टियाजके सूतेऽप्यमतिः कालचन्द्रयोः ॥ १५४ ॥
अङ्गतिः स्यादग्निहोत्रे ज्वलनाम्बुजयोनिषु ॥
रमतिर्नायके स्वर्गेऽप्यहतिस्त्यागरागयोः ॥ १५५ ॥
निर्ऋतिः स्यादलक्ष्म्याञ्च दिक्पाले निरुपद्रवे ॥
अगस्तिर्वङ्गसेने स्यादगदस्तिः कुम्भसम्भवे ॥ १५६ ॥
गभस्तिः किरणे सूर्ये स्वाहायाञ्च विलोक्यते ॥
सङ्गतिः सङ्गमे ज्ञाने सन्नतिः प्रणतौ ध्वनौ ॥ १५७ ॥
आयतिः सङ्गमे दैर्घ्ये प्रभावागामिकालयोः ॥
आपत्तिः स्याद् बले स्नेहे वशित्वे वासरेऽपि च ॥१५८॥
मर्यादायां तथाऽऽपत्तिर्विपत्तिर्यातनापदोः ॥
नियतिर्नियमे दैवे पद्धतिः पङ्क्तिवर्त्मनोः ॥ १५९ ॥
सन्ततिः पङ्क्तिविस्तारगोत्रेषु कविभिः स्मृता ॥
परम्पराभवेऽपि स्यात् सन्ततिः पुत्रकन्ययोः ॥ १६० ॥
सम्मतिः स्यादनुज्ञानेऽप्यभिलाषेऽपि सम्मतिः ॥
समितिः सङ्गरे साम्ये सभायामपि सङ्गमे ॥ १६१ ॥
अदितिर्वसुधायां स्याददितिर्देवमातरि ॥
वसतिः स्यादवस्थाने यामिन्याञ्च निकेतने ॥ १६२ ॥
पक्षतिः पक्षमूले स्यात् पक्षतिः प्रतिपत्तिथौ ॥
उन्नतिस्तार्क्ष्यदारेषु समृद्धावुदयेऽपि च ॥ १६३ ॥
प्रसूतिस्तनयोत्पत्तौ तथा दुहितरि स्मृता ॥
व्रततिर्विस्तृतौ वल्ल्यां वहतिः सचिवे गवि ॥ १६४ ॥
दुर्गतिर्नरके नैःस्वे विकृतिर्डिम्बरोगयोः ॥
निकृतिर्भर्त्सने क्षेपे वदन्ति शठशाठ्ययोः ॥ १६५ ॥
आकृतिः कथितारूपसामान्यवपुषोरपि ॥
प्रकृतिः सहजे योनावमात्ये परमात्मनि ॥ १६६ ॥

निर्वृत्तिः स्वस्थतायां स्यादस्तङ्गमनसौख्ययोः ॥
सुनीतिः शोभननये सुनीतिर्ध्रुवमातरि ॥ १६७ ॥
प्रवृत्तिः कथिता वृत्तौ प्रवाहोदन्तयोरपि ॥
विच्छित्तिरङ्गरागे स्याद्भावविच्छेदयोरपि ॥ १६८ ॥
संवित्तिः प्रतिपत्तौ स्यादविवादे जनस्य च ॥
आपत्तिः प्रापणे दोषे चासत्तिः सङ्गलाभयोः ॥ १६९ ॥
पर्याप्तिः स्यात् प्रकामेऽपि प्राप्तौ च परिरक्षणे ॥
समाप्तिश्चावसाने स्यात् समाप्तिश्च समर्थने ॥ १७० ॥
बृहती क्षुद्रवार्त्ताक्यां कण्टकार्याञ्च वाचि च ॥
वारिधान्यां महत्याञ्च छन्दोवसनभेदयोः ॥ १७१ ॥
मालती जातियुवतीज्योत्स्नासु सरिदन्तरे ॥
काकमाच्यां विशालायां विभावर्यामपीष्यते ॥ १७२ ॥
भवती बाणभेदे स्यादन्यवद् वत्सदर्थयोः ॥
रेवती हलिपत्न्यां स्यात् ताराभेदेऽपि मातृषु ॥ १७३ ॥
पार्वती शल्लकीदुर्गाद्रोपदीजीविनीषु च ॥
स्रवन्ती च द्रवन्ती च सरिदोषधिभेदयोः ॥ १७४ ॥
जीवन्ती जीविनीशम्योर्गुडूचीवृन्दयोरपि ॥
हसन्त्यङ्गारधान्याञ्च मल्लिकाशाकिनीभिदोः ॥ १७५ ॥
वासन्ती माधवीयूथ्योः पाटलायां क्रमेलके ॥
वासन्ती कोकिलेऽपि स्याद्वासन्तोऽविहिते विटे ॥ १७६ ॥

तचतुष्कम् ॥

भवेदवसितं ज्ञाते गतौ रुद्धावसानयोः ॥
अवदातं सिते पीते विशुद्धे प्रवरेऽपि च ॥ १७७ ॥
अवगीतन्तु निर्वादे मुहुर्दृष्टे विगर्हिते ॥
अन्तर्गतं विस्मृते स्यान्मध्यप्राप्ते च कथ्यते ॥ १७८ ॥

अङ्गारितं पलाशीयकलिकोद्गमदग्धयोः ॥
अपावृतः स्वतन्त्रे स्यात् पिहिते चाऽप्यपावृतः ॥ १७९ ॥
अत्याहितं महाभीतौ जीवनोपेक्षकर्मणि ॥
उपाहितोऽनलोत्पात आहिते चाप्युपाहितः ॥ १८० ॥
उपाकृतोऽध्वरहतपशूपद्रुतयोर्मतः ॥
उदास्थितः प्रतीहारेऽध्यक्षे च प्रणिधौ चरे ॥ १८१ ॥
अभिनीतो भवेन्न्याय्ये संस्कृतामर्षिणोरपि ॥
अभिजातः स्मृतो न्याय्ये कुलीनप्राप्तरूपयोः ॥ १८२ ॥
पारिजातः सुरतरौ मन्दारे पारिभद्रके ॥
भवेत्परिगतं लाभे प्रयाते वेष्टितेऽपि च ॥ १८३ ॥
ख्यातं प्रणिहितं लब्धे विन्यस्ते च समाहिते ॥
भवेत् प्रतिहितोऽद्विष्टे प्रतिस्खलितरुद्धयोः ॥ १८४ ॥
उल्लिखितं समुत्कीर्णे वाच्यवच्च तनूकृते ॥
विद्यादुपचितं दिग्धे समृद्धे च समाहिते ॥ १८५ ॥
समुद्धतः समुद्गीर्णेऽप्यविनीते समुद्धतः ॥
कुहरितं पिकालापे रटिते रतनिस्वने ॥ १८६ ॥
भवेत् पल्लवितं लाक्षारक्ते सप्रसवे तते ॥
उज्जृम्भितन्तु चेष्टायामुत्फुल्ले चाभिधेयवत् ॥ १८७ ॥
उद्ग्राहितमुपन्यस्ते बद्धग्राहितयोरपि ॥
निस्तुषितं निस्त्वचि स्याद्वर्ज्जिते च लघूकृते ॥ १८८ ॥
ऐरावतोऽभ्रमातङ्गनारङ्गलिकुचाहिषु ॥
ऐरावतं महेन्द्रस्य ऋजुदीर्घशरासने ॥ १८९ ॥
ऐरावती स्यात्तडिति सरिद्भेदेऽपि लक्ष्यते ॥
कलधौतं रूप्यहेम्नोः कलधौतं कलध्वनौ ॥ १९० ॥
दिवाभीतः कुम्भिले स्यादुलूके कुमुदाकरे ॥

पाशुपतो वकपुष्पे पशुपत्यधिदैवते ॥ १९१ ॥
निष्कासितो निर्गमितेऽप्यूहिते धिक्कृतेऽपि च ॥
व्यतीपातो महोत्पाते योगभेदापयानयोः ॥ १९२ ॥
समाघातो वधे युद्धे परिघातोऽस्त्रघातयोः ॥
विनिपातोऽवपाते स्याद्दैवादिव्यसनेऽपि च ॥ १९३ ॥
समाहितः प्रतिज्ञाते समाधिस्थे यतात्मनि ॥
वाच्यवन्निहिते सिद्धे समाधाने समाहितम् ॥ १९४ ॥
नन्द्यावर्त्तः स्मृतो वेश्मप्रभेदे तगरद्रुमे ॥
परिवर्त्तो विनिमये कूर्मराजे पलायने ॥ १९५ ॥
अभियुक्तः परै रुद्धे तथा स्याद्तितत्परे ॥
अतिमुक्तस्तु वासन्त्यां तिनिशे निष्कलेऽपि च ॥ १९६ ॥
उपरक्तः सैंहिकेये तद्ग्रहे व्यसनातुरे ॥
सूर्य्यभक्तो बन्धुजीवे तथा भास्करपूजके ॥ १९७ ॥
नदीकान्तः समुद्रे स्यात् सिन्दुवारेऽपि हिज्जले ॥
नदीकान्ता स्मृता जम्बूकाकजङ्घालतासु च ॥ १९८ ॥
नागदन्तो द्विपरदे गृहान्निर्गतदारुणि ॥
नागदन्ती तु कुम्भायां श्रीहस्तिन्यामपीष्यते ॥ १९९ ॥
पुष्पदन्तस्तु दिङ्नागे नागविद्याधरान्तरे ॥
चन्द्रकान्तोऽश्मभेदे स्याच्चन्द्रकान्तश्च कैरवे ॥ २०० ॥
वैजयन्तो गृहे शक्रप्रासादध्वजयोरपि ॥
वैजयन्ती पताकायां जयन्तीवह्निमन्थयोः ॥ २०१ ॥
पुरस्कृतं स्वीकृताभिशस्तयोऽरभिधेयवत् ॥
अग्रे कृताभ्यर्च्चितयोः सिक्ते चापि पुरस्कृतम् ॥ २०२ ॥
अवध्वस्तं परित्यक्ते निन्दितेऽप्यवचूर्णिते ॥
धूमकेतुः स्मृतो वह्नावुत्पातग्रहभेदयोः ॥ २०३ ॥

चित्रगुप्तः कृतान्ते स्याल्लेख... चास्य सम्मतः ॥
पञ्चगुप्तस्तु चार्वाकदर्शने कमठेऽपि च ॥ २०४ ॥
अधिक्षिप्तः प्रणिहिते तथा निर्भर्त्सितेऽपि च ॥
प्रतिक्षिप्तं प्रतिहते प्रेषिते च निराकृते ॥ २०५ ॥
आयुष्मान् योगभेदे स्यादायुष्मांश्चिरजीविनि ॥
विवस्वान् विबुधे भानौ भगवान् बुद्धपूज्ययोः ॥ २०६ ॥
द्वीपवान् सिन्धुनदयोर्द्वीपवत्यापगाभुवोः ॥
गरुत्मान् विहगे तार्क्ष्ये सङ्ख्यावान् पण्डिते मिते ॥ २०७ ॥
अंशुमान् भास्करे शालपर्ण्यामंशुमती मता ॥
अर्थपतिः कुबेरे स्यादीश्वरेऽर्थपतिस्तथा ॥ २०८ ॥
गृहपतिर्गृहस्थे स्यादत्याधाने च सत्रिणि ॥
सेनापतिः कार्त्तिकेयेऽप्यनीकाधिकृतेऽपि च ॥ २०९ ॥
लक्ष्मीपतिर्वासुदेवे लवङ्गद्रुमपूगयोः ॥
प्रजापतिर्विधौ भूपे हिमारातिः खगेऽनले ॥ २१० ॥
वनस्पतिर्वृक्षमात्रे विना पुष्पं फलद्रुमे ॥
सदागतिः स्यात् पवने निर्वाणे च सदीश्वरे ॥ २११ ॥
दिवाकीर्त्तिस्तु चाण्डाले नापितोलूकयोरपि ॥
शतधृतिर्धातरीऽन्द्रे सुधासूतिर्मखे विधौ ॥ २१२ ॥
भवेदपचितिः पूजाक्षयहानिषु निष्कृतौ ॥
अनुमतिः स्यादूनेन्दुपूर्णिमाऽनुज्ञयोरपि ॥ २१३ ॥
प्रतिकृतिः प्रतीकारे प्रतिमायाञ्च पूजने ॥
निराकृतिः प्रतिक्षेपेऽप्यस्वाध्यायेऽप्यनाकृतौ ॥ २१४ ॥
प्रतिपत्तिः पदप्राप्तौ प्रवृत्तौ गौरवेऽपि च ॥
प्रागल्भ्ये च प्रबोधे च प्रतिपत्तिः प्रयुज्यते ॥ ११५ ॥
उपसत्तिः सङ्गमे च सेवायां प्रतिपादने ॥

अभिशस्तिः स्मृता लोकापवादे प्रार्थनेऽपि च ॥ २१६ ॥
पारावती गोपगीतिलवलीलतयोर्मता ॥
पारावतः कलरवे शैले मर्कटतिन्दुके ॥ २१७ ॥
भोगवती भुजङ्गानां नगरीसरितोरपि ॥
गन्धवती सुराभूम्योः पुरीयोजनगन्धयोः ॥ २१८ ॥
हैमवत्यऽभयास्वर्णक्षीर्योः श्वेतवचोमयोः ॥
चर्म्मण्वती नदीभेदे कदलीपादपेऽपि च ॥ २१९ ॥
कुमुद्वती कुमुदिन्यां कुशपत्न्यां कुमुद्वती ॥
शुभ्रदन्ती सुदन्त्यां स्यात् पुष्पदन्तेभयोषिति ॥ २२० ॥
सरस्वती सरिद्भेदे गोवाग्देवतयोर्गिरि ॥
स्त्रीरत्ने चापगायाश्च सरस्वान् सिन्धुकेऽम्बुधौ ॥ २२१ ॥
रागमाताऽपि कुट्टन्यां स्मृता भूमिरुहामये ॥
प्रभूमिता क्लेशितायां सूर्यगन्तव्यदिश्यऽपि ॥ २२२ ॥
प्रव्रजिता तपस्विन्यां मुण्डीर्यामांसिकौषधौ ॥
ऋष्यप्रोक्ता शतावर्य्यां शूकशिम्ब्यां बलाभिदि ॥ २२३ ॥
कृष्णवृन्ता पाटलायां माषपर्ण्याश्च भाविता ॥
समुद्रान्ता तु कार्पासीस्पृक्कादुरालभासु च ॥ २२४ ॥

तपञ्चकम् ॥

स्याद्ऽवलोकितो बुद्धे प्रक्षिप्ते त्वविलोकितः ॥
उपधूपित आसन्नमरणे परिधूपिते ॥ २२५ ॥
स्याद्ऽपराजितो विष्णौ श्रीकण्ठे चाऽपराजिता ॥
श्वेताजयन्तीदुर्गास्वऽनिर्ज्जिते त्वऽभिधेयवत् ॥ २२६ ॥
गणाधिपतिर्विख्यातः शङ्करेऽपि गजानने ॥
यादसाम्पतिरम्भोधौ प्रतीचीदिक्पतावपि ॥ २२७ ॥
स्यात् पृथिवीपतिर्भूपे ऋषभाख्यौषधेऽपि च ॥

मूर्द्धाभिषिक्तो भूपाले प्रधाने क्षत्रियेऽपि च ॥ २२८ ॥
वसन्तदूतश्चूते स्यात् पिकपञ्चमरागयोः ॥
वसन्तदूती पाटल्यां प्रतीच्यामतिमुक्तके ॥ २२९ ॥

तषट्कम् ॥

अर्द्धपारावतश्चित्रकण्ठे तित्तिरपक्षिणि ॥

तसप्तकम् ॥

समुद्रनवनीताख्या पीयूषामृतरश्मिषोः ॥ २३० ॥

इति तान्तवर्गः ॥

—:०:—

थद्विकम् ॥

रथः स्यात् स्यन्दने काये चरणे वेतसेऽपि च ॥
कुथः प्रवेणीकुशयोः पीथोऽर्के पीथमम्भसि ॥ १ ॥
कोथस्तु शठिते नेत्ररुग्भेदे मन्थनेऽपि च ॥
प्रोथोऽध्वगेऽश्वघोणायां कटीस्त्रीगर्भयोरपि ॥ २ ॥
क्काथः स्याद् द्रवनिष्पाके दुःखव्यसनयोरपि ॥
सिक्थं नील्यां मधूच्छिष्टे सिक्थ ओदनसम्भवे ॥ ३ ॥
पृथुर्नृपे कृष्णजीरे वाष्प्यां पृथु महत्यपि ॥
दुःस्थः स्याद् दुर्गते मूर्खे प्रस्थः शिखरमानयोः ॥ ४ ॥
तुत्थोऽग्नावञ्जने तुत्था नीलीसूक्ष्मैलयोरपि ॥
मन्थः साक्तवमन्थाननेत्रामयदिवाकरे ॥ ५ ॥
ग्रन्थो धने स्यात् सन्दर्भे द्वात्रिंशद्वर्णनिर्म्मितौ ॥
ग्रन्थिः पर्वणि कौटिल्ये ग्रन्थिपर्णे गदान्तरे ॥ ६ ॥
अर्थः प्रकारे विषये वित्तकारणवस्तुषु ॥
अभिधेयेऽपि शब्दानां निवृत्तौ च प्रयोजने ॥ ७ ॥
तीर्थं शास्त्राध्वरक्षेत्रोपायोपाध्यायमन्त्रिषु ॥

अवतारर्षिजुष्टाम्भःस्त्रीरजःसु च विश्रुतम् ॥ ८ ॥
सार्थो वणिक्समूहे स्याद्ऽपि सङ्घातमात्रके ॥
पार्थस्तु ककुभे जिष्णौ गाथावाग्भेदवृत्तयोः ॥ ९ ॥
कन्था मृन्मयभित्तौ स्यात् कन्था प्रावरणान्तरे ॥
आस्था चाऽलम्बनास्थानयत्नापेक्षासु कथ्यते ॥ १० ॥
संस्था स्थितौ चरे नाशे व्यक्तिसादृश्ययोरपि ॥
वीथी गृहाङ्गे पङ्क्तौ च नाट्यरूपकवर्त्मनोः ॥ ११ ॥
यूथी पुष्पप्रभेदे स्यान्मागध्याश्च कुरण्टके ॥
यूथं तिर्यक्समूहे स्याद्वृन्दमात्रे च भाषितम् ॥ १२ ॥

थत्रिकम् ॥

मन्मथः कामचिन्तायां कपित्थे कुसुमायुधे ॥
उन्माथः कूटयन्त्रे स्यान्मारणे घातकेऽपि च ॥ १३ ॥
प्रमथोऽपि गणे प्रोक्तः पथ्यायां प्रमथा भवे ॥
निशीथोऽप्यर्द्धरात्रे स्यान्निशीथो रात्रिमात्रके ॥ १४ ॥
विदिथो योगिकृतिनोरुद्रथः शुनिकुक्कुटे ॥
शमथः सचिवे शान्तौ दमथो दमदण्डयोः ॥ १५ ॥
वरूथो रथगुप्तौ स्याद्वरूथं चर्मवेश्मनोः ॥
अतिथिः कुशपुत्रेऽपि कोपे प्राघुणकेऽपि च ॥ १६ ॥
वमथुर्वमनेऽपि स्याद् गजस्य करशीकरे ॥
क्षवथुः कथितः कासे हिक्कायामपि दृश्यते ॥ १७ ॥
समर्थोऽपि हिते शक्ते सम्बद्धार्थेऽपि सम्मतः ॥
सिद्धार्थः शाक्यसिंहे स्यात् सिद्धार्थः सितसर्षपे ॥ १८ ॥
कायस्थोऽपि नृजातेः स्यात् प्रभेदे परमात्मनि ॥
कायस्था तु हरीतक्यामामलक्याश्च दर्शिता ॥ १९ ॥
वयःस्थो वाच्यवद्यूनि वयःस्था शाल्मलीद्रुमे ॥

ब्राह्मीगुडूचीकाकोलीसूक्ष्मैलामलकीषु च ॥ २० ॥
अश्वत्थो गर्दभाण्डे स्यात् पिप्पले पूर्णिमातिथौ ॥
उपस्थो मेण्ढ्र उत्सङ्गे भगे पायौ च कथ्यते ॥ २१ ॥
निर्ग्रन्थो नग्नकेऽपि स्यान्निःस्वबालिशयोरपि ॥
गोग्रन्थिस्तु करीषे स्याद् गोष्ठे गोजिह्विकौषधे ॥ २२ ॥
अन्यथा तु हरीतक्यां पन्नगे निर्व्यथेऽपि च ॥
षड्ग्रन्थाऽपि वचासिंह्योः षड्ग्रन्थोऽपि प्रकीर्त्यते ॥ २३ ॥

थचतुष्कम् ॥

चित्ररथः स्याद्गन्धर्वे रवौ विद्याधरान्तरे ॥
चतुष्पथश्चतुर्मार्गसङ्गमेऽपि द्विजेऽपि च ॥ २४ ॥
वानप्रस्थो मधूके स्यात् किंशुके चाश्रमान्तरे ॥
दशमीस्थं नष्टबीजे स्थविरेऽपि प्रचक्ष्यते ॥ २५ ॥
अनीकस्थो रणखले गजशिक्षाविचक्षणे ॥
राजरक्षिषु चिह्ने च वीरमर्द्दनकेऽपि च ॥ २६ ॥
भवेदितिकथा नष्टधर्मेऽपार्थे वचस्यऽपि ॥
अश्रद्धेयेऽप्युदराथिः समुद्रे च वियन्मणौ ॥ २७ ॥

इति थान्तवर्गः

—:o:—

दद्विकम् ॥

गदो भ्रातरि विष्णोः स्यादामयेऽप्यायुधे गदा ॥
नदः समुद्रे निनदे नदी तु सरिति स्मृता ॥ १ ॥
मदो रेतसि कस्तूर्यां गर्वे हर्षेभदानयोः ॥
मद्येऽपि मद आख्यातो मदी कृषकवस्तुनि ॥ २ ॥
पदं शब्दे च वाक्यं च व्यवसायापदेशयोः ॥
पादपाचिह्नयोः स्थानत्राणयोरङ्कवस्तुनोः ॥ ३ ॥

छदः पलाशे गरुति ग्रन्थिपर्णितमालयोः ॥
रदो विलेखने दन्ते भद्रं कल्याणशर्म्मणोः ॥ ४ ॥
भेदो द्वैधे विशेषे स्यादुपजापे विदारणे ॥
स्वेदस्तु स्वेदने घर्म्मे शादः कर्दमशस्ययोः ॥ ५ ॥
पादो ब्रध्ने तुरीयांशे शैलप्रत्यन्तपर्वते ॥
चरणे च मयूखे च क्षोदो रजसि पेषणे ॥ ६ ॥
सूदस्तु सूपवत् सूपकारे च व्यञ्जनेऽपि च ॥
स्वादुर्मनोज्ञे मृष्टे च मृदुः स्यात् कोमलेऽखरे ॥ ७ ॥
अब्दः संवत्सरे मेघे गिरिभेदे च मुस्तके ॥
विन्दुर्दन्तच्छदेऽपि स्यात्तथा वेदितृविप्रुषोः ॥ ८ ॥
कुन्दश्चक्रभ्रमौ माघ्ये निधिभेदे मुरद्विषि ॥
कन्दस्तु शूरणे शस्यमूले जलधरेऽपि च ॥ ९ ॥
मन्दः खले मन्दरते मूर्खे स्वैरेऽल्परागिणोः ॥
अभाग्येऽपि च मातङ्गे गजजातिप्रभेदयोः ॥ १० ॥
छन्दो वशेऽप्यभिप्राये हृदाख्याचित्तबुक्कयोः ॥
वेदिरङ्गुलमुद्रायां बुधेऽलङ्कृतभूतले ॥ ११ ॥
अन्दुः स्याद् बन्धनद्रव्ये प्रभेदे भूषणस्य च ॥
नन्दिरानन्दने द्यूते प्रतीहारे हरस्य च ॥ १२ ॥
विद्या ज्ञाने च बुद्धौ च धीदा कन्यामनीषयोः ॥
निन्दाऽपवादे कुत्सायां नन्दा मणिकसम्पदोः ॥ १३ ॥

दत्रिकम् ॥

धनदो दातरि श्रीदे जलदो मुस्तकेऽम्बुदे ॥
नलदं स्यात्पुष्परसे मांसिकोशीरयोरपि ॥ १४ ॥
प्रमदः सम्मदे मत्ते कामिन्यां प्रमदा मता ॥
विशदः पाण्डुरे व्यक्ते जीवदो वैद्यविद्विषोः ॥ १५ ॥

अङ्गदः कपिभेदे स्यात् केयूरेऽङ्गदमिष्यते ॥
अङ्गदा याम्यदिग्दन्तिहस्तिन्यां समुदाहृता ॥ १६ ॥
वरदोऽपि प्रसन्ने स्याद्वरदः शान्तचेतसि ॥
वरदाऽपि च कन्यायामामोदो गन्धहर्षयोः ॥ १७ ॥
नर्मदः केलिसचिवे नर्मदा सरिदन्तरे ।
क्षणदो गणके रात्रौ क्षणदा क्षणदञ्जले ॥ १८ ॥
कपर्द्दः खण्डपरशोर्जटाजूटे वराटके ॥
आस्पदन्तु पदे कृत्ये निषादः श्वपचे स्वरे ॥ १९ ॥
प्रसादोऽनुग्रहे काव्यगुणस्वाध्यप्रसक्तिषु ॥
प्रसादः कथ्यते देवनरदेवनिवासयोः ॥ २० ॥
शारदः पीतमुद्गे स्याच्छालीने प्रतिभे नवे ॥
वर्षेऽथ जलपिप्पल्यां सप्तपर्णे च शारदि ॥ २१ ॥
दारदो विषभेदे स्याद्धिङ्गुले पारदेऽपि च ॥
तोयदन्तु घृते प्रोक्तं तोयदो मुस्तकाब्दयोः ॥ २२ ॥
निर्वादः स्यात् परीवादपरिनिष्ठितवादयोः ॥
अर्बुदो मांसकीले स्याद्दशकोटिषु चाऽर्बुदः ॥ २३ ॥
शैलेऽर्बुदोऽथ सम्भेदः स्फुटने सिन्धुसङ्गमे ॥
कुसीदं जीवने वृद्ध्या कुसीदश्च कुसीदिके ॥ २४ ॥
प्रणादस्तारशब्दे स्यात् प्रणादः श्रवणामये ॥
प्रह्लादः प्रमदे दैत्ये दायादे ज्ञातिपुत्रयोः ॥ २५ ॥
मेनादः केकिमार्ज्जारच्छागलेषु समीरितः ॥
गोविन्दो वासुदेवे स्याद्गवाध्यक्षे बृहस्पतौ ॥ २६ ॥
आक्रन्दो दारुणरणे मित्रे त्रातरि रोदने ॥
माकन्दः सहकारे स्यान्माकन्द्यामलकीफले ॥ २७ ॥
अर्द्धेन्दुश्चन्द्रशकले गलहस्तनखाङ्कयोः ॥

अर्द्धेन्दुः स्यादतिप्रौढे स्त्रीगुह्याङ्गुलियोजने ॥ २८ ॥
कर्णेन्दुरुत्क्षिप्तिकायां कर्णपाश्यामपीरिता ॥
स्यात् कौमुदः कार्त्तिकिके चन्द्रिकायाश्च कौमुदी ॥ २९ ॥
कुमुदं कैरवे रक्तपङ्कजे कुमुदः कपौ ॥
दैत्यान्तरे च दिङ्नागनागयोरपि कीर्त्तितः ॥ ३० ॥
कुमुदा कुम्भिगाम्भार्योः स्यात् कुमुत् कृपणेऽन्यवत् ॥
कुमुदेऽपि कुमुत् प्रोक्तं क्रव्यां मांसाशिरक्षसोः ॥ ३१ ॥
ककुद्मत् ककुदं श्रेष्ठे वृषाङ्के राजलक्ष्मणि ॥
मुकुन्दः पुण्डरीकाक्षे रत्नभेदे च पारदे ॥ ३२ ॥
दरत् प्रपातेऽद्रिभवे शरत् संवत्सरे ऋतौ ॥
दृषत् पेषणपट्टे स्याद् दृशत्पाषाणमात्रके ॥ ३३ ॥
सम्पद्भूतौ गुणोत्कर्षे हारभेदेऽपि दृश्यते ॥
भासत् प्रभास्वरे मासे तरत् कारण्डवे प्लवे ॥ ३४ ॥
संविज्ज्ञाने प्रतिज्ञायां सङ्केताचारनामसु ॥
सम्भाषणे तोषणेऽपि क्रियाकारे च सङ्गरे ॥ ३५ ॥
कामृदा धेनुकायां स्याद्वाच्यवत् कामदोग्धरि ॥
सुनन्दा रोचनानार्योर्मर्यादाधारणे स्थिता ॥ ३६ ॥

दचतुष्कम् ॥

एकपदं स्यात्तत्काले पद्व्यामेकपद्यऽपि ॥
चतुष्पदं स्यात् स्वीकारे गवाश्वादिपशुष्वऽपि ॥ ३७ ॥
भवेद्विष्णुपद्‌मित्याख्या क्षीरोदे गगनेऽम्बुजे ॥
प्रोक्ता विष्णुपदी गङ्गासंक्रान्तिद्वारकासु च ॥ ३८ ॥
भवेज्जनपदो देशे जने जानपदोऽपि च ॥
प्रियंवदः खेचरे स्यात् प्रियवाचिषु वाच्यवत् ॥ ३९ ॥
अपवादस्तु निन्दायामाज्ञाविश्रम्भयोरपि ॥

परिवादः कलङ्के स्याद्वीणावादनवस्तुनि ॥ ४० ॥
समर्यादः समीपे स्यान्मर्यादासहितेऽपि च ॥
पुटभेदो नदीवक्त्रे पतनातोद्ययोरपि ॥ ४१ ॥
अष्टापदं स्यात् कनके शारीणां फलकेऽपि च ॥
अष्टापदश्च शरभे चन्द्रमल्याश्च मर्कटे ॥ ४२ ॥
मेघनादस्तु वरुणे रावणस्य सुतेऽपि च ॥
महानादः कुञ्जरे स्याद्रुषुकाब्जे शयानके ॥ ४३ ॥
भवेत् कोकनदं रक्तकैरवे रक्तपङ्कजे ॥
विशारदो बुधे धृष्टेऽभिमर्दो रणमन्थयोः ॥ ४४ ॥
पीठमर्दोऽतिधृष्टे स्यान्नाट्योक्तौ नायकप्रिये ॥
मुचुकुन्दो द्रुभेदे स्यान्मुनिदैत्यविशेषयोः ॥ ४५ ॥
कुरुविन्दस्तु मुस्तायां कुल्माषव्रीहिभेदयोः ॥
हिङ्गुले पद्मरागे स्यान्मुकुरे च समीरितः ॥ ४६ ॥
अभिष्यन्दोऽतिवृद्धौ स्यादाश्रावेऽक्षिगदेऽपि च ॥
कटुकन्दं विदुः शिग्रौ शृङ्गवेररसोनयोः ॥ ४७ ॥
तमोनुदऽग्नीन्द्वर्केषु प्रतिपत्तिथिसंविदोः ॥
शतह्रदा भवेद्वज्रे सौदामिन्याश्च कीर्त्तिता ॥ ४८ ॥

दपञ्चकम् ॥

सहस्रपादः कारण्डे मार्तण्डे यज्ञपूरुषे ॥
भवेदुपनिषद्धर्म्मे वेदान्तेऽपि रहस्यऽपि ॥ ४९ ॥

इति दान्तवर्गः ॥

—:०:—

धद्विकम् ॥

राधो वैशाखमासे स्याद्राधा गोप्याश्च विद्युति ॥
विष्णुक्रान्तामलक्योश्च चित्रवेधे च धन्विनाम् ॥ १ ॥

गाधः स्थाने च लिप्सायां व्याधो मृगयुदुष्टयोः ॥
मेधः क्रतुर्धियां मेधा मेधः स्यात् खलदारुणे ॥ २ ॥
बुधः कवौ रौहिणेये मिद्धमालस्यनिद्रयोः ॥
तथा चित्ताभिसंक्षेपे [illegible]द्धयोः ॥ ३ ॥
सिद्धो व्यासादिषु ख्यातः सिद्धाः स्युर्दैवयोनिषु ॥
नित्ये प्रसिद्धे निष्पन्नेऽपीद्धमातप्तदीप्तयोः ॥ ४ ॥
ऋद्धं त्वतिसमृद्धे स्यात् सम्यग्वाते तु वाच्यवत् ॥
वृद्धन्तु शैलजे सूरिजीर्णरूढेषु भेद्यवत् ॥ ५ ॥
विद्धं स्याद्वेदिते क्षिप्ते सादृश्येऽपि निगद्यते ॥
बुद्धो जिने च धीरे च सौम्ये च बुधितेऽपि च ॥ ६ ॥
अर्द्धः खण्डे समांशेऽर्द्धं लुब्धो मृगयुकाङ्क्षिणोः ॥
अन्धं स्यात्तिमिरे दृष्टिहीनेऽन्धः समुदाहृतः ॥ ७ ॥
गन्धो गन्धक आमोदे लेशे सम्बन्धगर्वयोः ॥
स्कन्धः प्रकाण्डे सैन्यांशे बाहुमूलसमूहयोः ॥ ८ ॥
समीकनृपयोश्चाऽपि बन्धस्त्वाधौ च बन्धने ॥
दग्धं प्लुष्टेऽन्यवद्दग्धा स्थितार्कदिशि दर्शिता ॥ ९ ॥
दिग्धं विषाक्तबाणे स्याद्दिग्धं लिप्तार्थकेऽन्यवत् ॥
दुग्धं प्रपूरणे क्षीरे मुग्धः सुन्दरमूढयोः ॥ १० ॥
मधु क्षौद्रे जले क्षीरे मद्ये पुष्परसे मधुः ॥
दैत्ये चैत्रे वसन्ते च जीवाशाके मधुद्रुमे ॥ ११ ॥
विधुः शशाङ्के कर्पूरे हृषीकेशेऽपि राक्षसे ॥
साधुर्वार्धुषिके चारौ सज्जने चाभिधेयवत् ॥ १२ ॥
सिन्धुः समुद्रे नद्याञ्च नदे देशेभदानयोः
बन्धुर्बन्धूकपुष्पे स्याद्बन्धुर्भ्रातरि बान्धवे ॥ १३ ॥
आधिर्मानसपीडायां प्रत्याशायाश्च बन्धके ॥

व्यसने चापधिष्ठाने व्याधिरामयवाक्ययोः ॥ १४ ॥
बोधिः समाधिभेदे स्याद्बोधिः पिप्पलपादपे ॥
सन्धिर्भेदे सुरुङ्गायां भगे सङ्घटनेऽपि च ॥ १५ ॥
अब्धिः समुद्रे सरसि सिद्धिर्निष्पत्तियोगयोः ॥
वृद्धिरानन्दने ऋद्धौ वर्द्धनेऽपि कलान्तरे ॥ १६ ॥
दोग्धा गोपालके वत्से कवौ वार्त्तै[illegible] ॥
विधा गजान्ने ऋद्धौ च प्रकारे वेतने विधौ ॥ १७ ॥
गोधा तले निहाकायां बाधा दुःखनिषेधयोः ॥
सुधाऽमृते स्नुहीमूर्वालेपगाङ्गेष्टिकासु च ॥ १८ ॥
सन्धा स्थितौ प्रतिज्ञायां श्रद्धा श्राद्धत्वकाङ्क्षयोः ॥
स्पर्द्धा संघर्षणे साम्ये स्पर्द्धा क्रमसमुन्नतौ ॥ १९ ॥
वधूः स्नुषानवोढास्त्रीभार्यास्पृक्काङ्गनासु च ॥
शव्याश्च शारिबायां स्यात् स्त्रधूर्बुद्धौ गुदेऽपि च ॥ २० ॥

धत्रिकम् ॥

विवधो वीवधश्चापि पर्याहारेऽध्वभारयोः ॥
विबुधः पण्डिते देव सम्बाधः सङ्कटे भगे ॥ २१ ॥
निषधः कठिने देशे तद्राजे च नगान्तरे ॥
संरोधो रोधने क्षेपे निरोधो रोधनाशयोः ॥ २२ ॥
उत्सेधश्चोच्छ्रये काये दुर्विधो दुर्गते खले ॥
विश्रब्धोऽनुद्भटेऽत्यर्थे शातविश्वस्तयोरपि ॥ २३ ॥
न्यग्रोधी व्यामवटयोर्न्यग्रोधश्च शमीतरौ ॥
न्यग्रोधे वृषपर्ण्याश्च मोहनाख्यौषधावपि ॥ २४ ॥
अगाधो विवरे स्थाने प्रसिद्धोऽलङ्कृतेऽपि च ॥
विख्यातेऽपि च सन्नद्धे वर्मितव्यूढयोरपि ॥ २५ ॥
आनद्धं बद्धमात्रे स्यादानद्धं मुरुजादिके ॥

आविद्धो वाच्यवज्ज्ञेयः कुटिले च पराहते ॥ २६ ॥
कबन्धस्तूदरे रक्षोविशेषेऽपि विधुन्तुदे ॥
आबन्धो दृढबन्धे स्यात् प्रेमालङ्कारयोरपि ॥ २७ ॥
सुगन्धिः स्यादिष्टगन्धे सुगन्धि हरिवालुके ॥
उपाधिर्धर्मचिन्तायां कैतवेऽपि विशेषणे ॥ २८ ॥
कुटुम्बव्यापृतेऽपि स्यादुपधिर्व्याधिचक्रयोः ॥
परिधिर्यज्ञियतरोः शाखायामुपसूर्यके ॥ २९ ॥
अवधिस्त्ववधाने स्यात् सीम्नि काले बिलेऽपि च ॥
समाधिर्नियमे ध्याने नीवाके च समर्थने ॥ ३० ॥
सन्निधिः सन्निधानेऽपि भवेदिन्द्रियगोचरे ॥
संसिद्धिः सहजे सिद्धौ मदोग्रायामपि स्मृता ॥ ३१ ॥
प्रणिधिश्चरे याच्ञायां वीरुद्विटपशाखयोः ॥
मागधी पिप्पलीयूथ्योर्मागधो मगधोद्भवे ॥ ३२ ॥
वैश्यजक्षत्रियापुत्रे शुक्लजीरकवन्दिनोः ॥

धचतुष्कम् ॥

अवरोधस्तिरोधाने शुद्धान्ते राजवेश्मनि ॥ ३३ ॥
महौषधं शृङ्गवेरे विषायां लशुनेऽपि च ॥
परिव्याधो वेतसे स्यात् परिव्याधो द्रुमोत्पले ॥ ३४ ॥
अवष्टब्धमदूरे स्यादाक्रान्ते च विलम्बिते ॥
समुन्नद्धः समुद्भूते पण्डितम्मन्यधृष्टयोः ॥ ३५ ॥
अनिरुद्ध उषानाथे चरे चानर्गलेऽन्यवत् ॥
अनुबन्धः प्रकृत्यादेर्दोषोत्पादे विनश्वरे ॥ ३६ ॥
मुख्यानुयायिनि शिशौ प्रवृत्तस्य निवर्त्तने ॥
अनुबन्धी च हिक्कायां तृष्णायामपि कथ्यते ॥ ३७ ॥
कालस्कन्धस्तमाले स्यात्तिन्दुके जीवकद्रुमे ॥

आशाबन्धः समाश्वासे तथा मर्कटजालके ॥ ३८ ॥
ब्रह्मबन्धुरधिक्षेपे निर्देशे च द्विजन्मनाम् ॥
उग्रगन्धाजमोदायां वचायां छिक्कौषधौ ॥ ३९ ॥
तीक्ष्णगन्धा वचायाञ्च शिग्रुराजिकयोरपि ॥
इक्षुगन्धा कोकिलाक्षे क्रोष्ट्र्यां काशे च गोक्षुरे ॥ ४० ॥
तृणगोधा चित्रकोले कृकलासे च लक्ष्यते ॥
उपलब्धिर्मतौ प्राप्तौ ज्ञाने चाऽपि प्रयुज्यते ॥

धपञ्चकम् ॥

योजनगन्धा कस्तूर्यां सीतायां व्यासमातरि ॥ ४१ ॥

इति धान्तवर्गः ॥

नद्विकम् ॥

इनः सूर्ये नृपे पत्यौ धनं गोधनवित्तयोः ॥
जिनः स्यादतिवृद्धे च बुद्धे चार्हति जित्वरे ॥ १ ॥
जनो लोके महर्ल्लोकात् परलोके च पामरे ॥
जनी सीमन्तिनीवध्वोरुत्पत्तौ च जनिर्मता ॥ २ ॥
घनं स्यात् कांस्यतालादिवाद्यमध्यमनृत्ययोः ॥
घनं सान्द्रे दृढे दार्ढ्ये विस्तारे लोहमुद्गरे ॥ ३ ॥
मेघमुस्तकयोश्चाऽपि वनं काननिनीरयोः ॥
प्रवासे निलये चाऽपि वनं प्रस्रवणेऽपि च ॥ ४ ॥
वानं शुष्कफले शुष्के कटे सीवनकर्मणि ॥
जलसंप्लववातोर्मिसुरङ्गागतिसौरभे ॥ ५ ॥
दानं गजमदे त्यागे पालनच्छेदशुद्धिषु ॥
मानं प्रमाणे प्रस्थादौ मानश्चित्तोन्नतौ ग्रहे ॥ ६ ॥
यानं गतौ वाहनेऽपि पानं पीतौ च रक्षणे ॥

स्त्यानं स्निग्धे प्रतिध्वाने घनत्वालस्ययोरपि ॥ ७ ॥
स्थानं स्थितौ च सादृश्ये सन्निवेशावकाशयोः ॥
युक्तार्थे करणार्थे च स्थाने स्याद्व्ययं पुनः ॥ ८ ॥
सूनं [redacted]दूनेषु सूनं प्रसवपुष्पयोः ॥
सूना पुत्र्यां वधस्थानगलशुण्डिकयोरपि ॥ ९ ॥
ऊनं हीने रणोद्याने स्यूनः किरणसूर्ययोः ॥
मीनो राश्यन्तरे मत्स्ये सीनोऽजगरमूर्खयोः ॥ १० ॥
चीनो मृगान्तरे तन्तुव्रीहिदेशांशुकान्तरे ॥
हीनं गर्ह्योनयोर्न्यूनमनयोरपि कीर्त्तितम् ॥ ११ ॥
कृत्स्नं कष्टे समस्ते च रस्नस्तक्षकचण्डयोः ॥
वस्नं स्याद्वेतने मूल्ये वसनद्रव्ययोरपि ॥ १२ ॥
स्वप्नः सुप्तस्य विज्ञाने स्वप्नः स्वापे च दर्शने ॥
बुध्नः शिफायां रुद्रे च रत्नं श्रेष्ठे मणावपि ॥ १३ ॥
नग्नोऽपि च क्षपणके विवस्त्रे चाऽभिधेयवत् ॥
लग्नं राश्युदये लग्नं सक्तलज्जितयोरपि ॥ १४ ॥
छन्नं रहश्छादितयोः स्यादन्नं भुक्तभक्तयोः ॥
भिन्नमन्यार्थवचने सङ्गते दारिते स्फुटे ॥ १५ ॥
विन्नं ज्ञाते स्थितौ लब्धे छिन्नं भिन्ने तु वाच्यवत् ॥
छिन्नाऽमृतायां पुंश्चल्यामुन्नः क्लिन्ने च सूरते ॥ १६ ॥
चिह्नं ध्वजे पताकायां द्युम्नं वित्ते पराक्रमे ॥
धनुःसंज्ञा पियालद्रौ राशिभेदे शरासने ॥ १७ ॥
तनुः काये कृशे चाऽल्पे विरलेऽपि च वाच्यवत् ॥
हनुः प्रहरणे मृत्यौ कपोलावयवे गदे ॥ १८ ॥
हनुर्हट्टविलासिन्यां सूनुः पुत्रेऽनुजे रवौ ॥
सानुः शृङ्गे बुधे मार्गे वात्यायां पल्लवे नवे ॥ १९ ॥

दानुर्दातारि विज्ञाते भानुः किरणसूर्ययोः ॥
धेनः समुद्रे नद्यान्तु धेनी स्योनः सिते खगे ॥ २० ॥
मुनिर्यमीङ्गुदीबुद्धपियालागस्ति किंशुके ॥
ज्यानिर्हानौ स्रवन्त्याञ्च योनिः स्यादाकरे भगे ॥ २१ ॥
ज्योत्स्नी पटोलिकायां स्याज्ज्योत्स्नायुक्तविभावरौ ॥
ज्यौत्स्नी सचन्द्रनक्षत्ररात्रौ चन्द्रातपेऽपि च ॥ २२ ॥
रास्ना स्मृता भुजङ्गाक्ष्यामेलापर्ण्याञ्च कथ्यते ॥
मृत्स्ना तु वरिकायां स्यान्मृत्सायामपि दृश्यते ॥ २३ ॥
गीना मूषिकयोषायां दुर्गते कातरेऽन्यवत् ॥
धानाभृष्टयवे प्रोक्ता धान्याकेऽभिनवोद्भिदि ॥ २४ ॥

नत्रिकम् ॥

अवनं रक्षणे प्रीतौ भवनं भाववेश्मनोः ॥
भुवनं विष्टपे मह्यां सलिलेऽपि वियत्यऽपि ॥ २५ ॥
सवनं यज्ञियस्नाने सोमनिर्दलनेऽपि च ॥
अयनं पथि भानोः स्यादुदग्दक्षिणतो गतौ ॥ २६ ॥
जयनं स्यात्तुरङ्गादिसन्नाहे विजयेऽपि च ॥
शयनं सुरते निद्राशय्ययोरपि भाषितम् ॥ २७ ॥
शमनं शान्तिवधयोः शमनः श्राद्धदैवते ॥
दशनः कवचे दन्ते दशनः शिखरेऽपि च ॥ २८ ॥
जघनञ्च स्त्रियाः श्रोणिपुरोभागे कटीरके ॥
तपनस्तरणौ तापे भल्लाते नरकान्तरे ॥ २९ ॥
रसनं स्वादने ध्वाने रसना काञ्चिजिह्वयोः ॥
रसनञ्चाऽपि रास्नायां वसनं छादनेंऽशुके ॥ ३० ॥
हसनञ्च स्मृतं हासेऽङ्गारधान्यां हसन्यपि ॥
श्वसनो मारुते श्वासे श्वसनो मदनद्रुमे ॥ ३१ ॥

कदनं मर्द्दने पापे सदनं मन्दिरे जले ॥
मदनः स्मरधुत्तूरवसन्तद्रुमसिक्थके ॥ ३२ ॥
दहनश्चित्रके वह्नौ भल्लाते दुष्टवेष्टिते ॥
गहनं गहने दुःखे विपिने कलिलेऽपि च ॥ ३३ ॥
स्तननं ध्वनिमात्रे स्यात् कुन्थने मेघगर्जिते ॥
निधनं स्यात् कुले नाशे प्रधनं दारणे रणे ॥ ३४ ॥
पवनाख्या कुलाले स्यात् पाकस्थानेऽपि मारुते ॥
निष्पावे चाथवपनं बीजाधानेऽपि मुण्डने ॥ ३५ ॥
दमनः कुसुमे वीरे वमनं छर्द्दनेऽर्द्दने ॥
स्यादाहतौ च यमनं दुःखे चोपरतौ यमे ॥ ३६ ॥
कमुनः कामुके कामेऽभिरूपेऽशोकपादपे ॥
धमनोऽप्यनले भस्त्राध्मापकक्रूरयोः स्मृता ॥ ३७ ॥
धमनी तु हरिद्रायां कन्धराशिरयोरपि ॥
मलनः पटवासे स्यान्मर्द्दने मलनं मतम् ॥ ३८ ॥
चलनं कम्पनं कम्पे कम्प्रे चलनकम्पनौ ॥
चलनी वस्त्रघर्घर्य्यां वारिभेदेऽपि च क्वचित् ॥ ३९ ॥
सेचनं रक्षणे सेके नौकासेचनभाजने ॥
सेवनं सीवनोपास्त्योः संव्यानं छादनेंऽशुके ॥ ४० ॥
समानं सत्समैकेषु समानो नाभिमारुते ॥
शोभनो ग्रहयोगे स्याच्छोभनं सुन्दरेऽन्यवत् ॥ ४१ ॥
शासनं राजदत्तोर्व्यां लेखाज्ञाशास्त्रशास्त्रिषु ॥
वासनं वसने वीरासने ज्ञाने च धूपने ॥ ४२ ॥
आसनं द्विरदस्कन्धे पीठे यात्रानिवर्त्तने ॥
असनी पण्यवीथ्यां स्यादासनो जीवकद्रुमे ॥ ४३ ॥
स्पर्शनो मारुते स्पर्शधानयोः स्पर्शनं मतम् ॥

दर्शनं नयनस्वप्नबुद्धिधर्मोपलब्धिषु ॥ ४४ ॥
शास्त्रदर्पणयोश्चाऽपि दंशनं दंशवर्मणोः ॥
पिशुनं कुङ्कुमे क्रूरे सूचके चाऽभिधेयवत् ॥ ४५ ॥
पिशुनः कपिवक्त्रे स्यात् स्पृक्कायां पिशुना मता ॥
शकुनश्च शुभाशंसानिमित्ते शकुनः खगे ॥ ४६ ॥
मिथुनो राशिभेदे स्यान्मिथुनं दम्पतीयुगे ॥
तलुनं पवने यूनि स्त्रियाञ्च तलुनीं विदुः ॥ ४७ ॥
तलिनं विरले स्तोके स्वच्छेऽपि तलिनं मतम् ॥
मलिनं दूषिते कृष्णे ऋतुमत्यां मलिन्यऽपि ॥ ४८ ॥
कठिनं निष्ठुरे स्थाल्यां शर्करायां गुडस्य च ॥
कठिना काटिकायान्तु कठिनीति प्रयुज्यते ॥ ४९ ॥
पीतनं हरिताले स्यात् कुङ्कुमे पीतदारुणि ॥
आम्रातके पीतनश्च मैथुनं सङ्गते रते ॥ ५० ॥
केतनं लाञ्छने कार्ये गेहे चोपनिमन्त्रणे ॥
छर्दनोऽलम्बुषे निम्बे छर्दनं वमने तरे ॥ ५१ ॥
छेदनं कर्त्तने भेदे छदनं पक्षपत्रयोः ॥
रोदनं व्यथने तोत्रे रोदनं रोधनेऽश्रुणि ॥ ५२ ॥
अपानन्तु गुदे प्रोक्तमपानस्तस्य मारुते ॥
सन्तानं सन्ततौ गोत्रे स्यादपत्ये सुरद्रुमे ॥ ५३ ॥
वितानो यज्ञविस्तारोल्लोचेषु क्रतुकर्मणि ॥
वृत्तभेदावसरयोर्वितानं तुच्छमन्दयोः ॥ ५४ ॥
उत्तानं स्यादगम्भीरे तथा सुप्तोन्मुखेऽन्यवत् ॥
आदनं ग्रहणे विद्यादलङ्कारे च वाजिनाम् ॥ ५५ ॥
निदानं कारणे रोगनिर्णये वत्सदामनि ॥
उद्यानं वनभेदे स्यान्निःसृतेऽपि प्रयोजने ॥ ५६ ॥

अम्लानो झिण्टिकाभेदे वाच्यवन्निर्मले स्मृतः ॥
व्युत्थानं स्वैरकरणे विरोधाचरणेऽपि च ॥ ५७ ॥
उत्थानमुद्यमे तन्त्रे पौरुषे पुस्तके रणे ॥
अङ्गनोद्गमहर्षेषु मलवेगेऽपि कीर्त्तितम् ॥ ५८ ॥
संस्थानमाहृतौ मृत्यौ सन्निवेशे चतुष्पथे ॥
धावनं प्रगमे शुद्धौ पृश्निपर्ण्यान्तु धावनी ॥ ५९ ॥
पावनन्तु जले कृच्छ्रे पावकाध्माशयोर्विदुः ॥
पावनः सिह्लके वह्नौ प्रायश्चित्ते च पावनम् ॥ ६० ॥
वाच्यवत् पावयितरि हरीतक्यान्तु पावनी ॥
वामनो कोटवैकुण्ठखर्वदाक्षिणदिग्गजे ॥ ६१ ॥
स्थापनं स्यात् पुंसवने समाधौ रोपणेऽपि च ॥
यापनं वर्त्तने कालक्षेपे निरसनेऽपि च ॥ ६२ ॥
युञ्जानः सारथौ विप्रे बुधानः पण्डिते गुरौ ॥
इशानं ज्योतिषि प्रोक्तं इशानश्च विरोचने ॥ ६३ ॥
जवनो देशभेदे स्याद्वेगवेगाधिकाश्वयोः ॥
जवन्योषधिभेदे स्याद्वाच्यवद्वेगिनि स्मृतः ॥ ६४ ॥
जीवनं वर्त्तने नीरे पुत्रजीवे तु जीवनः ॥
जीवनी जीवना चेति जीवन्तीमेदयोः क्रमात् ॥ ६५ ॥
देवनं व्यवहारे स्याज्जिगीषाक्रीडयोरपि ॥
अक्षेषु देवनः प्रोक्तो वाच्यवद् वाग्मिविप्रयोः ॥ ६६ ॥
तेमनं व्यञ्जने क्लेदे तेमने चुल्लिकान्तरे ॥
सावनो यज्ञकर्म्मान्ते यजमानप्रचेतसोः ॥ ६७ ॥
विज्ञानं कर्मणे ज्ञाने प्रज्ञानं लाञ्च्छने धियि ॥
हायनोऽर्च्चिषि वर्षे च व्रीहिभेदे च हायनः ॥ ६८ ॥
फाल्गुनस्तु तपस्ये स्यात् पूर्णिमायान्तु फाल्गुनी ॥

फाल्गुनः कथितः पार्थे नदीजे ककुभेऽपि च ॥ ६९ ॥
वेष्टनं कर्णशष्कुल्यामुष्णीषे परिवारणे ॥
गोस्तनो हारभेदे स्याद् द्राक्षायां गोस्तनीति च ॥ ७० ॥
कल्पनं कर्त्तने क्लृप्तौ सज्जनायान्तु कल्पना ॥
कर्त्तनं छेदने प्राहुर्नारीणां तूलसेवने ॥ ७१ ॥
लङ्घनन्तूपवासे स्यात् क्रमणे प्लवनेऽपि च ॥
मण्डनं स्यादलङ्कारेऽलङ्करिष्णुनि वाच्यवत् ॥ ७२ ॥
भण्डनं कवचे युद्धे खलीकारे च वर्त्तते ॥
मुण्डनं वपने त्राणे हिण्डिनं लेखने रते ॥ ७३ ॥
अङ्गनं प्राङ्गने याने कामिन्यामङ्गना मता ॥
गन्धनं सूचनोत्साहहिंसनेषु प्रकाशने ॥ ७४ ॥
नन्दनं वासवोद्याने नन्दनो हर्षके सुते ॥
स्यन्दनन्तु स्रुतौ नीरे स्यन्दनस्तिनिशे रथे ॥ ७५ ॥
क्रन्दनं रोदने ह्वाने चन्दनं मलयोद्भवे ॥
चन्दनः कपिभेदे स्यान्नदीभेदे तु चन्दनी ॥ ७६ ॥
वर्द्धनं छेदने वृद्धौ वारिधान्यान्तु वर्द्धनी ॥
व्यञ्जनं तेमने चिह्ने श्मश्रुण्यवयवेऽपि च ॥ ७७ ॥
रञ्जनो रागरजने रञ्जनं रक्तचन्दने ॥
गुञ्जारोचानिकानीलीमाञ्जिष्ठासु च रञ्जनी ॥ ७८ ॥
अञ्जनं कज्जले चाङ्के सौवीरे च रसाञ्जने ॥
अञ्जनो दिग्गजे जेष्ठ्यामञ्जनाऽप्यानिलास्त्रियाम् ॥ ७९ ॥
अञ्जनी लेपनायां स्याद् गृञ्जनस्तु रसोनके ॥
विषदिग्धपशोर्मांसे गुञ्जनश्च प्रकीर्त्तितम् ॥ ८० ॥
लेखनं छदने भूर्जे लिपिन्यासे च लेखनम् ॥
योजनश्च चतुष्क्रोश्यां योगे च परमात्मनि ॥ ८१ ॥

गर्ज्जनं निस्वने कोपे वर्ज्जनं त्यागहिंसयोः ॥
मार्ज्जनं कथितं मार्ष्टौ मार्ज्जनो लोध्रशाखिनि ॥ ८२ ॥
सज्जनो वाच्यवत् साधौ सज्जनं घट्टगुल्मके ॥
सज्जना कल्पनायान्तु भाजनं योग्यपात्रयोः ॥ ८३ ॥
अर्ज्जुनः ककुभे पार्थे कार्त्तवीर्य्यमयूरयोः ॥
मातुरेकसुते च स्यादर्ज्जुनो धवलेऽन्यवत् ॥ ८४ ॥
अर्ज्जुनन्तु तृणे नेत्रगदे चाऽप्यार्ज्जुनी गवि ॥
उषायां करतोयायां कुट्टन्यामपि च क्वचित् ॥ ८५ ॥
वृजिनं कल्मषे केशे वृजिनः कुटिलेऽन्यवत् ॥
लाञ्छनं लक्षणे नाम्नि बन्धनं वधबन्धयोः ॥ ८६ ॥
जगन्नुरग्नौ जन्तौ च मेहनं मूत्रशिश्नयोः ॥
प्रसूनं वाच्यवज्जाते प्रसूनं फलपुष्पयोः ॥ ८७ ॥
कानीनः कन्यकाजाततनये व्यासकर्णयोः ॥
काननं विपिने गेहे परमेष्ठिमुखेऽपि च ॥ ८८ ॥
काञ्चनः काञ्चनारे स्याच्चम्पके नागकेशरे ॥
उदुम्बरे च पुन्नागे हरिद्रायाञ्च काञ्चनी ॥ ८९ ॥
काञ्चनं हेम्नि किञ्जल्के पुन्नागे काचभाजने ॥
गोलके चाथ शकुनिः सौबले करणे खगे ॥ ९० ॥
रोचनो रक्तकह्लारे रोचनः कूटशाल्मलौ ॥
मङ्गल्येऽपि च गोपित्ते रोचना रुचिरास्त्रियाम् ॥ ९१ ॥
व्यसनन्त्वशुभे सक्तौ पानस्त्रीमृगयादिषु ॥
दैवानिष्टफले पापे विपत्तौ निष्फलोद्यमे ॥ ९२ ॥
उदानोऽप्युदरावर्त्ते मरुत्सर्पविशेषयोः ॥
उद्धानमुद्धते चुल्ल्यां विलग्नो मध्यलग्नयोः ॥ ९३ ॥
सन्धानं स्वादभिषवे तथा सङ्घटनेऽपि च ॥

राधनं राधने प्राप्तौ राधनं तोषणेऽपि च ॥ ९४ ॥
साधनं निर्वृतौ मेण्ढ्रे सैन्ये सिद्धौ गतौ वधे ॥
उपाये मृतसंस्कारे दापनेऽनुगमे धने ॥ ९५ ॥
प्रधानः स्यान्महामात्ये प्रकृतौ परमात्मनि ॥
प्रज्ञायाश्च प्रधानं स्यादेकत्वेऽनुसदोत्तमे ॥ ९६ ॥
ग्रामीनो ग्रामसम्भूते ग्रामीनः शुनिवायसे ॥
पाठीनो मीनभेदे स्यात् पाठके गुग्गुलुद्रुमे ॥ ९७ ॥
कौलीनः स्यात् कुलीनत्वे गुह्ये जन्ये कुकर्म्मणि ॥
कौशेयके विहङ्गादिपशूनां सङ्गरेऽपि च ॥ ९८ ॥
कौपीनं स्यादकार्ये च गुह्यचीरप्रदेशयोः ॥
विक्लिन्नो जरया जीर्णे शीर्णे चार्द्रे च वाच्यवत् ॥ ९९ ॥
आपन्नः सविपत्तौ स्यात् प्राप्ते वाच्यवदीरितः ॥
विपन्नः कथितो नष्टे विपन्नश्च भुजङ्गमे ॥ १०० ॥
विच्छिन्नश्च समालब्धे विपन्ने कुटिलेऽन्यवत् ॥
सम्पन्नं साधिते प्रोक्तं सम्पत्तिसहितेऽन्यवत् ॥ १०१ ॥
तमोघ्नः सूर्यवह्नीन्दुबुद्धशङ्करविष्णुषु ॥
विषघ्नाख्या शिरीषे स्यात्त्रिवृताऽमृतयोरपि ॥ १०२ ॥
शिखी वह्नौ बलीवर्दे शरे केतुग्रहे द्रुमे ॥
केकिकुक्कुटयोश्चाऽथ शिखी चूडान्वितेऽन्यवत् ॥ १०३ ॥
शाखी स्यात् पादपे वेदे तुरुष्कक्षत्रियेऽपि च ॥
खड्गी खड्गायुधे गण्डे शृङ्गी नागद्रुमाद्रिषु ॥ १०४ ॥
चक्री कुलालवैकुण्ठे कोकाहिग्रामजालिषु ॥
धन्वी धनुर्धरे पार्थे विदग्धे ककुभद्रुमे ॥ १०५ ॥
कृती स्यात् पण्डिते योग्ये पाशी पाशधरेऽप्पतौ ॥
नन्दी हरप्रतीहारे गर्दभाण्डे वटद्रुमे ॥ १०६ ॥

नन्दिनी तु ननन्दायां धेन्वां सुरसरित्यपि ॥
रोही रोहितकेऽश्वत्थवटपादपयोरपि ॥ १०७ ॥
हली बले कृषीके स्यादली वृश्चिकभृङ्गयोः ॥
वर्णी स्याल्लेखके चित्रकरेऽपि ब्रह्मचारिणि ॥ १०८ ॥
शिल्पी स्याद्वाच्यवत् कारौ नायिकायाश्च शिल्पिनी ॥
कामी स्यात् कामुके चक्रवाके पारावतेऽपि च ॥ १०९ ॥
गोमी तु पाशके पूरौ वाग्मी वाचस्पतौ पटौ ॥
चर्म्मी फलकपाणौ स्याद्भूर्ज्जे भृङ्गरटावपि ॥ ११० ॥
अर्थी स्याद्याचके यज्ञे सेवके च विवादिनि ॥
स्वामी प्रभौ विशाखे च रागी रक्ते च कामुके ॥ १११ ॥
ध्वजी शैले रथे विप्रे भुजङ्गमतुरङ्गयोः ॥
भोगी भुजङ्गमे राज्ञि ग्रामिण्यां नापितेऽपि च ॥ ११२ ॥
विहाय महिषीश्चान्यराजयोषिति भोगिनी ॥
द्युवा त्वभिनवे भानौ प्रेत्वा मरुति सारके ॥ ११३ ॥
राजा प्रभौ नृपे चन्द्रे यक्षे क्षत्रियशक्रयोः ॥
अध्वा वर्त्मनि संस्थाने साश्रवस्कन्धकालयोः ॥ ११४ ॥
धन्वा जङ्गलदेशे स्याद्धन्वचापे स्थलेऽपि च ॥
आत्मा देहमनोब्रह्मस्वभावधृतिबुद्धिषु ॥ ११५ ॥
प्रयत्ने चाऽप्यथ ग्रावा प्रस्तरे जलदे गिरौ ॥
ब्रह्माविरिश्चाद्विजयोर्ऋत्विक्चन्द्रार्कयोगयोः ॥ ११६ ॥
ब्रह्मप्रोक्तं तपोऽध्यात्मवेदज्ञानेषु सूरिभिः ॥
अर्वा च कुत्सिते वाहे वृषा कर्णमहेन्द्रयोः ॥ ११७ ॥
युवा स्यात्तरुणे श्रेष्ठे निसर्गबलशालिनि ॥
पर्व स्यादुत्सवे ग्रन्थौ प्रस्तावे लक्षणान्तरे ॥ ११८ ॥
दर्शप्रतिपदोः सन्धौ विषुवत्प्रभृतिष्वपि ॥

भर्म्म स्वर्णे भृतौ भारे चर्म्म स्याद्वल्कलत्वचोः ॥ ११९ ॥
कर्म्म व्याप्ये क्रियायाञ्च वर्त्मनेत्रच्छदाध्वनोः ॥
वर्ष्म देहे प्रमाणातिसुन्दराकारयोरपि ॥ १२० ॥
सद्म स्यान्मन्दिरे नीरे छद्म साध्यापदेशयोः ॥
धाम देहे गृहे रश्मौ स्थाने जन्मप्रभावयोः ॥ १२१ ॥
प्रेम नर्म्मणि च स्नेहे व्योम वारिविहायसोः ॥
पक्ष्म सूत्रादिसूक्ष्मांशे किञ्जल्के नेत्रलोमनि ॥ १२२ ॥
लक्ष्म चिह्ने प्रधाने स्यादशनिः पविविद्युतोः ॥
अरत्निः कफणौ हस्ते सप्रकोष्ठतताङ्गुलौ ॥ १२३ ॥
सेनानीः कार्त्तिकेये स्यात्तथा सेनापतावऽपि ॥
ह्रादिनी वज्रतडितोः कामिनी भीरुवन्दयोः ॥ १२४ ॥
वाहिनी स्यात्तरङ्गिण्यां सेनासैन्यप्रभेदयोः ॥
वर्त्तनी तर्कुपिण्डे स्याद्वर्त्तनी मालिने पथि ॥ १२५ ॥
बोधनी बोधपिप्पल्योर्बोधनं गन्धबोधने ॥
वाणिनी नर्त्तकीमत्तविदग्धवनितासु च ॥ १२६ ॥
रजनी नीलिकालाक्षाहरिद्रायामिनीषु च ॥
नलिनी पद्मिनीपद्मव्योमसिन्धुसरोवरे ॥ १२७ ॥
नलिकायाञ्च नालिनी नलिनं कमले जले ॥
मालिनी वृत्तभेदे स्यान्मालाकारस्त्रियामपि ॥ १२८ ॥
चम्पानगर्य्यां गौर्य्याञ्च मन्दाकिन्याञ्च मालिनी ॥
शङ्खिनी श्वेतपुन्नागे चौरपुष्प्यां वधूभिदि ॥ १२९ ॥
पद्मिनी स्त्रीविशेषे स्यात् सरस्यामम्बुजेऽपि च ॥
हस्तिनी गजयोषायां नारीभेदे च हस्तिनी ॥ १३० ॥
सन्धिनी तु वृषाक्रान्ताकालदुग्धगवोः स्मृता ॥
भट्टिनी द्विजभार्य्यायां नाट्योक्तौ राजयोषिति ॥ १३१ ॥

रेचनी त्रिवृतादन्ती गुडरोचनिकासु च ॥
अर्शोघ्नी तालमूल्यां स्यादर्शोघ्नः शूरणेऽपि च ॥ १३२ ॥
शतघ्नी शस्त्रभेदे स्याद् वृश्चिकाल्यां करञ्जके ॥
असिक्नी स्यादवृद्धान्तःपुरप्रेष्यस्त्रियां धुनौ ॥ १३३ ॥
सूचनाव्यधने दृष्टौ गन्धनेऽभिनयेऽपि च ॥
भावना लेपने ध्याने वेदना ज्ञानदुःखयोः ॥ १३४ ॥
कुहना दम्भचर्य्यायामीर्ष्यालौ कुहनः पुनः ॥
पूतना राक्षसीभेदे हरीतक्याञ्च पूतना ॥ १३५ ॥
पृतनाऽनीकनीसेना चमूसैन्यान्तरेऽपि च ॥
चेतना संविदि प्रोक्ता वाच्यवत् प्राणिनि स्मृता ॥१३६॥
प्रसन्ना मदुरायाञ्च प्रसादसहितेऽन्यवत् ॥
ललना नाडिकाभेदे जिह्वायां वरयोषिति ॥
श्लेष्मघ्नी कथिता मल्ल्यां काम्पिल्लकफणिज्जयोः ॥१३७॥

नचतुष्कम् ॥

महाधनं महामूल्ये सुवस्त्रे सिल्हकेऽपि च ॥
तपोधनस्तापसे स्यान्मुण्डीर्य्याञ्च तपोधना ॥ १३८ ॥
आराधनं तोषणे स्यात् प्राप्तौ च पचनेऽपि च ॥
उपधानं विशेषे च गेडुके प्रणयेऽपि च ॥ १३९ ॥
प्रणिधानं प्रयत्ने स्यात् प्रवेशे च समाहितौ ॥
आयोधनं वधे युद्धेऽवलग्नो मध्यलग्नयोः ॥ १४० ॥
अभिजनः कुले ख्यातौ जन्मभूम्यां कुलध्वजे ॥
भवेत् पुण्यजनो यक्षे राक्षसे सज्जनेऽपि च ॥ १४१ ॥
विसर्ज्जनं परित्यागे दाने सम्प्रेषणेऽपि च ॥
पृथग्जनः स्मृतो नीचे मूर्खे चाऽथ प्रयोजने ॥ १४२ ॥
कार्य्यहेत्वोर्निधुवनं सुरते कम्पनेऽपि च ॥

अनूचानो विनीते स्यात् साङ्गवेदविचक्षणे ॥ १४३ ॥
अपाचीनमवागर्थे विपर्यस्ते च वाच्यवत् ॥
प्रवचनं स्मृतं वेदे प्रकृष्टवचनेऽपि च ॥ १४४ ॥
वैरोचनस्तु सुगते बालिदैत्यार्कपुत्रयोः ॥
विरोचनोऽर्के दहने चन्द्रे प्रह्लादनन्दने ॥ १४५ ॥
आतञ्चनं प्रतीवापजवनाप्यायनेषु च ॥
अभिपन्नोऽपराध्येऽभिद्रुते ग्रस्ते विपद्गते ॥ १४६ ॥
प्रतिपन्नः स्मृतो धीरैर्विज्ञातेऽङ्गीकृतेऽपि च ॥
समापन्नं समासे स्यात् प्राप्ते क्लिष्टे वधेऽपि च ॥ १४७ ॥
भवेत् प्रजननं योनौ जन्मनि प्रगमेऽपि च ॥
आकलनं विबन्धे स्यादाकाङ्क्षापरिसङ्ख्ययोः ॥ १४८ ॥
सम्मूर्च्छनमभिव्याप्तौ सम्मूर्च्छामोहयोरपि ॥
निर्यातनं वैरशुद्धौ दाने न्यासार्पणे मतौ ॥ १४९ ॥
कपीतनं गर्दभाण्डशिरीषाम्रातकेषु च ॥
अश्वत्थे च समुत्थानमुद्यमे रोगनिर्णये ॥ १५० ॥
आच्छादनं सम्पिधाने स्मृतं वस्त्रे प्रवारणे ॥
राजादनं क्षीरिकायां प्रियाले किंशुकेऽपि च ॥ १५१ ॥
क्रौञ्चादनस्तु पिप्पल्यां चिञ्चोटकमृणालयोः ॥
उत्सादनं समुल्लेखोद्वाहनोद्वर्त्तनेषु च ॥ १५२ ॥
वृक्षादनश्चलदले मधुक्षुद्रकुठारयोः ॥
वृक्षादनी स्मृता वन्दाविदारीगन्धयोरपि ॥ १५३ ॥
सदादानोऽभ्रमातङ्गे हेरम्बे गन्धहस्तिनि ॥
अवदानमितिवृत्ते कर्मखण्डनयोरपि ॥ १५४ ॥
कुचन्दनश्च पत्राङ्गे द्रुभेदे रक्तचन्दने ॥
आस्कन्दनं तिरस्कारे रणे संशोषणेऽपि च ॥ १५५ ॥

संवननं समालोचे वशीकारे प्रकीर्त्तितम् ॥
विहेठनन्तु हिंसायां मर्दने च विडम्बने ॥ १५६ ॥
जलाटनो लोहपृष्ठे जलौकायां जलाटनी ॥
प्रस्फोटनं भवेत् सूर्पे ताडने च प्रकाशने ॥ १५७ ॥
उत्पतनं समुत्पत्तौ तथार्द्ध्वगमनेऽपि च ॥
उद्वर्त्तनं सोत्पतनेऽप्यपावृत्तौ विलेपने ॥ १५८ ॥
समादानं समीचीनग्रहणे नित्यकर्मणि ॥
संयमनी व्रते पुर्य्यां संयमनी यमस्य च ॥ १५९ ॥
निशमनं स्तुतौ दृष्टौ दृष्ट्यालोचे निशामनम् ॥
प्रतिमानं प्रतिच्छायागजदन्तान्तरालयोः ॥ १६० ॥
अभिमानः स्मृतो ज्ञाने वर्गे प्रणयहिंसयोः ॥
अधिष्ठानं पुरे चक्रे प्रभावेऽध्यासनेऽपि च ॥ १६१ ॥
वर्द्धमानः पुष्टिभेदे शरावैरण्डविष्णुषु ॥
मालुधानश्चित्रसर्पे मालुधानी लतान्तरे ॥ १६२ ॥
प्रतियत्नस्तु संस्कारलिप्सोपग्रहणेषु च ॥
भवेदुदयनो वत्सराजेऽगस्त्यमुनावऽपि ॥ १६३ ॥
विहननं विघाते स्यात् पिञ्जने तूलधूनने ॥
संवाहनं वाहनेऽपि भारादेरङ्गमर्दने ॥ १६४ ॥
उद्वाहनं दिशीत्ये स्याद्रज्जावुद्वाहिनी मता ॥
महासेनो विशाखे स्यान्महासैन्यपतावपि ॥ १६५ ॥
रसायनं विडङ्गे स्याद्राजव्याधिजितौषधे ॥
रसायनः पाक्षिराजे विषेऽपि च रसायनम् ॥ १६६ ॥
कात्यायनो वररुचौ गौर्यां कात्यायनी मता ॥
काषायवस्त्रविधवाऽर्द्धजरत्यामपीष्यते ॥ १६७ ॥
सुदर्शनो हरेश्चक्रेऽमरावत्यां सुदर्शना ॥

आज्ञायामोषधीभेदे मरुजम्ब्वां सुदर्शना ॥ १६८ ॥
निर्भर्त्सनं खलीकारेऽलक्तके च समापनम् ॥
परिच्छेदे समाप्तौ च समाधाने प्रमापणे ॥ १६९ ॥
अन्वासनं स्नेहवस्तावुपास्तावनुशोचने ॥
उपासनं शराभ्यासे शुश्रूषायाञ्च हिंसने ॥ १७० ॥
निरसनं निरासे स्याद्वधे निष्ठीवनेऽपि च ॥
निर्वासनं हिंसने च नगरादेर्बहिष्कृतौ ॥ १७१ ॥
आवेशनं शिल्पिगृहे भूतावेशप्रवेशयोः ॥
सारसनं मेखलायामुरस्त्रे च तनुत्रिणाम् ॥ १७२ ॥
प्रहसनं भवेद्व्यङ्गे प्रहासाक्षेपयोरपि ॥
वारासनं वाःसदने शूल्मपद्वारपालयोः ॥ १७३ ॥

घनाघनो घातुकमत्तदन्तिनो-
र्निरन्तरे वासववर्षुकाब्दयोः ॥
सनातनः शाश्वतकंसवैरिणोः
शिवे पितॄणामतिथौ मुनिश्चले ॥ १७४ ॥

सुयामुनो वत्सराजे प्रसादेऽभ्यन्तरेऽच्युते ॥
विस्मापनाख्या कुहके गन्धर्वनगरे स्मरे ॥ १७५ ॥
सुकर्मा ग्रहयोगे स्यात् सुकर्मा देवशिल्पिनि ॥
दुर्नामाख्यातिगुदजदीर्घकोशिकयोरपि ॥ १७६ ॥
द्विजन्मा दशने विप्रे भूतात्मा पुद्गले विधौ ॥
आर्यमा सूर्यभक्तायां सूर्ये च पितृदैवते ॥ १७७ ॥
सुदामा भूधरे मेघे विश्वगङ्गाऽनलचन्द्रयोः ॥
सुधन्वा मौढधानुष्के सुधन्वा विश्वकर्मणि ॥ १७८ ॥
वनश्वा गन्धमार्जारे बन्धकव्याघ्रयोरपि ॥
परिश्वा क्रतुकर्मज्ञे याज्ञिके परिचारके ॥ १७९ ॥

अथर्वा ब्राह्मणे वेदे त्वऽथर्व परिकीर्तितम् ॥
सुपर्वा त्रिदशे वंशे शरे धूमेऽपि पर्वणि ॥ १८० ॥
ललाम च ललामश्च लाञ्छनध्वजवाजिषु ॥
शृङ्गे प्रधाने भूषायां रम्ये बालधिपुण्ड्रयोः ॥ १८१ ॥
प्रभावे च कलापी तु प्लक्षबर्हिणयोरपि ॥
प्रत्यर्थी कथितः शत्रौ प्रत्यर्थी प्रतिवादिनि ॥ १८२ ॥
केशरी तुरगे सिंहे पुन्नागे नागकेशरे ॥
शिखरी पादपे शैले तथाऽपामार्गकोट्टयोः ॥ १८३ ॥
शृङ्गारी तु सुवेशे स्यात् क्रमुके च मतङ्गजे ॥
विलासी भोगिनि व्याले पलाशी वृक्षरक्षसोः ॥ १८४ ।
शिखण्डी तु मयूरे स्याद्वाणक्षत्रियभेदयोः ॥
कलापे चाऽथ गुञ्जायां यूथिकायां शिखण्डिनी ॥ १८५ ॥
विषयि त्विन्द्रिये ख्यातं वाच्यवद्विषयान्विते ॥
व्यवायी कामपे द्रव्यविशेषे च समीरितः ॥ १८६ ॥
तपस्वी तापसे चानुकम्पके च तपस्विनी ॥
मांसिका कटुरोहिण्योस्तरस्वी वेगिशूरयोः ॥ १८७ ॥
लाङ्गली बलभद्रे स्यान्नारिकेले च लाङ्गली ॥
कुण्डली वरुणे केकिभोगिनोश्च सकुण्डले ॥ १८८ ॥
चोलकी तु करीरे स्यान्नारङ्गे किष्कुपर्वणि ॥
फलकी स्यादालिसाख्यमत्स्ये फलकपाणिके ॥ १८९ ॥
कञ्चुकी भुजगे षिङ्गे मल्ले जाङ्गलिकद्रुमे ॥
सामयोनिस्तु सामोत्थे सामयोनिर्गजे विधौ ॥ १९० ॥
कुम्भयोनिरगस्त्ये स्यादर्ज्जुनस्य गुरावपि ॥
आत्मयोनिर्विधौ कामे चित्रभानुः खगेऽनले ॥ १९१ ॥
महामुनिरगस्त्ये स्याद्धन्याकागस्त्ययोरपि ॥

कलध्वनिः कोकिले स्यात् पारावतमयूरयोः ॥ १९२ ॥
गदयित्नुः स्मृतः कामे जल्पके कामुकेऽपि च ॥
मदयित्नुर्भवेत् सीधौ मद्ये स्यान्मदयित्नु च ॥ १९३ ॥
हर्षयित्नु सुते हेम्नि घोषयित्नुर्द्विजे पिके ॥
स्तनयित्नुः पयोवाहे तद्ध्वनौ मृत्युरोगयोः ॥ १९४ ॥
विष्वक्सेना फलिन्यां स्याद्विश्वक्सेनो जनार्दने ॥
देवसेनेन्द्रवाहिन्यां सेनायाश्च दिवौकसाम् ॥ १९५ ॥
नागाङ्गना नागयष्टिकरिमुद्दारिकाख्ययोः ॥
श्लेष्मघना मल्लिकायां केतक्यामपि कथ्यते ॥ १९६ ॥
प्रसाधिनी कङ्कतिका सिद्धौ वेशे प्रसाधनम् ॥
सामिधेनी ऋचि प्रोक्ता सामधेनी समिध्यऽपि ॥ १९७ ॥
सरोजिनी स्यात् कासारे पद्मिनीपद्मयोस्तथा ॥
विलेपनी स्यात्तुरला सुवेशाङ्गनयोरपि ॥ १९८ ॥
मातुलानी कलापे स्याद्भङ्गायां मातुलस्त्रियाम् ॥
पयस्विनी तु गोधेन्वां विभावर्यां पयस्विनी ॥ १९९ ॥
गवादनीन्द्रवारुण्यां गवां घोषादनाश्रये ॥
सौदामिन्यऽप्सरोभेदे तडित्तद्भेदयोरपि ॥ २०० ॥

नपञ्चकम् ॥

पीतचन्दनमित्येतत् कालीयकहरिद्रयोः ॥
वरचन्दनमाख्यातं कालीये देवदारुणि ॥ २०१ ॥
हरिचन्दनमाख्यातं गोशीर्षे सुरपादपे ॥
ज्योत्स्नायां कुङ्कुमे चाऽतिसर्ज्जनं वधदानयोः ॥ २०२ ॥
मधुसूदनसंज्ञा च भ्रमरे वनमालिनि ॥
स्यान्मृत्युवञ्चनः शम्भौ श्रीफलद्रोणकाकयोः ॥ २०३ ॥
स्यादपवर्ज्जनं मोक्षे परित्यागे विहायिते ॥

अपसर्ज्जनमास्नाते परिवर्ज्जनदानयोः ॥ २०४ ॥
महारजनमुद्दिष्टं शातकुम्भकुसुम्भयोः ॥
स्यात् प्रतिपादनं दाने प्रतिपत्तौ च बोधने ॥ २०५ ॥
गन्धमादनमित्याहुर्गन्धके वानरान्तरे ॥
आद्रिभेदे च भृङ्गे च सुरायां गन्धमादनी ॥ २०६ ॥
स्यादनुवासनं स्नेहकर्म्मधूपनयोरपि ॥
श्वेतवाहन इत्याख्या सुधाधाम्नि धनञ्जये ॥ २०७ ॥
हरिवाहन इत्युक्तः शचीपतिविवस्वतोः ॥
अभिनिष्ठानशब्दोऽपि विसर्ज्जनीयेऽक्षरे मतः ॥ २०८
धूमकेतनमिच्छन्ति हुताशग्रहभेदयोः ॥
स्यादुपस्पर्शनं स्पर्शे स्नानाचमनयोरपि ॥ २०९ ॥
शिवकीर्त्तननामाऽपि भृङ्गरीटेऽसुरद्विषि ॥
शालङ्कायनशब्दः स्यादृषिभेदे च नन्दिनि ॥ २१० ॥
स्यात्पद्मलाञ्छनाभिख्या विधौ लोकेश्वरार्कयोः ॥
धनदे च सरस्वत्यां तारालक्ष्म्योरपि स्मृता ॥ २११ ।
स्यात् षष्ठहायनो धान्यविशेषेऽपि मतङ्गजे ॥
जानीयादुपसम्पन्नं निहिते च सुसंस्कृते ॥ ३१२ ॥
विश्वकर्म्मा देवशिल्पि मुनिभेदोष्णरश्मिषु ॥
कृष्णवर्त्मा हुताशे स्याद् दुराचारे विधुन्तुदे ॥ २१३
अग्रजन्मा द्विजे ज्येष्ठभ्रातरि ब्रह्मणि स्मृतः ॥
श्वेतधामा कलानाथे घनसाराब्धिभेदयोः ॥ २१४ ॥
तिक्तपर्वा तु यष्ट्याह्वगुडूचीहिलमोचिषु ॥
विष्कुपर्वा भवेद्रेणाविक्षौ पोटगलेऽपि च ॥ २१५ ॥
वृषपर्वा हरे दैत्ये शृङ्गारुणि कसेरुणि ॥
व्योमचारी खगे देवे चिरजीवी द्विकाकयोः ॥ २१६ ॥

कारन्धमे कांस्यकारे धातुवादरतेऽपि च ॥
वनमाली तु गोविन्दे वाराह्यां वनमालिनी ॥ २१७ ॥
प्रचलाकी भुजङ्गे स्याच्चित्रमेखलकेऽपि च ॥
सम्प्रयोगी कलाकेलौ कामुके सुप्रयोजके ॥ २१८ ॥
अन्तेवासी भवेच्छिष्ये चाण्डाले प्रान्तगेऽपि च ॥
विघ्नकारी स्मृतो घोरदर्शनेऽपि विघातिनि ॥ २१९ ॥
कामचारी तु कमने स्वच्छन्दकलविङ्कयोः ॥
हृष्टशृङ्गी भवेद्दंशे नारीषण्डे वृकोदरे ॥ २२० ॥
शकुलादन्यऽभिख्या तु मांसीपिचुलिकाह्वयोः ॥
कटुकाजलपिप्पल्योः कथ्यते शकुलादिनी ॥ २२१ ॥
स्याद्वरवर्णिनी लाक्षाहरिद्रारोचनासु ॥
स्त्रीरत्ने च फलिन्याश्च दृश्यते वरवर्णिनी ॥ २२२ ॥

नषट्कम् ॥

अन्तावसायी श्वपचे मुनिभेदे च नापिते ॥
जायानुजीवी तु नटे दुर्गताश्विनयोर्बके ॥ २२३ ॥
सहस्रवेधी स्यादम्लवेतसे रामटेऽपि च ॥
कलानुनादी रोलम्बे कलविङ्के कपिञ्जले ॥ २२४ ॥

इति नान्तवर्गः ॥

—:०:—

पद्विकम् ॥

रूपं स्वभावे सौन्दर्य्ये नामके पशुशब्दयोः ॥
ग्रन्थावृत्तौ नाटकादावाकारश्लोकयोरपि ॥ १ ॥
रेपः समानिन्दिते क्रूरे रोपो रोपणवाणयोः ॥
सूपो व्यञ्जनभेदे स्यात् सूपकारे च कीर्त्तितः ॥ २ ॥
क्षुपः क्षुपस्पर्शनयोश्चुपः पवनयुद्धयोः ॥

कूपः कूपकगर्ताम्बुमृन्मानगुणवृक्षके ॥ ३ ॥
तापोऽस्तितापे दवथौ तापी तु सरिदन्तरे ॥
शापः शपथ आक्रोशे त्रपुसीसकरङ्गयोः ॥ ४ ॥
स्वापः स्पर्शाज्ञतानिद्राशयनाशनमात्रके ॥
नीपो धूलिकदम्बे स्यान्नीलाशोके च धन्विनि ॥ ५ ॥
गोपो ग्रामौघगोष्ठाधिकृतयोर्वल्लवे नृपे ॥
गोपी गोपालमहिला शारिबारात्तिकासु च ॥ ६ ॥
क्षेपो विलम्बे निन्दायां हेलापे रणलङ्घने ॥
गर्वेऽपि लेपस्तु सुधाभोजनालेपनेषु च ॥ ७ ॥
तल्पन्तु शयनीये स्याच्चलपमट्टकलत्रयोः ॥
कल्पः स्यात् प्रलये न्याये शास्त्रे ब्राह्मदिने विधौ ॥ ८ ॥
दर्पोऽहङ्कारकस्तूर्योर्वाष्पो नेत्रजलोष्मणोः ॥
पुष्पं विकाशे कुसुमे स्त्रीणाञ्च रजसि स्मृतम् ॥ ९ ॥
शष्पं स्यात् प्रतिभाहानौ शष्पं बालतृणेऽपि च ॥
शष्पः स्तवे क्रियायोग्ये शष्पः क्रोधे बलात्कृतौ ॥ १० ॥
कृपा दयायां व्यासर्षौ कृपो भारतपूरुषे ॥
त्रपा लज्जाकुलटयोर्वपा विवरमेदसोः ॥ ११ ॥

पत्रिकम् ॥

कूतपः स्यात् कुशे वाद्ये तपने छागकम्बले ॥
कुतपो भागिनेये स्यादष्टमांशे दिनस्य च ॥ १२ ॥
कुटपो मानभेदे स्यात् कुटपो निष्कुटे मुनौ ॥
विटपः पल्लवे शृङ्गे विस्तारे स्तम्बशाखयोः ॥ १३ ॥
उलपस्तृणभेदे स्याद् गुल्मिन्यामुलपः स्मृतः ॥
उडुपस्तु प्लवे चन्द्रे प्रपातः स्वेदतेजसोः ॥ १४ ॥
रक्तपो रक्षसि प्रोक्तो जलौकायान्तु रक्तपा ॥

जिह्वापः शुनि माज्जरि व्याघ्रचित्रकयोरपि ॥ १५ ॥
काश्यपः स्यान्मुनौ मानभेदे भूमौ तु काश्यपी ॥
पादपः पादपीठेऽद्रौ पादुकायान्तु पादपा ॥ १६ ॥
अनूपं महिषे विद्याज्जलप्राये तु वाच्यवत् ॥
आवापो भाण्डपवने परिक्षेपालवालयोः ॥ १७ ॥
आक्षेपो भर्त्सनाकृष्टिकाव्यालङ्कृतिषु स्मृतः ॥
एकोक्त्या कशिपुर्भक्त्या छादने च द्वयोः पृथक् ॥ १८ ॥
आकल्पः कल्पने वेशे विकल्पो भ्रान्तिपक्षयोः ॥
कच्छपी वल्लकीभेदे दुलौ क्षुद्रगदान्तरे ॥ १९ ॥
मल्लबन्धविशेषेऽपि कच्छपः कुणपी पुनः ॥
विट्शारिकायां कुणपः पूतिगन्धौ शवेऽपि च ॥
कलापो भूषणे बर्हे तूणीरे संहतेऽपि च ॥ २० ॥

पचतुष्कम् ॥

प्राप्तरूपो बुधे रम्येऽप्यभिरूपः सुरूपवत् ॥
बहुरूपः शिवे विष्णौ धूनके सरटे स्मरे ॥ २१ ॥
वृकधूपस्तु सरले द्रवकृत्रिमधूपयोः ॥
परिवापस्तु पर्याप्तौ जलस्थाने परिच्छदे ॥ २२ ॥
उपतापस्त्वरायां स्यादुत्तापगदयोरपि ॥
अवलेपस्तु गर्वे स्याल्लेपने दूषणेऽपि च ॥ २३ ॥
विप्रलापो विरोधोक्तावपार्थवचनेऽपि च ॥
वृषाकपिः शिवे कृष्णे ज्वलने च वृषाकपिः ॥ २४ ॥
परिकम्पो भवे कम्पेऽपलापः प्रेम्ण्यपह्नवे ॥
बीजपुष्पं मरुवके तथा दमनकेऽपि च ॥ २५ ॥
हेमपुष्पं जवापुष्पे चम्पकाशोकयोर्मतम् ॥
नागपुष्पस्तु पुन्नागे नागकेशरचम्पके ॥ २६ ॥

पिण्डपुष्पमशोके च जवायाञ्च कुशेशये ॥
मेघपुष्पन्तु पिण्डाभ्रे नादेयजलयोरपि ॥ २७ ॥
जलकूपी कूपगर्त्ते पुष्करिण्याञ्च कथ्यते ॥

पपञ्चकम् ॥

भवेच्चामरपुष्पस्तु चूते केतकहासयोः ॥ २८ ॥

इति पान्तवर्गः ॥

—:०:—

फद्विकम् ॥

रेफो रवर्णे सम्प्रोक्तः कुत्सिते वाच्यवत् पुनः ॥
शफं मूले तरूणां स्याद्गवादीनां खुरेऽपि च ॥ १ ॥
गुफः स्याद्गुम्फने बाहोरलङ्कारे च कीर्त्यते ॥
शिफा जटायां सरिति मांसिकायाञ्च मातरि ॥ २ ॥

इति फान्तवर्गः ॥

—:०:—

बद्विकम् ॥

पूर्वाख्या पूर्वजेषु स्यादग्रे प्राचि च वाच्यवत् ॥
निम्बः स्यात् पिचुमर्दे च तिक्तके च चिरायते ॥ १ ॥
बिम्बं फले बिम्बिकायां प्रतिबिम्बे च मण्डले ॥
डिम्बः स्याद्विप्लवप्लीह्नोरेरण्डे पुप्फुसे भये ॥ २ ॥
स्तम्बो गुल्मे तृणादीनामप्रकाण्डद्रुमेऽपि च ॥
शम्बः स्यान्मुषलाग्रस्थे लोहमण्डलके पवौ ॥ ३ ॥
शुभान्विते च खर्बः स्याद् ह्रस्वे सङ्ख्यान्तरेऽपि च ॥
कम्बुः शम्बूकगजयोर्ग्रीवानलकशङ्खयोः ॥ ४ ॥
जम्बूः सुमेरुसरिति द्वीप मविशेषयोः ॥
कम्बिरंशे च वंशस्य खजाकायामपीष्यते ॥ ५ ॥

दर्वी भवेत् खजाकायां फणायामुरगस्य च ॥
दार्वी दारुहरिद्रायां देवदारुहरिद्रयोः ॥
चार्वी तु शोभनावृद्ध्योर्लम्बा श्रीतिक्ततुम्बयोः ॥ ६ ॥

बत्रिकम् ॥

कदम्बमाहुः सिद्धार्थे नीपेऽपि निकुरम्बके ॥
कादम्बः कलहंसेष्वोर्द्विजिह्वो भुजगे खले ॥ ७ ॥
गजाह्वा करिपिप्पल्यां गजाह्वं हस्तिनापुरे ॥
नितम्बो रोधसि स्कन्धे शिखरेऽपि कटीरके ॥ ८ ॥
हेरम्बो विघ्नराजे स्यात् कासरे शौर्यगर्विते ॥
कलम्बः शायके नीपे नाऽलिशावकलब्यपि ॥ ९ ॥
प्रलम्बो दैत्यभेदे स्याद् [illegible]योः ॥
प्रलम्बो हारभेदे स्यात्त्रपुषेऽपि पयोधरे ॥ १० ॥
गन्धर्वो मृगभेदे स्यत् पुंस्कोकिलतुरङ्गयोः ॥
अन्तराभवसत्त्वे च गायने खेचरेऽपि च ॥ ११ ॥
गोडुम्बः शीर्णवृन्ते स्याद्गवादन्याः फलेऽपि च ॥
भूजम्बूरपि गोधूमे विकङ्कतफलेऽपि च ॥ १२ ॥

बचतुष्कम् ॥

ललज्जिह्वो मतो हिंस्रे क्रमेलकशुनोरपि ॥
शतपर्वा च दूर्वायां भार्गवेऽस्य स्त्रियामपि ॥ १३ ॥
राजजम्बूस्तु जम्बूभित्पिण्डखर्जूरयोः स्मृता ॥

बपञ्चकम् ॥

धूलीकदम्बो नीपे स्यात्तिनिशे वरुणद्रुमे ॥ १४ ॥
गोरक्षजम्बूर्गोधूमे तथा गोरक्षतण्डुले ॥
शृगालजम्बूर्गोडुम्बे क्वापि घोण्टाफलेऽपि च ॥ १५ ॥

इति बान्तवर्गः ॥

भैककम् ॥

भः स्यान्मयूखे शुक्रे भं नक्षत्रे च प्रकीर्त्तितम् ॥
भूः पृथिव्यां स्थानमात्रे—

भद्विकम् ॥

स्वभू र्वेधसि शार्ङ्गिणि ॥ १६ ॥
शुभो योगे शुभे क्षेमे निभो व्याजसदृक्षयोः ॥
विभुः शिवे प्रभौ नित्ये शम्भुर्ब्रह्मार्हतोर्हरे ॥ १७ ॥
दम्भस्तु कैतवे कल्के डिम्भो बालिशपोतयोः ॥
जम्भो दैत्यान्तरे दम्भे जम्बीरे भक्षणेऽपि च ॥ १८ ॥
कुम्भः स्यात् कुम्भकर्णस्य सुते वेश्यासुते घटे ॥
राशिभेदे द्विपाङ्गे च कुम्भं त्रिवृति गुग्गुलौ ॥ १९ ॥
गर्भो भ्रूणेऽर्भके कुक्षौ सन्धौ पनसकण्टके ॥
जृम्भो मुखविकाशे च स्तम्भः स्थूणाजडत्वयोः ॥ २० ॥
रम्भा कदल्यप्सरसो रम्भो वैणवदण्डके ॥
सभा सामाजिके द्यूते गोष्ठीमन्दिरयोरपि ॥ २१ ॥
शोभा कान्तीच्छयोरुक्ता दृम्भूः पन्नगवज्रयोः ॥
नाभिः प्राण्यङ्गजे क्षत्रे चक्रान्तचक्रवर्त्तिनोः ॥
नाभिः प्रधाने कस्तूरीमदे च क्वचिदीरितः ॥ २२ ॥

भत्रिकम् ॥

करभा मणिबन्धादिकनिष्ठान्ते तथोष्ट्रके ॥
करभः शरभस्त्वष्टापदे प्रोक्तो मृगान्तरे ॥ २३ ॥
ऋषभः स्वरभेदे स्यादष्टवर्गौषधे वृषे ॥
श्रेष्ठार्थे च वराहस्य पुच्छे रन्ध्रे च कर्णयोः ॥ २४ ॥
ऋषभी शूकशिम्ब्यां स्यान्नराकारास्त्रियामपि ॥
विधवायां शिरालायां वृषभः पुङ्गवे वृषे ॥ २५ ॥

वल्लभो दयितेऽध्यक्षे कुलीनाश्वे च वल्लभः ॥
दुर्लभः कर्चूरे न्याये दुष्प्रापे वल्लभेऽपि च ॥ २६ ॥
निकुम्भः कथितो दैत्ये कुम्भकर्णसुतेऽपि च ॥
कुसुम्भो हेमनि महारजने च कमण्डलौ ॥ २७ ॥
विष्टम्भः प्रतिबन्धे च वैदर्भे च प्रयुज्यते ॥
विश्रम्भः केलिकलहे विश्वासे प्रणये वधे ॥ २८ ॥
विष्कम्भो योगभेदे स्याद्विस्तारप्रतिबन्धयोः ॥
रूपकाङ्गप्रभेदे च बन्धभेदे च योगिनाम् ॥ २९ ॥
ककुभो रागभेदेऽपि वीणाङ्गेऽर्जुनपादपे ॥
आरम्भस्तु त्वरायां स्यादुद्यमे वधदर्पयोः ॥ ३० ॥
सुरभिश्चम्पके स्वर्णे जातीफलवसन्तयोः ॥
गन्धोत्पले सौरभेय्यां शल्लकीमातृभेदयोः ॥ ३१ ॥
सुगन्धे च मनोज्ञे च वाच्यवत् सुरभिः स्मृतः ॥
सनाभिः सदृशे ज्ञातावात्मभूर्वेधसि स्मरे ॥ ३२ ॥
वर्षाभूः पुनर्नवायां प्लवे किञ्चुलुकेऽपि च ॥
दुन्दुभिर्दितिजे भेर्यामक्षबिन्दुत्रिकद्वये ॥ ३३ ॥
वैदर्भं वाक्यवक्रत्वे विदर्भश्च नृपान्तरे ॥
गर्द्दभो गन्धभेदे स्याद्गर्द्दभं कैरवे खरे ॥ ३४ ॥
गर्द्दभो गर्दभी क्षुद्ररोगजन्तुविशेषयोः ॥
ककुब् शोभादिशोः शास्त्रे प्रवेण्यां चम्पकस्रजि ॥ ३५ ॥

भचतुष्कम् ॥

अवष्टम्भः सुवर्णे च स्तम्भप्रारम्भयोरपि ॥
शातकुम्भं सुवर्णे स्याच्छातकुम्भोऽश्वमारके ॥ ३६ ॥

इति भान्तवर्गः ॥

—:०:—

मैककम् ॥

मः शिवे मा रमायाश्च मा निषेधेऽव्ययं मतम् ॥

मद्विकम् ॥

किं स्याद्वितर्के प्रश्ने च क्षेपे निन्दाप्रकारयोः ॥ १ ॥
दमस्तु दमथे दण्डे कर्दमे दमनेऽपि च ॥
गमो द्यूतप्रभेदे स्यादपर्यालोचितेऽध्वनि ॥ २ ॥
द्रुमस्तरौ पारिजाते द्रुमः किम्पुरुषेश्वरे ॥
भ्रमोऽम्बुनिर्गमे भ्रान्तौ कुन्दाख्ये शिल्पियन्त्रके ॥ ३ ॥
हिमं शीते तुषारे च चन्दने च हिमं विदुः ॥
रमः कान्ते रमा लक्ष्म्यां रक्ताशोकद्रुमे स्मरे ॥ ४ ॥
यमो दण्डधरे ध्वाङ्क्षे संयमे यमजेऽपि च ॥
शरीरसाधनापेक्षनित्यकर्मणि चोच्यते ॥ ५ ॥
क्रमः शक्तौ परीपाट्यां क्रमश्चलनकम्पयोः ॥
क्षौममट्टे दुकूले स्यादतसीवसनेऽपि च ॥ ६ ॥
क्षेमा स्यान्मङ्गले लब्धरक्षणे चौरकेऽपि च ॥
क्षेमा धनहरीगौर्योः क्षमः ख्यातः क्षमान्विते ॥ ७ ॥
क्षितिः क्षान्तौ क्षमाख्याता हिते शक्ते च वाच्यवत् ॥
आमो रोगे तद्विशेषे आमोऽपक्के च वाच्यवत् ॥ ८ ॥
कामः स्मरेऽभिलाषे च कामं रेतोनिकामयोः ॥
अव्ययन्त्वभ्यनुज्ञायां यामस्तु प्रहरे व्रते ॥ ९ ॥
श्यामः स्यान्मेचके वृद्धदारके हरिते घने ॥
वटद्रुमे प्रयागस्य श्यामः श्यामा तु बल्गुलौ ॥ १० ॥
अप्रसूताङ्गनायाश्च तथा सोमलतौषधौ ॥
त्रिवृता शारिबागुन्द्रानिशाकृष्णाप्रियङ्गुषु ॥ ११ ॥
श्यामा नील्याम्बिके श्यामं मरीचे लवणान्तरे ॥

श्यामो दमनके गन्धतृणे श्यामेऽभिधेयवत् ॥ १२ ॥
गुल्मः स्तम्बे प्लीह्नि घट्टसैन्ययोः सैन्यरक्षणे ॥
गुल्मी स्यादामलक्येलापर्णिकावस्त्रवेश्मसु ॥ १३ ॥
जाल्मः स्यात् पामरे क्रूरे जाल्मोऽसमीक्ष्यकारिणि ॥
ग्रामः स्वरे संवसथे वृन्दे शब्दादिपूर्वकः ॥ १४ ॥
भीमोऽल्पवेतसे शम्भौ घोरे चापि वृकोदरे ॥
युध्मः सङ्ग्रामधनुषो रिष्मः कामवसन्तयोः ॥ १५ ॥
तोक्मं कर्णमले तोक्मो हरिते च हरिद्यवे ॥
रुक्मञ्च काञ्चने लोहे खर्म्म क्षौमे च पौरुषे ॥ १६ ॥
धर्म्मः पुण्ये यमे न्याये स्वभावाचारयोः क्रतौ ॥
उपमायामहिंसायां चापे चोपनिगद्यते ॥ १७ ॥
घर्म्मः स्यादातपे ग्रीष्मे उष्णस्वेदाम्भसोरपि ॥
जिह्मस्तु कुटिले मन्दे जिह्मं तगरपादपे ॥ १८ ॥
सूक्ष्मं स्यात् कैतवेऽध्यात्मेऽप्यणौ सूक्ष्मोल्पकेऽन्यवत् ॥
भीष्मस्तु भीषणे रुद्रे गाङ्गेये च निशाचरे ॥ १९ ॥
शुष्मं तेजोऽर्कयोरुक्तं सूर्मं क्षीरे नभस्यऽपि ॥
दस्मस्तु यजमाने स्यादपि चौरे हुताशने ॥ २० ॥
रामः पशुविशेषे स्याज्जामदग्न्ये हलायुधे ॥
राघवे चाऽसितश्वेतमनोज्ञेषु च वाच्यवत् ॥ २१ ॥
रामाऽङ्गनाहिङ्गुलिन्यो रामं वास्तुककुष्ठयोः ॥
वामं सव्ये प्रतीपे च द्रविणे चाऽतिसुन्दरे ॥ २२ ॥
पयोधरे हरे कामे विद्याद्वामापि च स्त्रियाम् ॥
वामी शृगालीवडवारासभीकरभीषु च ॥ २३ ॥
पद्मः स्यात् पन्नगे व्यूहे निधौ सङ्ख्यान्तरेऽम्बुजे ॥
पद्मके बिन्दुजालेऽपि पद्मा भाङ्गीश्रियोरपि ॥ २४ ॥

सोमः कुबेरे पितृदेवतायां
वसुप्रभेदे च सुधाकरे च ॥
दिव्यौषधीसे[illegible]र-
कर्पूरनीरेषु च वानरे च ॥ २५ ॥
भूमिः क्षितौ स्थानमात्रे वमिर्वान्तौ हुताशने ॥
रश्मिरंशौ प्रग्रहे च जामिः स्वसृकुलस्त्रियोः ॥ २६ ॥
नेमिस्त्रिकायां कूपस्य चक्रान्ते तिनिशद्रुमे ॥
नेमः कालेऽवधौ गर्त्ते प्राकारे कैतवेऽपि च ॥ २७ ॥
कृमिः स्यात्तृणकीटे च लाक्षायां कृमिले खरे ॥
कामिः स्यात् कामुके रत्यां होमिः सर्पिषि पावके ॥२८॥
ऊर्म्मिस्तरङ्गे पीडायां वेगभङ्गप्रकाशयोः ॥
उत्कण्ठावस्त्रसङ्कोचलेखयोरपि कीर्तिता ॥ २९ ॥
लक्ष्मीः श्रीशिवसम्पत्तिपद्माशोभाप्रियङ्गुषु ॥
किर्मी पलाशे शालायां हेमपुत्र्यामुदीरिता ॥ ३० ॥
शमी शक्तुफलायाञ्च शिम्बायामपि वल्गुलौ ॥
ब्राह्मी तु भारतीसोमवल्लरीब्रह्मशक्तिषु ॥ ३१ ॥
फाञ्जिकापङ्कजाटिकाशाकभेदेषु च स्मृता ॥
समा वर्षे समं तुल्ये साधौ च सदृशेऽन्यवत् ॥ ३२ ॥
सीमा घोटे स्थितौ क्षेत्रे मर्यादावेलयोरपि ॥
क्षुमाऽतसीनालिकयोर्नृनाम्नि परमद्युतौ ॥ ३३ ॥
उमाऽतसीहैमवतीहरिद्राकीर्त्तिकान्तिषु ॥
रुमा सुग्रीवदारेषु विशिष्टे लवणाकरे ॥ ३४ ॥

मान्त्रिकम् ॥

उत्तमा दुग्धिकायां स्यादुत्कृष्टे चोत्तमेऽन्यवत् ॥
मध्यमः स्यात् स्वरे मध्ये मध्यदेशे च भेदजे ॥ ३५ ॥

वाच्यवन्मध्यमातूक्ता राकादृष्टरजःस्त्रियोः ॥
कर्णिका त्र्यक्षरच्छन्दःकरमध्याङ्गुलीषु च ॥ ३६ ॥
अधमः कुत्सिते न्यूने प्रक्रमोऽवसरे क्रमे ॥
विक्रमः क्रान्तिमात्रे स्याद्विक्रमः शक्तिसम्पदि ॥ ३७ ॥
सङ्क्रमः क्रमणे सम्पद्वारिसञ्चारयन्त्रके ॥
निष्क्रमो बुद्धिसम्पत्तौ निर्गमे दुष्कुलेऽपि च ॥ ३८ ॥
आगमः शास्त्र आयाते विभ्रमो भ्रान्तिहावयोः ॥
सम्भ्रमः साध्वसेऽपि स्यात् संवेगादरयोरपि ॥ ३९ ॥
विद्रुमो रत्नवृक्षेऽपि प्रवाले पल्लवेऽपि च ॥
आश्रमो ब्रह्मचर्यादिचतुष्केऽपि मठेऽपि च ॥ ४० ॥
सत्तमश्चान्यवत् पूज्ये श्रेष्ठसाधीयसोरपि ॥
नियमो मन्त्रणायां स्यात् प्रतिज्ञायाञ्च संयमे ॥ ४१ ॥
निगमो वाणिजे पुर्यां कटे वेदे वणिक्पथे ॥
नैगमः स्यादुपनिषद्वणिजोर्नागरेऽपि च ॥ ४२ ॥
कलमो लेखनीचौरशालिकाक्षरकेषु च ॥
तलिमं कुट्टिमे तल्पे चन्द्रहासे वितानके ॥ ४३ ॥
परमं स्यादनुज्ञातेऽप्यव्ययं परमः परे ॥
परमं स्यात् प्रधानाद्योरोङ्कारेऽपि तथोच्यते ॥ ४४ ॥
कुसुमं पुष्पफलयोः स्त्रीरजोनेत्ररोगयोः ।
कृत्रिमं रचिते प्रोक्तं सिह्लके लवणान्तरे ॥ ४५ ॥
सुषमं चारुसमयोः सुषमा परमद्युतौ ॥
सुषीमः शिशिरे चारौ सुषीमः पन्नगान्तरे ॥ ४६ ॥
पञ्चमो रागभेदे स्यात् पञ्चानामपि पूरणे ॥
पञ्चमश्चतुरे हृद्ये पञ्चमी पाण्डवस्त्रियाम् ॥ ४७ ॥
गौतमः शाक्यसिंहे च मुनिभेदेऽथ गौतमी ॥

रोचन्यामम्बिकायाश्च दाडिमः करकैलयोः ॥ ४८ ॥
गोधूमो नागरङ्गे स्याद्भेषजव्रीहिभेदयोः ॥
व्यायामो दुर्गसञ्चारे व्यायामः पौरुषेऽपि च ॥ ४९ ॥
विलोमस्तु प्रतीपे स्याद् भुजङ्गे वरुणे शुनि ॥
आमलक्यां विलोमी च विलोमं चारुघट्टके ॥ ५० ॥
गोलोमी श्वेतदूर्वायां षड्ग्रन्थावारयोषितोः ॥
प्रतिमा दन्तबन्धे स्याद्गजस्यानुकृतावपि ॥ ५१ ॥

मचतुष्कम् ॥

प्लवङ्गमः कपौ भेकेऽनुपमः सुन्दरेऽन्यवत् ॥
सुप्रतीकस्य योषायां भवेदनुपमाऽपि च ॥ ५२ ॥
अभ्यागमोऽन्तिके घाते विरोधाभ्युद्गमादिषु ॥
यातयामस्तु जीर्णे स्यात् परिभुक्तोज्झितेषु च ॥ ५३ ॥
दण्डयामस्तु कीनाशे दिवसे कुम्भसम्भवे ॥
सार्वभौमस्तु दिङ्नागे सार्वपृथ्वीपतावपि ॥ ५४ ॥
पराक्रमो विक्रमे स्यात् सामर्थ्योद्योगयोरपि ॥
उपक्रमः स्यादुपधाचिकित्सारम्भविक्रमे ॥ ५५ ॥
जलगुल्मो जलावर्त्ते कच्छपे जलचत्वरे ॥
महापद्मः स्मृतो नागनिधिसङ्ख्यान्तरेषु च ॥ ५६ ॥

मपञ्चकम् ॥

अभ्युपगमः स्वीकारे समीपागमनेऽपि च ॥
नक्षत्रनेमिः शीतांशौ रेवत्याश्च ध्रुवे क्वचित् ॥ ५७ ॥

इति मान्तवर्गः

—:०:—

यैककम् ॥

यः सर्वनामानिलयोर्ज्या मौर्वीमातृभूमिषु ॥

द्युरग्नौ दिवसेऽपि स्याद् द्यौः स्वर्गसुरवर्त्मनोः ॥ १ ॥

यद्विकम् ॥

जयो जयन्तौ विजये जया दुर्गाग्निमन्थयोः ॥
जयन्ती तिथिभेदोमासखीपथ्यासु च स्मृता ॥ २ ॥
चयः समूहे प्राकारे मूलबन्धे समाहृतौ ॥
नयो नीतौ द्यूतभेदे शयः शय्याहिपाणिषु ॥ ३ ॥
भयं प्रतिभये घोरे प्रसूने कुब्जकस्य च ॥
मयः शिल्पिनि दैत्यानां करभेऽश्वतरेऽपि च ॥ ४ ॥
लयो विनाशे संश्लेषे साम्ये तौर्य्यत्रिकस्य च ॥
स्मयो गर्वेऽद्भुते गेयो गातव्ये गायनेऽपि च ॥ ५ ॥
क्षयो रोगान्तरे वेश्मकल्पान्तापचयेष्वपि ॥
प्रियो धवे सौहृद्ये च वृद्धिनामौषधेऽपि च ॥ ६ ॥
कायः कदैवते मूर्त्तौ सङ्घे लक्ष्यस्वभावयोः ॥
कायो मनुष्यतीर्थेऽपि सायः काण्डापराह्णयोः ॥ ७ ॥
दायो दाने यौतकादिधने सोल्लुण्ठभाषणे ॥
विभक्तापितृद्रव्यश्च दायमाहुर्मनीषिणः ॥ ८ ॥
प्रायश्चाऽनशने मृत्यौ तुल्यबाहुल्ययोरपि ॥
पेयं पातव्यपयसोः पेया श्राणोत्थमण्डयोः ॥ ९ ॥
स्थेयो विवादस्य पदनिर्णेतारि पुरोहिते ॥
पीयुः काले रवौ घूके ययुः क्रतुहये हये ॥ १० ॥
मयुस्तुरङ्गवदने मृगेऽपि मयुरुच्यते ॥
मन्युः क्रोधे क्रतौ दैन्ये मृत्युर्मरणदेवयोः ॥ ११ ॥
दस्युः स्तेने च शत्रौ च जन्युः प्राण्यग्निधातृषु ॥
वन्यं वनभवे वन्या वनवारिसमूहयोः ॥ १२ ॥
जन्यं हट्टे परीवादे संयुजे जनके पुनः ॥

जन्यः स्याच्छयनीये च जन्या मातृसखीमुदोः ॥ १३ ॥
जन्यो वरधूज्ञातिप्रियभृत्यहितेऽपि च ॥
शून्याख्या निर्ज्जने नल्यामन्यो भिन्नासमानयोः ॥ १४ ॥
पश्यं पानीयकेऽलिन्दे पूज्यः श्वशुरवन्द्ययोः ॥
हार्यो बिभीतकतरौ हर्तव्ये हार्य्यमन्यवत् ॥ १५ ॥
वीर्यं शुक्रे प्रभावे च तेजःसामर्थ्ययोरपि ॥
आर्यः साधौ सौविदल्लेऽप्यार्योमावृत्तभेदयोः ॥ १६ ॥
अर्यः स्वामिनि वैश्ये च कार्यं हेतौ प्रयोजने ॥
सूर्यः सूरे तत्प्रियायां सूर्या स्यादोषधावपि ॥ १७ ॥
शौर्य्यं चारभटीशक्त्योर्वर्यः स्मरवरेण्ययोः ॥
गुह्यं रहस्युपस्थे च गुह्यः कमठदम्भयोः ॥ १८ ॥
सह्यः शैलान्तरारोग्यसोढव्येषु प्रचक्ष्यते ॥
गुह्यं पुरीषमार्गेऽपि भवेदस्वैरपक्षयोः ॥ १९ ॥
गृह्या च शाखानगरे गृह्यश्छेकेऽप्युदीरितः ॥
योग्यः प्रवीणे योग्यार्होपायशक्तेषु चान्यवत् ॥ २० ॥
योग्यमुद्याख्यभैषज्ये योग्याभ्यासार्कयोषितोः ॥
भाग्यं शुभात्मकविधौ स्याच्छुभाशुभकर्मणि ॥ २१ ॥
पाठ्यं पिण्डाख्यलवणे यवक्षारेऽपि दृश्यते ॥
पथ्यं हिते हरीतक्यां पथ्यापथ्योरथोद्वहे ॥ २२ ॥
रथ्या रथौघे विशिखा वर्त्तनीचत्वरेषु च ॥
अर्थ्यं शिलाजतुन्यर्थे बुधे न्याय्ये तु वाच्यवत् ॥ २३ ॥
ग्राम्यो जनेऽन्यवद्ग्राम्यमश्लीलरथबन्धयोः ॥
सौम्यो बुधे मनोज्ञे स्यादनुग्रे सोमदैवते ॥ २४ ॥
इल्वलासु च सौम्याः स्युर्नीचे बोध्ये च वाच्यवत् ॥
रम्यं मनोरमे रम्या रात्रौ रम्यश्च चम्पके ॥ २५ ॥

सङ्घयं समिति सङ्ख्या स्यादेकत्वादिविचारयोः ॥
मध्यं न्याय्येऽवकाशे चावलग्ने लग्नकेऽधमे ॥ २६ ॥
मेध्यं शुचौ मेदुरे च वाच्यवन्मेध्यमाश्रमे ॥
साध्याऽभिख्या साधनीये योगे गणदैवतयोः ॥ २७ ॥
वन्ध्योऽफलद्रुमे वन्ध्या त्वप्रजातस्त्रियामपि ॥
हृद्यं धवलजीरे च हृत्प्रिये हृद्भवेऽपि च ॥ २८ ॥
वशकृद्वेदमन्त्रे च हृद्यं वृद्धाख्यभेषजे ॥
चोद्यं स्यादद्भुते प्रश्ने चोदनार्हे तु वाच्यवत् ॥ २९ ॥
पद्यं श्लोके स्तुतौ पद्या पद्युः शूद्रे निगद्यते ॥
पुण्यं मनोज्ञेऽभिहितं तथा सुकृतधर्मयोः ॥ ३० ॥
धिष्ण्यं पद्मानि नक्षत्रे स्थाने शक्तौ च पावके ॥
धान्यं व्रीहिसुधान्याके धन्यो धनवति स्मृतः ॥ ३१ ॥
धन्या धात्र्यामलक्योश्च कुड्यं भित्तौ विलेपने ॥
काव्यं ग्रन्थे गृहे काव्यः काव्या स्यात् पूतनाधियोः ॥३२॥
चव्यन्तु चविके चव्या शतपर्वोग्रगन्धयोः ॥
गव्यश्च गोहिते गव्यं तथा क्षीरादिके गवाम् ॥ ३३ ॥
रागद्रव्ये च गव्या तु गोकुले कथिता बुधैः ॥
द्रव्यं स्याद् द्रविणे भव्ये पृथिव्यादौ च पित्तले ॥ ३४ ॥
भेषजे च निवेद्ये च जतुद्रुमविकारयोः ॥
भव्यं सत्ये शुभे चाऽथ भेद्यवद्योग्यभाविनोः ॥ ३५ ॥
कर्मरङ्गतरौ भव्यो भव्या करिकणोमयोः ॥
दिव्यं लवङ्गके दिव्यं वल्गौ दिविभवेऽन्यवत् ॥ ३६ ॥
आमलक्यां स्मृता दिव्या सव्यं वामप्रतीकयोः ॥
सेव्यं प्रोक्तमुशीरे च सेवार्हे पुनरन्यवत् ॥ ३७ ॥
गोप्यो दासीसुते गोप्यो रक्षणीयेऽभिधेयवत् ॥

रूप्यं स्यादाहते स्वर्णरजते रजतेऽपि च ॥ ३८ ॥
रूप्यं प्रशस्तरूपे तु वाच्यवत् समुदीरितम् ॥
इभ्य आढ्ये करेण्वान्तु भवेदिभ्या तु शल्लकौ ॥ ३९ ॥
लभ्यं युक्ते च लब्धव्ये चार्घ्यमर्घार्थयोग्ययोः ॥
चित्यं मृतकचैत्ये स्याच्चित्या मृतचितावपि ॥ ४० ॥
चैत्यमायतने बुद्धबिम्बे चोद्देशपादपे ॥
दैत्योऽसुरे सुरायान्तु दैत्या चण्डौषधावपि ॥ ४१ ॥
भृत्यो दासे भृतौ भृत्या दन्त्यो दन्तभवेऽधमे ॥
सत्यश्च शपथे तथ्ये कृते तद्वति वाच्यवत् ॥ ४२ ॥
तपोलोकात् परे सत्यो नित्यन्तु सतते ध्रुवे ॥
मूल्यन्तु वेतने वस्त्रे माल्यं मालाप्रसूनयोः ॥ ४३ ॥
बल्यं प्रधाने धातौ स्याद् बल्यं बलकरेऽपि च ॥
कल्यं सज्जे प्रभाते च कल्यो नीरोगदक्षयोः ॥ ४४ ॥
कल्या कल्याणवाचि स्यात् कादम्बर्य्यामपि स्मृता ॥
शल्यं शङ्कौ शरे वंशकम्बिकायाश्च तोमरे ॥ ४५ ॥
शल्यस्तु कथितः श्वाविन्मदनद्रुमयोरपि ॥
कुल्यः कुलोद्भवेऽमात्ये कुलस्यातिहितेऽपि च ॥ ४६ ॥
कुल्यं स्यात् कीकसेऽप्यष्टद्रोणीशूर्पामिषेषु च ॥
पयः प्रणालीसरितोः कुल्याजीवन्तिकौषधौ ॥ ४७ ॥
वेश्यं वेश्यागृहे वेश्या गणिकायामुदीरिता ॥
आस्यं वक्त्रे वक्त्रमध्ये स्थितावास्या च विश्रुता ॥ ४८ ॥
लास्यं तौर्यत्रिके नाट्ये शस्यं शस्ते फले गुणे ॥
कश्यं मध्ये तुरङ्गाणां कश्यं मध्यकशार्हयोः ॥ ४९ ॥
कांस्यन्तु तैजसद्रव्ये वाद्यभित्पानपात्रयोः ॥
मत्स्यो मीनान्तरे मीने विराटाभिख्ययादवे ॥ ५० ॥

तिष्यः पुष्ये कलौ धात्र्यां तिष्या पुष्यवदिष्यते ॥
दूष्यन्तु दूषणीये स्याद् दूष्यं वस्त्रे च तद्गृहे ॥ ५१ ॥
वीक्ष्यन्तु विस्मये दृश्ये वीक्ष्यो लासकवाजिनोः ॥
तार्क्ष्यः स्यादश्वकर्णाख्यवृक्षे रथतुरङ्गयोः ॥ ५२ ॥
तार्क्ष्यं रसाञ्जने तार्क्ष्यो गरुडे गरुडाग्रजे ॥
लक्ष्यं शरव्ये सङ्ख्यायां लक्ष्यं छद्मनि सम्मतम् ॥ ५३ ॥
याम्याऽवाच्यां भरण्याञ्च याम्योऽगस्त्ये च चन्दने ॥
इज्या दानेऽध्वरेऽर्च्चायां सङ्गे चेज्यो गुरौ मतः ॥ ५४ ॥
व्रज्या पर्यटने प्रोक्ता वर्गप्रस्थानयोरपि ॥
शय्या तल्पे शब्दतल्पे स्यान्माया शाम्बरीधियोः ॥ ५५ ॥
कन्या कुमारिकानार्योरोषधीराशिभेदयोः ॥
कक्ष्या बृहन्तिकायां स्यात् कक्ष्या मध्येभबन्धने ॥ ५६ ॥
हर्म्यादीनां प्रकोष्ठे च कृत्यं विद्विष्टकार्ययोः ॥
कृत्याऽपि देवताभेदे कृत्या स्तव्यादिषु स्मृता ॥ ५७ ॥
विन्ध्या तु शैलवल्याञ्च विन्ध्यो रुक्शैलभेदयोः ॥
सन्ध्या नदीकालभिदोश्चिन्तामर्यादयोरपि ॥ ५८ ॥
प्रतिज्ञायाञ्च सन्धाने सन्ध्या तु कुसुमान्तरे ॥
छाया स्यादातपाभावे प्रतिबिम्बार्कयोषितोः ॥ ५९ ॥
'।लनोत्कोचयोः कान्तिसच्छोभापङ्क्तिषु स्मृता ॥
क्रिया कर्मणि चेष्टायां करणे सम्प्रधारणे ॥ ६० ॥
आरम्भोपायशिक्षार्थचिकित्सानिष्कृतिष्वपि ॥
माया दम्भे कृपायाञ्च मायः पीताम्बरेऽम्बरे ॥
त्रयी त्रिवेद्यां त्रितये पुरन्ध्र्यां सुमतावपि ॥ ६१ ॥

यत्रिकम् ॥

विजयस्तु जये पार्थे गौर्यान्तु विजया तिथौ ॥

विनयं प्रणतौ प्राहुः शिक्षायां विनया मता ॥ ६२ ॥
विषयः स्यादिन्द्रियार्थे देशे जनपदेऽपि च ॥
गोचरे च प्रबन्धाद्ये यस्य ज्ञातस्तु तत्र च ॥ ६३ ॥
अनयो व्यसने दैवे अशुभे चापदि स्मृतः ॥
सन्नयः समवायेऽपि पृष्ठस्थायिबलेऽपि च ॥ ६४ ॥
प्रणयः प्रेम्णि विश्रम्भे याच्ञाप्रसरयोरपि ॥
वलयः कण्ठरोगे स्याद्वलयं कङ्कणेऽपि च ॥ ६५ ॥
मलयो देश आरामे शैलांशे पर्वतान्तरे ॥
मलया त्रिवृतायां स्याद्विस्मयोद्भुतगर्वयोः ॥ ६६ ॥
प्रलयो मृत्युकल्पान्तमूर्च्छार्थेषु प्रयुज्यते ॥
अभयं स्यादुशीरे च पथ्यायामभयं स्त्रियाम् ॥ ६७ ॥
निर्भये वाच्यवत् प्रोक्तं हृदयं मानसोरसोः ॥
स क्रायामुदयः पूर्वपर्वते चोन्नतावपि ॥ ६८ ॥
प्रत्ययः शपथे रन्ध्रे विश्वासाचारहेतुषु ॥
प्रथितत्वे सनादौ चाऽप्यधीनज्ञानयोरपि ॥ ६९ ॥
अतिक्रमे च दण्डे च विनाशे दोषकृच्छ्रयोः ॥
आशयः स्यादभिप्राये मानसाधारयोरपि ॥ ७० ॥
निकायो निलये लक्ष्ये संहतानां समुच्चये ॥
एकार्थभाजि निवहे परमात्मनि चेष्यते ॥ ७१ ॥
क्षेत्रियं क्षेत्रजतृणे परदाररतेऽपि च ॥
अन्यदेहचिकित्स्ये चाऽसाध्यरोगे च जानते ॥ ७२ ॥
कषायो रसभेदे स्यादङ्गरागे विलेपने ॥
निर्यासेऽपि कषायोऽथ सुरभौ लोहितेऽन्यवत् ॥ ७३ ॥
कुलायः पक्षिनिलयस्थानयोर्नीडवन्मतः ॥
उपायः सामभेदादावुपायः स्यादुपागतौ ॥ ७४ ॥

पर्यायस्तु प्रकारे स्यान्निर्माणेऽवसरे क्रमे ॥
संस्त्यायः सन्निवेशे च संस्थाने विश्रुतावपि ॥ ७५ ॥
व्यवायः सुरतेऽन्तर्द्धौ व्यवायं तेजसि स्मृतम् ॥
शालेयं शतपुष्पायामाहुः शाल्युद्भवोचिते ॥ ७६ ॥
शैलेयं सिन्धुलवणे तालपर्ण्याञ्च सिन्धुजे ॥
चञ्चरीके तु शैलेयो गाङ्गेयो जाह्नवीसुते ॥ ७७ ॥
कशेरुस्वर्णमुस्तेषु गाङ्गेयमिति कथ्यते ॥
चाम्पेयश्चम्पके स्वर्णे किञ्जल्के नागकेशरे ॥ ७८ ॥
कालेयो दैत्यभेदे स्यात् कालेयं कालखण्डके ॥
बालेयोऽङ्गारवल्लर्य्यां खरे बालहिते मृदौ ॥ ७९ ॥
आत्रेयो मुनिभेदे स्यादात्रेयी सरिदन्तरे ॥
आत्रेयी पुष्पवत्याञ्च पानीयं पेयवारिणोः ॥ ८० ॥
ऐणेयमेणचर्मादौ रतबन्धान्तरे स्त्रियाः ॥
अश्वीयमश्वसङ्घातेऽश्वीयमश्वहितेऽन्यवत् ॥ ८१ ॥
इन्द्रियञ्च हृषीके स्यादिन्द्रियं रेतसि स्मृतम् ॥
जघन्यं चरमे शिश्ने जघन्यं गर्हितेऽन्यवत् ॥ ८२ ॥
वदान्यो दानशौण्डे स्याद्वदान्यश्चारुभाषिणि ॥
पर्जन्यो मेघशब्दे स्याद्धनदम्बुदशक्रयोः ॥ ८३ ॥
ब्रह्मण्यो ब्रह्मसाधौ स्याद्ब्रह्मण्यश्च शनैश्चरे ॥
ब्राह्मण्यं ब्राह्मणत्वे स्यात् समूहेऽपि द्विजन्मनाम् ॥ ८४ ॥
शीर्षण्यमाहुर्विशदकेशशीर्षकयोरपि ॥
हिरण्यमक्षयद्रव्ये वराटे स्वर्णरेतसोः ॥ ८५ ॥
सौकर्य्यं स्यादनायासे क्रियायां सूकरस्य च ॥
श्वशुर्य्यो देवरे श्यालेऽप्यहार्य्यः स्थिरशैलयोः ॥ ८६ ॥
प्रकीर्य्यः पूतिकरजे विनिकीर्णे तु वाच्यवत् ॥

सौरभ्यमाहुः सौगन्धे चारुत्वे गुणगौरवे ॥ ८७ ॥
नेपथ्यं रङ्गभूमौ स्यान्नेपथ्यञ्च प्रसाधने ॥
आतिथ्यमातिथेये स्यादातिथ्यश्चातिथावपि ॥ ८८ ॥
सामर्थ्यं योग्यताशक्त्योरपत्यं पुत्रयोर्मतम् ॥
कौकृत्यमनुतापे स्यादयुक्तकरणेऽपि च ॥ ८९ ॥
लौहित्यः सागरे व्रीहावादित्यस्त्रिदशे रवौ ॥
पौलस्त्यो रावणे श्रीदेऽप्यौचित्यं सत्ययोग्ययोः ॥ ९०
प्रसव्यमनुकूले स्यात् प्रतिकूले च वाच्यवत् ॥
अवध्यमवधार्य्ये स्यादनर्थकवचस्यपि ॥ ९१ ॥
प्रणाय्योऽसम्मते प्रोक्तोऽप्यभिलाषविवर्जिते ॥
शाण्डिल्यो मुनिभेदे स्यान्मालूरे पावकान्तरे ॥ ९२ ॥
मङ्गल्यस्त्रायमाणे स्याद्बिल्वेऽश्वत्थे मसूरके ॥
मङ्गल्यं दध्नि मङ्गल्यो मनोज्ञे त्वभिधेयवत् ॥ ९३ ॥
मङ्गल्या रोचनायाञ्च प्रियङ्गुशतपुष्पयोः ॥
अधः पुष्पीशङ्खपुष्पीशमीशुक्लवचासु च ॥ ९४ ॥
अधृष्यस्तु प्रगल्भे स्यादधृष्या निम्नगाभिदि ॥
पारुष्यं परुषत्वे स्याद्वने शक्रस्य गीष्पतौ ॥ ९५ ॥
पारुष्योऽथ भुजिष्यः स्यात् सहाये हस्तसूत्रके ॥
स्वतन्त्रे च भुजिष्या तु दासीगाणिकयोर्मता ॥ ९६ ॥
चक्षुष्यः केतके पुण्डरीकवृक्षे रसाञ्जने ॥
कुलत्थिकासुभगयोश्चक्षुष्योऽक्षिहितेऽन्यवत् ॥ ९७ ॥
जटायुर्गुग्गुलुतरौ जटायुर्विहगान्तरे ॥
ऊर्णायुः क्षणभङ्गे स्यान्मेषकम्बलमेषयोः ॥ ९८ ॥
देवयुर्धार्मिके ख्यातो देवयुर्लोकयात्रिके ॥
मृगयुर्ब्रह्मणि प्रोक्तो गोमायुव्याधयोरपि ॥ ९९ ॥

भुवन्युर्ज्वलने भानौ भुवन्युः शशलाञ्छने ॥
शरण्युर्वारिदे वाते क्षिपन्युः सुरभौ तनौ ॥ १०० ॥
तपस्या व्रतचर्यायां तपस्यो मासि फाल्गुने ॥
रहस्या निम्नगाभेदे गोपनीये तु वाच्यवत् ॥ १०१ ॥
पयस्या क्षीरकाकोल्यां पयोहितभवेऽन्यवत् ॥
पयस्या दुग्धिकायाश्च स्वर्णक्षीर्याश्च कथ्यते ॥ १०२ ॥
स्यादहल्याऽप्सरोभेदे गौतमस्य च योषिति ॥
विशल्या लाङ्गलीदन्तीगुडूचीत्रिपुटासु च ॥ १०३ ॥
अभिख्या कीर्त्तियशसोरभिख्यानामशोभयोः ॥
द्वितीया तिथिभित्पत्न्योः पूरण्यामपि च द्वयोः ॥ १०४ ॥
नादेयी नागरङ्गे स्याज्जयायां जलवेतसे ॥
भूमिजम्ब्वां जवायां च काकुष्ठे च समीक्ष्यते ॥ १०५ ॥

यचतुष्कम् ॥

भवेदनुशयो द्वेषे पश्चात्तापानुबन्धयोः ॥
स्मृतः समुदयो वृन्दे संयुगे समुपक्रमे ॥ १०६ ।
प्रतिश्रयः सभायां स्यादाश्रयेऽपि प्रतिश्रयः ॥
समुच्छ्रयः समुत्सेधे विरोधेऽपि समुच्छ्रयः ॥ १०७ ॥
हिरण्मयो लोकधातौ स्यात्त् सुवर्णमयेऽन्यवत् ॥
अवश्यायो हिमे गर्वे समुदायो गणे युधि ॥ १०८ ॥
परिधायो जलस्थाने परिच्छदनितम्बयोः ॥
सम्परायः समीके स्यादापदुत्तरकालयोः ॥ १०९ ॥
निरामयोऽन्यवत् कल्ये स्यादिडिक्के निरामयः ॥
समाह्वयः स्यात् सङ्गमे द्यूते च पशुपक्षिभिः ॥ ११० ॥
महालयो विहारे स्यात्तीर्थे च परमात्मनि ॥
रौहिणेयो भवेद्वत्से रेवतीरमणे बुधे ॥ १११ ॥

पौरुषेयो विकारे स्यात् पुरुषस्य पदान्तरे ॥
पुंसः समूहवधयोः पुरुषेण कृतेऽपि च ॥ ११२ ॥
भागधेयं स्मृतं भाग्ये भागप्रत्यययोरपि ॥
बिलेशयो मूषिके स्याद् भुजङ्गेऽपि बिलेशयः ॥ ११३
जलाशयमुशीरे च जलाधारे जलाशयः ॥
चन्द्रोदयो विताने स्यात्तथा चन्द्रोदयोषधौ ॥ ११४ ॥
फलोदयः स्यात् त्रिदिवे लाभेऽपि च फलोदयः ॥
महोदयः कान्यकुब्जेऽप्याधिपत्यापवर्गयोः ॥ ११५ ॥
स्थूलोच्चयस्त्वऽसाकल्ये गण्डोपलकरण्डयोः ॥
गजानां मध्यमगतौ स्थूलोच्चय उदाहृतः ॥ ११६ ॥
धनञ्जयोऽर्ज्जुने वह्नौ ककुभे देहमारुते ॥
नागान्तरे चाऽपसव्यं दक्षिणप्रतिकूलयोः ॥ ११७ ॥
मार्ज्जारीयः स्मृतः शूद्रे बिडाले कायशोधने ॥
तण्डुलीयः शाकभेदे विडङ्गतरुताप्ययोः ॥ ११८ ॥
तृणशून्यं मल्लिकायां केतक्याश्च फले मतम् ॥
महामूल्यं महार्घे स्यात् पद्मरागमणावपि ॥ ११९ ॥
अधःशय्या मृतौ भूमिशय्यायाम्पितृकानने ॥
उपकार्य्या वस्त्रसद्मन्युपकारोचितेऽन्यवत् ॥ १२० ॥

यपञ्चकम् ॥

दुग्धतालीयमित्येतद् दुग्धाम्रे दुग्धफेणके ॥
भवेत्प्रवचनीयाख्या प्रवाच्ये च प्रवक्तरि ॥ १२१ ॥
कालानुसार्य्यं कालीये शैलेये शिंशपाद्रुमे ॥
वृषाकपायी श्रीगौर्य्योर्जीवन्त्याञ्च शतावरौ ॥ १२२ ॥

यषट्कम् ॥

प्रत्युद्गमनीयमुपस्थेये स्याच्च धौतांशुकद्वये ॥

विश्वक्सेनप्रिया लक्ष्म्यां त्रायमाणौषधावपि ॥ १२३ ॥

इति यान्तवर्गः ॥

—:०:—

रैककम् ॥

रः पावके च तीक्ष्णे च राः स्मृतः स्वर्णवित्तयोः ॥
स्रुः स्रवे निर्झरे चाऽपि द्रूः स्वर्णे कामरूपिणि ॥ १ ॥
श्रीर्वेशरचनाशोभाभारतीसरलद्रवे ॥
लक्ष्म्यां त्रिवर्गसम्पत्तौ वेशोपकरणे मता ॥ २ ॥

रद्विकम् ॥

अरं शीघ्रे च च चक्राङ्गे शीघ्रगे पुनरन्यव[illegible] ॥
करो वर्षोपले पाणौ शुण्डामत्ययरश्मिषु ॥ ३ ॥
खरः स्याद्गर्दभे देवताडे तीक्ष्णाग्रकेऽपि च ॥
गरो व्याधावुपविषे विषे च करणे गरम् ॥ ४ ॥
वरो द्यूतप्रभेदे स्याच्चारजङ्गमयोश्चले ॥
नरं तु रामकर्पूरे नरोऽजे मानवेऽर्ज्जुने ॥ ५ ॥
परः स्यादुत्तमानात्मवैरिदूरेषु केवले ॥
परमव्ययमिच्छन्ति भरोऽतिशयभारयोः ॥ ६ ॥
वरोऽभीष्टे दे[illegible] जामातृषिङ्गयोः ॥
श्रेष्ठेऽव्यवत् परिवृतौ वरं काश्मीरजे मतम् ॥ ७ ॥
त्रिफलायां वरा प्रोक्ता शतावर्य्यां वरी वरम् ॥
अव्ययन्तु मनागिष्टे सरो दध्यग्रबाणयोः ॥ ८ ॥
स्वरोऽकारादिमात्रासु मध्यमादिषु च ध्वनौ ॥
उदात्तादिष्वपि प्रोक्तः स्वरो नासासमीरणे ॥ ९ ॥
शरं नीरे शरः काण्डे शरस्तेजनकेऽपि च ॥
धरस्तु शैले कार्पासतूलके कमठाधिपे ॥

धरा मेधसि भूम्याश्च स्त्रीणां गर्भाशयेऽपि च ॥ १० ॥
क्षरं नीरे क्षरो मेघे दरः साध्वसगर्त्तयोः ॥
कन्दरे तु दरीमाहुरीषदर्थे दराव्ययम् ॥ ११ ॥
क्षुरः स्याच्छेदनद्रव्ये कोकिलाक्षे च गोक्षुरे ॥
पुरं पाटलिपुत्रे स्याद्गृहोपरिगृहे पुरम् ॥ १२ ॥
पुरं पुरि शरीरे च गुग्गुलौ कथितः पुरः ॥
पुराऽव्ययं पूर्वकाले खुरः कोलदले शफे ॥ १३ ॥
सुरो देवे सुरा मद्ये चषकेऽपि सुरा क्वचित् ॥
कारो वधे निश्चये च बलौ यत्ने यतावपि ॥ १४ ॥
कारस्तुषारशैले च कारा दूत्यां प्रसेवके ॥
बन्धने बन्धनागारे हेमकारिकयोरपि ॥ १५ ॥
चारः प्रियालवृक्षे स्याद्गतौ बन्धापसर्पयोः ॥
पारम्परतटे प्रान्ते पारी पात्रीतडागयोः ॥ १६ ॥
गर्गरीपूरयोः पारी पादरज्ज्वाश्च दन्तिनः ॥
वारः सूर्यादिदिवसे वारोऽवसरवृन्दयोः ॥ १७ ॥
कुब्जवृक्षे हरेर्वारं द्वारे मद्यस्य भाजने ॥
तारो मुक्तादिसंशुद्धौ तरणे शुद्धमौक्तिके ॥ १८ ॥
तारश्च रजतेऽप् चस्वरेऽप्यन्यवदीरितम् ॥
ऋ[illegible]योस्तारा सुग्रीवगुरुयोषितोः ॥ १९ ॥
बुद्धदेव्यां मता तारा शारः शबलवातयोः ॥
भारस्तु वीवधे स्वर्णपलानामयुतद्वये ॥ २० ॥
मारो मृत्यौ वृषेऽनङ्गे मारी चण्ड्यां जनक्षये ॥
स्फारः स्याद्विकटे स्फारः कनकादेश्च बुद्बुदे ॥ २१ ॥
क्षारो रसान्तरे धूर्त्ते लवणे काचभस्मनोः ॥
हारो मुक्तावलौ युद्धेऽप्यारः क्षितिसुतेऽर्कजे ॥

आरा चर्म्मप्रभेदिन्यां नारस्तर्णकनीरयोः ॥ २२ ॥

सारो बले मज्जनि च स्थिरांशे
न्याय्ये च नीरे च धने च सारम् ॥
वरेऽन्यवत् सारमुदाहरन्ति
द्वारं पुनर्निर्गमनेऽप्युपाये ॥ २३ ॥

पूरो जलप्रवाहे स्याद् व्रणसंशुद्धिखाद्ययोः ॥
चिरन्तु गोस्तने हस्ते चूडायां सीसकेऽपि च ॥ २४ ॥
क्रूरस्तु कठिने घोरे नृशंसे त्वऽभिधेयवत् ॥
सूरश्चारभटे सूर्य्ये चोरश्चौरसुगन्धयोः ॥ २५ ॥
तीरं तटे त्रपौ तीरः सीरस्तिग्मकरे हले ॥
चीरी कच्छूरिकाझिल्योः स्वैरः स्वच्छन्दमन्दयोः ॥२६॥
जीरः खड्गे वणिग्द्रव्ये मीरस्तोयदशैलयोः ॥
क्षीरं नीरे च दुग्धे च कीरो जनपदे शुके ॥ २७ ॥
गौरः पीतेऽरुणे श्वेते विशुद्धे चाऽभिधेयवत् ॥
गौरन्तु विशदे पद्मकेशरे सितसर्षपे ॥ २८ ॥
गौरः शशिनि गौरी तु नग्नकन्योमयोः स्मृता ॥
रोचनी रजनीपिङ्गाप्रियङ्गुवसुधासु च ॥ २९ ॥
नदीभेदेऽपि गौरी स्याद्वरुणस्य च योषिति ॥
पौरन्तु कत्तृणे पौरः स्मृतः पुरभवेऽन्यवत् ॥ ३० ॥
वेरं शरीरे काश्मीरे वेरं वातिङ्गणेऽपि च ॥
घोरं भीमे हरे घोरष्टारो लङ्गतुरङ्गयोः ॥ ३१ ॥
होरा लग्नेऽपि राश्यर्द्धे शास्त्ररेखाभिदोरपि ॥
हीरा पिपीलिकालक्ष्म्योर्हीरः शङ्करवज्रयोः ॥ ३२ ॥
गोत्रं नाम्नि कुले क्षेत्रे कानने चित्तवर्त्मनोः ॥
सम्भावनीयबोधेऽपि गोत्रः क्षोणीधरे मतः ॥ ३३ ॥

गोसमूहभुवोर्गोत्रा गात्रमङ्गे कलेवरे ॥
स्तम्बेरमाग्रजङ्घाया विभागेऽपि समीरितम् ॥ ३४ ॥
पत्रं स्याद्वाहने पर्णे पक्षे च शरपक्षिणाम् ॥
पात्रञ्च भाजने योग्ये पात्रं तीरद्वयान्तरे ॥ ३५ ॥
पात्रं स्रुवादौ पर्णेऽपि राजमन्त्रिणि चेष्यते ॥
पोत्रं वस्त्रे मुखाग्रे च शूकरस्य हलस्य च ॥ ३६ ॥
चित्रं स्यादद्भुतालेख्यातिलकेषु विहायसि ॥
चित्राऽऽखुपर्णीगोदुग्धीसुभद्रादन्तिकासु च ॥ ३७ ॥
ऋक्षाप्सरोऽहिभेदेषु कर्बुरे चाभिधेयवत् ॥
चैत्रं मृतकचित्ये स्याच्चैत्रो मासाद्रिभेदयोः ॥ ३८ ॥
वृत्रो रिपौ घने ध्वान्ते शैले शक्रे च दानवे ॥
सत्रमाच्छादने यज्ञे सदादाने च कैतवे ॥ ३९ ॥
सूत्रन्तु सूचनायां स्यात् सूत्रं तन्तुव्यवस्थयोः ॥
मित्रं सुहृदि मित्रोऽर्के शास्त्रं ग्रन्थनिदेशयोः ॥ ४० ॥
मात्रं चाऽवधृतौ कार्त्स्न्ये मात्रा कर्णविभूषणे ॥
अक्षरावयवे वृत्ते मानेऽल्पे च परिच्छदे ॥ ४१ ॥
शस्त्रं लोहास्त्रयोः शस्त्री छुरिकायाञ्च विश्रुता ॥
अस्त्रं प्रहरणे चापे वक्त्रं छन्दोऽन्तरे मुखे ॥ ४२ ॥
नेत्रं मन्थिगुणे वस्त्रे तरुमूले विलोचने ॥
नेत्रं रथे च नाड्याञ्च नेत्रो नेतरि वाच्यवत् ॥ ४३ ॥
क्षेत्रं शरीरे केदारे सिद्धस्थानकलत्रयोः ॥
रेत्रं रेतसि पीयूषे पटवासेऽपि सूतके ॥ ४४ ॥
मन्त्रो वेदप्रभेदे स्याद्देवादीनाञ्च साधने ॥
गुप्तवादे च तोत्रन्तु भाजने वल्लवेऽपि च ॥ ४५ ॥
तन्त्रं कुटुम्बकृत्ये स्यात् कारणे च परिच्छदे ॥

शास्त्रे प्रधाने सिद्धान्ते तन्तुवाये गदोत्तमे ॥ ४६ ॥
तत्त्वादिसाधनोपाये श्रुतिशाखान्तरेऽपि च ॥
इतिकर्त्तव्यतायाञ्च तन्त्री वीणागुणे तनोः ॥ ४७ ॥
शिरायाममृतायाञ्च छत्रमातपवारणे ॥
छत्रा मधुरिकायां स्यात् कुस्तुम्बुरुशिलीन्ध्रयोः ॥ ४८ ॥
चक्रो गणे चक्रवाके चक्रं सैन्यरथाङ्गयोः ॥
ग्रामजाले कुलालस्य भाण्डे राष्ट्रास्त्रयोरपि ॥ ४९ ॥
अम्भसामपि चाऽवर्त्ते चुक्रस्त्वम्लेऽम्लवेतसे ॥
चुक्री चाङ्गेरिकायां स्याद्वृक्षाम्ले चुक्रमिष्यते ॥ ५० ॥
शुक्रः काव्येऽनले ज्येष्ठे शुक्रो रेतोऽक्षिरोगयोः ॥
शुक्रं शक्रो महेन्द्रे स्यात् कुटजार्ज्जुनभूरुहोः ॥ ५१ ॥
नक्रः कुम्भीरके नक्रं नासायामग्रदारुणि ॥
वक्रः स्यात् कुटिले क्रूरे पुटभेदे शनैश्चरे ॥ ५२ ॥
अग्रमालम्बने व्राते परिमाणे पलस्य च ॥
प्रान्ते पुरस्तादधिके प्रधाने प्रथमोर्द्ध्वयोः ॥ ५३ ॥
उग्रः शूद्रासुते क्षत्राच्छ्रीकण्ठे चोऽत्कटेऽन्यवत् ॥
उग्रा वचाछिक्किकयोर्व्यग्रो व्यासक्त आकुले ॥ ५४ ॥
भद्रं स्यान्मङ्गले हेम्नि मुस्तके करणान्तरे ॥
भद्रो रुद्रे वृषे रामचन्द्रे मेरुकदम्बयोः ॥ ५५ ॥
हस्तिजात्यन्तरे भद्रो वाच्यवच्छ्रेष्ठसाधुनोः ॥
भद्रा [redacted] सु कट्फले ॥ ५६ ॥
क्षुद्रः स्यादधमे क्रूरे कृपणेऽल्पे च वाच्यवत् ॥
क्षुद्रा वेश्यानटीकण्टकारिकासरघासु च ॥ ५७ ॥
चाङ्गेरी बृहतीहिंस्रा मक्षिकामात्रकेषु च ॥ .
क्षौद्रं मधुनि पानीये वध्रं त्रपुवरत्रयोः ॥ ५८ ॥

गृध्रः खगान्तरे प्रोक्तो वाच्यवच्चार्थलुब्धके ॥
रोध्रः सावरके रोध्रमपराधेऽपि किल्विषे ॥ ५९ ।
नीध्रं नेमौ वलीकेन्द्रो रेवतीभे च कानने ॥
राष्ट्रमुद्दिष्टमुत्पाते तथा स्यादुपवर्त्तने ॥ ६० ॥
कृच्छ्रमाख्यातमाभीले तपःसान्तपनादिनोः ॥
चन्द्रः सुधांशुकर्पूरकाम्पिल्लस्वर्णवारिषु ॥ ६१ ॥
इन्द्रः शचीपतावन्तरात्मन्यादित्ययोगयोः ॥
इन्द्रा फणिज्झके सान्द्रो घनकाननयोर्मृदौ ॥ ६२ ॥
गुन्द्रस्तेजनके गुन्द्रा प्रियङ्गौ भद्रमुस्तके ॥
कैवर्त्तीमुस्तके चाऽपि रौद्रो नाट्यरसान्तरे ॥ ६३ ॥
रौद्रोऽतिभीषणे तीव्रे रौद्रा स्कन्दस्य मातरि ॥
उड्रो जने जपावृक्षे उड्रा जनपदान्तरे ॥ ६४ ॥
पितृकेदारयोर्वप्रो वप्रः प्राकाररोधसोः ॥
पुण्ड्रो दैत्यविशेषेक्षुभेदयोरतिमुक्तके ॥ ६५ ॥
चित्रे कृमौ पुण्डरीके पुण्ड्राः स्युर्नीवृदन्तरे ॥
वज्रं हीरकदम्भोलिबालकामलकेषु च ॥ ६६ ॥
वज्रा गुडूचिकायां स्यात् ताम्रं शुल्वेऽरुणेऽन्यवत् ॥
तीव्रमत्युष्णकटुकनितान्तेष्वन्यवन्मतम् ॥ ६७ ॥
तीव्रा च कटुरोहिण्यामासुरीगण्डदूर्वयोः ॥
अस्रः कोणे शिरसिजे चाऽस्रमश्रुणि शोणिते ॥ ६८ ॥
दस्रः खरे चाऽश्विनयोर्घस्रो दिवसहिंस्रयोः ॥
वाश्रोऽपि दिवसे वाश्रं मन्दिरे च चतुष्पथे ॥ ६९ ॥
शीघ्रं द्रुतगतौ शीघ्रं चक्राङ्गोशीरयोरपि ॥
व्याघ्रो दीपिनि विख्यातः शुक्लैरण्डकरञ्जयोः ॥
व्याघ्री निदिग्धिकायाञ्च श्रेष्ठे स्यादुत्तरस्थितः ॥ ७० ॥

अभ्रं नभः स्वर्गवलाहकेषु
शुभ्रं प्रदीप्ते धवलेऽभ्रके च ॥
बभ्रुर्विशाले नकुले कृशानौ
वज्रे मुनौ शूलिनि पिङ्गले च ॥ ७१ ॥

शिग्रुः शोभाञ्जने शाके शरुः कुलिशकोपयोः ॥
स्वरुर्वज्रेऽध्वरे वाणे यूपखण्डेऽपि च स्वरुः ॥ ७२ ॥
खरुर्दन्ते हरे दर्पे हये श्वेते तु वाच्यवत् ॥
चरुर्भाण्डे च हव्यान्ने भरुर्भर्त्तरि काञ्चने ॥ ७३ ॥
गुरुर्निषेकादिकरे पित्रादौ सुरमन्त्रिणि ॥
दुर्ज्जरालघुनोः प्रोक्तो गुरुर्महति वाच्यवत् ॥ ७४ ॥
रुरुर्मृगे दैत्यभेदे कारुः कारकशिल्पिनोः ॥
विश्वकर्मणि शिल्पे च कुरुः श्रीकण्ठजाङ्गले ॥ ७५ ॥
उन्दने नृपभेदे च पुरुः प्राज्यपरागयोः ॥
पुरुः स्वर्लोकनृपयोर्मरुर्भूधरधन्वनोः ॥ ७६ ॥
आरुस्तरुविशेषे स्यादारुः कर्कटदंष्ट्रिणोः ॥
कद्रूर्मातरि नागानां कद्रुः कनकपिङ्गले ॥ ७७ ॥
हरिर्वातार्कचन्द्रेन्द्रयमोपेन्द्रमरीचिषु ॥
सिंहाश्वकपिभेकाहिशुकलोकान्तरेषु च ॥ ७८ ॥
हरिर्वाच्यवदाख्यातो हरित्कपिलवर्णयोः ॥
भूरिर्ब्रह्माच्युतेशेषु भूरिप्राज्यसुवर्णयोः ॥ ७९ ॥
गिरिर्गीर्णौ गिरियके क्रीडाकन्दुकशैलयोः ॥
नेत्रामयविशेषेऽपि मत्स्ये तु गिरिरन्यवत् ॥ ८० ॥
वारिः स्मृत्यां सरस्वत्यां वारि ह्रीवेरनीरयोः ॥
वारी घटीभबन्धन्यो रङ्घ्रिः स्यात् पादबुध्नयोः ॥ ८१ ॥
शारिस्त्वक्षोपकरणे तथा शकुनिकान्तरे ॥

युद्धार्थगजपर्याणे व्यवहारेऽपि च क्वचित् ॥ ८२ ॥
कारिः क्रियायामाख्याता नापितादिकशिल्पिनि ॥
अद्रिः शैलद्रुमार्केषु ऐन्द्रिः काकजयन्तयोः ॥ ८३ ॥
ऐन्द्रिरम्भोधरे जिष्णौ तन्द्री निद्राप्रमीलयोः ॥
धात्री जनन्यामलकीवसुमत्युपमातृषु ॥ ८४ ॥
उष्ट्री गोलकिकायां स्यात् करभस्य च योषिति ॥
क्रोष्ट्री शृगालिकाक्षीरविदारीलाङ्गलीषु च ॥ ८५ ॥
तरिर्नावि दशायाञ्च वस्त्रादीनाञ्च पेटके ॥
जारी स्यादोषधीभेदे जारस्तूपपतावपि ॥ ८६ ॥
इरा वारिसुराभूमिभारतीषु प्रयुज्यते ॥
स्थिरा भूमौ शालपर्ण्यां स्थिरो निश्चलमोक्षयोः ॥ ८७ ॥
धारा सैन्याग्रिमस्कन्धसन्तत्योः पत्तनान्तरे ॥
द्रवद्रव्यप्रपातेऽपि तुरङ्गगतिपञ्चके ॥ ८८ ॥
खड्गादीनाञ्च निशितमुखे धाराऽपि कीर्त्यते ॥
धारः क्वचिद्धनासारवर्षणे स्यादृणेऽपि च ॥ ८९ ॥
वीरा स्यात् क्षीरकाकोलितामलक्येलवालुषु ॥
पतिपुत्रवतीरम्भागम्भीरामदिरासु च ॥ ९० ॥
गोष्ठोदुम्बरिकाक्षीरविदारीदुग्धिकासु च ॥
वीरस्तु सुभटे श्रेष्ठे वीरं शृङ्ग्यां नतेऽपि च ॥ ९१ ॥
आर्द्रा नक्षत्रभेदे स्यादार्द्रं क्लिन्नेऽभिधेयवत् ॥
यात्रा तु यापनोपाये गतौ देवार्चनोत्सवे ॥ ९२ ॥
उस्रा गव्युपचित्रायामुस्रस्तु किरणे स्मृतः ॥
हिंस्रा काकादने मत्स्यो हिंस्रः स्याद्घातकेऽन्यवत् ॥ ९३ ॥

रात्रिकम् ॥

अमरस्त्रिदशेऽप्यस्थिसंहारे कुलिशद्रुमे ॥

दूर्वाऽमरावतीस्थूणा गुडूचीष्वऽमरा मता ॥ ९४ ॥
अपरन्त्वधुनार्थे स्यात् पश्चाद्गात्रे च दन्तिनाम् ॥
अर्वाचीने परं प्राहुर्जरायौ चापरामपि ॥ ९५ ॥
अधरो दन्तवसनेऽनूर्द्धे हीनेऽधरोऽन्यवत् ॥
अध्वरो वसुभेदे स्यात् सावधाने कृतावपि ॥ ९६ ॥
अन्तरन्तु परीधाने भेदे रन्ध्रावकाशयोः ॥
आत्मान्तर्द्धिविनात्मीयबहिर्मध्यावधिष्वपि ॥ ९७ ॥
तादर्थ्येऽवसरे चोक्तमवरं चरमेऽन्यवत् ॥
गजान्त्यजङ्घादेशे च भवान्यामवरा मता ॥ ९८ ॥
उत्तरं प्रतिवाक्ये स्यादूर्द्धोदीच्योत्तमेऽन्यवत् ॥
उत्तरस्तु विराटस्य तनये दिशि चोऽत्तरा ॥ ९९ ॥
इतरः पामरेऽन्यस्मिन्नक्षरं ब्रह्मवर्णयोः ॥
ऋक्षरं वारिधारायामृक्षरश्चर्त्विजि स्मृतः ॥ १०० ॥
प्रवरं सन्ततौ गोत्रे श्रेष्ठे तु प्रवरोऽन्यवत् ॥
शबरो वारिचण्डालभेदयोः शङ्करेऽपि च ॥ १०१ ॥
अम्बरं वाससि व्योम्नि कार्पासे च सुगन्धके ॥
शम्बरं सलिले चित्तबौद्धव्रतविशेषयोः ॥ १०२ ॥
शम्बरो दैत्यहरिणमत्स्यशैलजिनान्तरे ॥
ओषधौ शम्बरीमाहुः प्रखरोऽश्वतरे शुनि ॥ १०३ ॥
तुरङ्गानाञ्च सन्नाहे प्रखरोऽतिभृशस्वरे ॥
शिखरं शैलवृक्षाग्रकक्षापुलककोटिषु ॥ १०४ ॥
पक्वदाडिमबीजाभमाणिक्यशकलेऽपि च ॥
खिङ्खिरस्तु शिवाभेदे खट्वाङ्गे वारिवालके ॥ १०५ ॥
खिरवीरा तद्वहुत्वे च विष्टरस्तु महीरुहे ॥
आसने कुशमुष्टौ च द्विरदस्कन्धपीठयोः ॥ १०६ ॥

कवटे चाऽथ पिठरो मुस्तमन्थानदण्डयोः ॥
पिठरः स्यादुखायाञ्च जठरः कठिनेऽन्यवत् ॥ १०७ ॥
कुक्षौ वृद्धे च जठरं वण्ठरस्तालपल्लवे ॥
करीरकोशेऽप्यररं कपाटे छदनेऽपि च ॥ १०८ ॥
क्रकरः क्रकचे दीने करीरे च खगान्तरे ॥
कदरः श्वेतखदिरे क्षुद्ररोगेऽपि भाषितः ॥ १०९ ॥
बदरं कोलकार्पास्योः फले स्याद्बदरी तयोः ॥
एलापर्ण्यान्तु बदरा विष्णुक्रान्तौषधावपि ॥ ११० ॥
प्रदरो रोगभेदे स्यात् प्रदरः शर भङ्गयोः ॥
मकरो यादसि ज्ञेयो निधिराशिप्रभेदयोः ॥ १११ ॥
निकरो निवहे सारे न्यायदेयधनान्तरे ॥
शीकरं शबले वातसृताम्बुकणयोर्विदुः ॥ ११२ ॥
प्रकरश्चोपकारश्च विकीर्णकुसुमादिषु ॥
संहतौ चोपकृत्यायां यथासङ्ख्यमवस्थितौ ॥ ११३ ॥
जोङ्गके प्रकरं प्रोक्तं प्रकरी चत्वरावनौ ॥
विस्तरस्तु प्रपञ्चे स्याद्विस्तारे प्रणयेऽपि च ॥ ११४ ॥
संस्तरप्रस्तरावेतौ संस्तराध्वरयोरपि ॥
मणिपाषाणयोश्चाऽपि यथाक्रममुदीरितौ ॥ ११५ ॥
टगरष्टङ्कणक्षारे हेलाविभ्रमगोचरे ॥
वाच्यवत् केकराक्षे तु मुद्गरं मल्लिकाभिदि ॥ ११६ ॥
लोष्ट्रादिभेदनेऽपि स्यादुदरं जठरे युधि ॥
प्रसरः प्रणये वेगे सङ्गरे चाऽथ मत्सरः ॥ ११७ ॥
असह्यपरसम्पत्तौ मात्सर्य्यं कृपणे युधि ॥
मत्सरा मक्षिकायाञ्च विसरः प्रसरे व्रजे ॥ ११८ ॥
कुहरः कोठरे छिद्रे नागराजविशेषयोः ॥

दहरो मूषिकायाञ्च स्वल्पभ्रातरि बालके ॥ ११९ ॥
चमरं चामरे प्राहुर्मञ्जरीमृगभेदयोः ॥
चमरी भ्रमरे भृङ्गे कामुकेऽपि मधूत्थवत् ॥ १२० ॥
रुधिरोऽङ्गारके प्रोक्तो रुधिरं कुङ्कुमासृजोः ॥
चन्दिरोऽनेकपे चन्द्रे मुदिरः कामुकेऽम्बुदे ॥ १२१ ॥
मिहिरो भास्करे वृद्धे मदिरः काममूर्खयोः ॥
विवरं दूषणे गर्त्ते कथितं छिद्ररन्ध्रवत् ॥ १२२ ॥
खपुरः क्रमुके भद्रे मुस्तकेऽलसकेऽपि च ॥
गोपुरन्तु पुरद्वारि द्वारमात्रे च मुस्तके ॥ १२३ ॥
चिकुरश्चञ्चले केशे गृहबभ्रुभुजङ्गयोः ॥
पक्षिद्रुभेदयोः शैले चङ्कुरो रथवृक्षयोः ॥ १२४ ॥
अङ्कुरो रुधिरे रोम्णि पानीयेऽभिनवोद्भिदि ॥
कुक्कुरो वक्रपुच्छे स्याद्ग्रन्थिपर्णेऽपि कुक्कुरे ॥ १२५ ॥
मुकुरो मल्लिकापुष्पे दर्पणे च कलिद्रुमे ॥
कुलालदण्डे वकुले मकुरोऽप्येषु विश्रुतः ॥ १२६ ॥
अजिरं प्राङ्गणे वाते विषये दर्दुरे तनौ ॥
अशिरो राक्षसे वह्नावशिरस्तपनेऽपि च ॥ १२७ ॥
शिशिरः स्यादृतोर्भेदे तुषारे शीतलेऽन्यवत् ॥
वशिरं किणिहीसिन्धुलवणे कुम्भकेषु च ॥ १२८ ॥
सुषिरं विवरे वाद्ये सरन्ध्रे सुषिरोऽन्यवत् ॥
सुषिरोऽग्नौ च तिमिरं ध्वान्ते नेत्रामयेऽपि च ॥ १२९ ॥
छिदिरः पावके रज्जौ करवाले परश्वधे ॥
दन्तुरं वाच्यवद्विद्याद्विषमोन्नतदन्तयोः ॥ १३० ॥
विदुरो नागरे वीरे कौरवाणाञ्च मन्त्रिणि ॥
विधुरं स्यात् प्रविश्लेषे विधुरो विकलेऽन्यवत् ॥ १३१ ॥

विधुराऽपि रसालायां मधुरस्तु रसे विषे ॥
मधुरं रसवत् स्वादुप्रियेषु मधुरोऽन्यवत् ॥ १३२ ॥
मधुरा शतपुष्पायां मिश्रेयानगरीभिदोः ॥
मधुकर्कटिकाभेदामधूलीयष्टिकासु च ॥ १३३ ॥
बन्धूरबन्धुरौ रम्ये नम्रे हंसे तु बन्धुरः ॥
बन्धुके च विदुङ्गे च बन्धूरापण्ययोषिति ॥ १३४ ॥
बर्बरः पामरे केशविन्यासे नीवृदन्तरे ॥
बर्बरा फञ्जिकायान्तु बर्बराशाकपुष्पयोः ॥ १३५ ॥
कर्बुरं सलिले हेम्नि कर्बुरं पापरक्षसोः ॥
कर्बुरा पुष्पदन्तायां किर्मीरे कर्बुराऽन्यवत् ॥ १३६ ॥
कर्परः स्यात् कपाले च शस्त्रभेदकटाहयोः ॥
कूर्परो जानुनि प्रोक्तः कफोणावपि कूर्परः ॥ १३७ ॥
खर्परः तस्करे धूर्त्ते भिक्षापात्रकपालयोः ॥
गर्गरो मीनभेदे स्यान्मन्थन्यामपि गर्गरी ॥ १३८ ॥
घर्घरस्तु चलद्वारिध्वानोलूकनदान्तरे ॥
निर्झरस्तु सहस्रांशु तुरङ्गे तुषपावके ॥ १३९ ॥
मुर्मुरस्तुषवह्नौ स्यान्मन्मथे रविवाजिनि ॥
जर्ज्जरो वाच्यवज्जीर्णे जर्ज्जरं वासवध्वजे ॥ १४० ॥
निर्ज्जरस्तु जरात्यक्ते वाच्यवन्निर्ज्जरः सुरे ॥
निर्ज्जरा तु गुडूच्यां स्यात्तालपत्र्यामपि क्वचित् ॥ १४१ ॥
जर्झरः स्यात् कलियुगे वाद्ये भाण्डे नदान्तरे ॥
दर्दुरस्तु गिरावीषद्भग्नवस्तुनि वाच्यवत् ॥ १४२ ॥
दर्दुरस्तोयदे भेके वाद्यभाण्डाद्रिभेदयोः ॥
दर्दुरा चण्डिकायाञ्च ग्रामजाले तु दर्दुरम् ॥ १४३ ॥
वार्दरं दक्षिणावर्त्तशङ्खे कृमिजनीरयोः ॥

काकचिन्त्याश्ववीजेऽपि वाचि वार्द्दरमिष्यते ॥ १४४ ॥
दुर्धरं वाच्यवद् दुःखधार्य्ये स्याद्वृषभौषधे ॥
दुर्धरो निर्भरे सारे निर्भये निरपत्रपे ॥ १४५ ॥
कुञ्जरोऽनेकपे केशे धातक्यामपि कुञ्जरा ॥
पिञ्जरं कनके वाजिभेदे पीते च पिञ्जरः ॥ १४६ ॥
मन्दरो मन्थरे शैले स्वर्गमन्दारयोरपि ॥
मन्दरो बहले मन्दे कन्दरो विवरे कुशे ॥ १४७ ॥
मन्दिरं नगरेऽगारे मन्दिरो मकरालये ॥
बर्करस्तरुणे मेषे कर्करो दर्पणे दृढे ॥ १४८ ॥
कन्धरो वारिवाहे स्याद्ग्रीवायामपि कन्धरा ॥
वल्लरं शाद्वले प्रोक्तं निर्जलस्थानकुञ्जयोः ॥ १४९ ॥
वल्लक्षेत्रे च मञ्जर्य्यां वल्लरी तु प्रकीर्त्तिता ॥
मन्थरः सूचके कोठे मन्थाने चाऽथ मन्थरम् ॥ १५० ॥
कुसुम्भ्यां मन्थरो मन्दे पृथौ वक्रे च वाच्यवत् ॥
कच्चरं कुत्सिते तक्रे चत्वरं स्थण्डिलेऽङ्गने ॥ १५१ ॥
छित्वरं छेदनद्रव्ये छित्वरो धूर्त्तवैरिणोः ॥
इत्वरो दुर्विधे नीचे पथिकक्रूरकर्म्मणोः ॥ १५२ ॥
पुष्करं पङ्कजे व्योम्नि पयःकारिकराग्रयोः ॥
औषधद्वीपविहगतीर्थराजोरगान्तरे ॥ १५३ ॥
पुष्करं तूर्यवक्त्रे च काण्डे खड्गफलेऽपि च ॥
डिङ्गरो डङ्गरे क्षेपे सङ्गरोऽङ्गीकृतौ युधि ॥ १५४ ॥
विषापदोः क्रियाकारे सङ्गरन्तु शमीफले ॥
गह्वरस्तु गृहादम्भनिकुञ्जगहनेष्वपि ॥ १५५ ॥
कर्वरः कथितो व्याघ्रे शिवायामपि कर्वरी ॥
चतुरश्चातुरकवचचक्रगण्डौ नियन्तरि ॥ १५६ ॥

१८

एतौ स्यातामुभौ नेत्रगोचरे चाटुकारिणि ॥
ईश्वरो विभवैराढ्ये शम्भौ स्वामिनि मन्मथे ॥ १५७ ॥
पार्वत्यामीश्वरामाहुर्द्वापरः संशये युगे ॥
आकरो निवहोत्पत्तिस्थानश्रेष्ठेषु कथ्यते ॥ १५८ ॥
भास्करस्तपने वह्नौ प्रभाकरसमः स्मृतः ॥
पार्परो भक्तसिक्थे स्यात् कीनाशे राजयक्ष्मणि ॥ १५९ ॥
जराटेऽपि कदम्बस्य केशरेऽपि च भस्मनि ॥
शार्वरन्त्वन्धतमसे शार्वरो घातुकेऽन्यवत् ॥ १६० ॥
प्रान्तरं विपिने दूरशून्यवर्त्मनि कोटरे ॥
शार्करो दुग्धफेणेऽपि शर्करान्वितदेशवत् ॥ १६१ ॥
शार्करो वृषभे छन्दोविशेषे शार्करं मतम् ॥
नागरं मुस्तके शुण्ठ्यां विदग्धे नागरोऽन्यवत् ॥ १६२ ॥
शंसन्ति नगरोद्भूते रतबन्धे च नागरम् ॥
वागरो वारके शाणे निर्झरे वाडवे वृके ॥ १६३ ॥
विशारदे मुमुक्षौ च गवामङ्के च वागरम् ॥
चामरं ग्रावमधुनोः पामरः स्वस्थनीचयोः ॥
वासरो दिवसे रागप्रभेदेऽपि च वासरः ॥ १६४ ॥
कान्तारमुपसर्गादौ वने दुर्गमवर्त्मनि ॥
इक्षुप्रभेदे कान्तारः पादारः पादधूलिषु ॥ १६५ ॥
पादलिङ्गे च मन्दारः पारिभद्रार्कपर्णयोः ॥
सुरद्रुमेऽपि गान्धारः सिन्दूरे रागदेशयोः ॥ १६६ ॥
आधारश्चाऽधिकरणेऽप्यालवालेऽम्बुधारणे ॥
आसारः स्यात् प्रसरणे वेगवर्षे सुहृद्बले ॥ १६७ ॥
केदारः पर्वते शम्भौ क्षेत्रभेदालवालयोः ॥
उदारो दातृमहतोर्दक्षिणेऽप्यभिधेयवत् ॥ १६८ ॥

मदारो द्विरदे धूर्त्ते विदारो दारणे रणे ॥
विदारी शालपर्ण्याञ्च रोगभेदे भगन्दरे ॥ १६९ ॥
विकारो विकृतौ रोगेऽप्याकारः संस्थिताङ्गयोः ॥
निकारः स्यात् परिभवे धान्यस्योत्किरणेऽपि च ॥१७०॥
प्रकारः सदृशे भेदे टङ्कारः पिञ्जिनीध्वनौ ॥
विस्मये च प्रसिद्धौ च दण्डारः शरयन्त्रके ॥ १७१ ॥
कुलालचक्रे वहने दण्डारो मत्तवारणे ॥
पिण्डारः क्षपणक्षेपे महिषीरक्षके द्रुमे ॥ १७२ ॥
तुषारो हिमभेदे च मकरेऽपि हिमेऽपि च ॥
शुनारस्तु शुनीस्तन्ये सर्पाण्डकलविङ्कयोः ॥ १७३ ॥
कुमारो बालके स्कन्दे युवराजेऽश्वचारके ॥
शुके च वरुणद्रौ च कुमारं जात्यकाञ्चने ॥ १७४ ॥
कुमारी रामतरणीनवमाल्योर्नदीभिदि ॥
कन्याऽपराजितागौरीजम्बूद्वीपेषु च स्मृता ॥ १७५ ॥
आहारो भोजने हारे भवेदाहरणेऽपि च ॥
विहारो भ्रमणे स्कन्धे लीलायां सुगतालये ॥ १७६ ॥
कुटारं मैथुने विद्यात् कुटारं केवलेऽपि च ॥
कोट्टारो नागरे कूपे पुष्करिण्याञ्च पाटके ॥ १७७ ॥
कडारः पिङ्गले दासे सम्भारः सम्भृतौ गणे ॥
केनारः कुम्भिनरके शिरःकपालसन्धिषु ॥ १७८ ॥
शङ्करोऽग्निचटत्कारे सम्मार्ज्जन्यवपुञ्जिते ॥
नरदूषितकन्यायां शङ्करा क्काऽपि दृश्यते ॥ १७९ ॥
पङ्कारः शैवले सेतौ सोपाने जलकुब्जके ॥
संस्कारः प्रतियत्ने स्यात् सङ्कल्पेऽनुभवेऽपिच ॥ १८० ॥
शालारं स्याद्धस्तिनखे सोपाने पक्षिपञ्जरे ॥

कञ्जारो जठरे सूर्ये विरिञ्चौ वारणे मुनौ ॥ १८१ ॥
मार्ज्जार ओतौ धट्वांशे भृङ्गारः कनकालुके ॥
भृङ्गारी झिल्लिकायां स्यादङ्गारोऽलातभौमयोः ॥ १८२ ॥
शृङ्गारः सुरते नाट्यरसेऽपि गजमण्डने ॥
शृङ्गारं चूर्णसिन्दूरलवङ्गकुसुमेषु च ॥ १८३ ॥
विस्तारो विस्तृतौ स्तम्ब उद्धारश्चोद्धृतावृणे ॥
माठरो द्विजभेदे स्याद्व्यासेऽर्कपारिपार्श्वके ॥ १८४ ॥
शावरः पठ्यते रोध्रे तथा पापापराधयोः ॥
शावरी शूकशिम्ब्याञ्च शारीरं देहजे वृषे ॥ १८५ ॥
करीरः कलशे वृक्षभेदे वंशाङ्कुरेऽपि च ॥
करीरी चीरिकायाञ्च दन्तमूले च दन्तिनाम् ॥ १८६ ॥
शणीरं शोणमध्यस्थपुलिने दर्दरीतटे ॥
जम्बीरं प्रस्थपुष्पाख्यशाके दन्तशठेऽपि ॥ १८७ ॥
औशीरमाहुश्चमरदण्डे च शयनासने ॥
सौवीरं बदरे स्तोत्राञ्जने देशे च काञ्जिके ॥ १८८ ॥
किर्मीरः कर्वुरे दैत्यराक्षसान्तरयोरपि ॥
काश्मीरं कुङ्कुमे प्रोक्तं टङ्कपुष्करमूलयोः ॥ १८९ ॥
पाटीरो वार्तिके रङ्गे मूलके तितउन्यपि ॥
धाराधरेऽपि केदारे वेणुसारेऽपि चेष्यते ॥ १९० ॥
अण्डीरः पुरुषे शक्ते हिण्डीरः पुरुषे स्मृतः ॥
फेणे वातिङ्गणे चाऽपि धूसरः पाण्डुरे खरे ॥ १९१ ॥
कूबरः कुब्जके चारौ कूबरश्च युगन्धरे ॥
रूबरोऽश्मश्रुपुरुषे प्रौढाशृङ्गवृषेऽपि च ॥ १९२ ॥
स्यान्नीवरो वाणिजके वास्तव्येऽपि च नीवरः ॥
पीवरः कच्छपे स्थूले धीवरो लुब्धके बुधे ॥ १९३ ॥

केशरं हिङ्गुनि प्रोक्तं केशरो नागकेशरे ॥
सिंहच्छटायां पुन्नागकिञ्जल्कबकुलेष्वपि ॥ १९४ ॥
किशोरस्तरुणावस्थे हयशावकसूर्ययोः ॥
तैलायन्यां कुबेरस्तु नन्दीवृक्षे धनाधिपे ॥ १९५ ॥
कणेरुः स्याद्वशावेश्याकर्णिकारे गणेरुवत् ॥
कैटीरुः शक्रगोपे च शक्रे च नकुलेऽपि च ॥ १९६ ॥
अगुरुः स्याच्छिंशपायां जोङ्गकेऽपि लघुन्यपि ॥
किंशारुः सस्यशूकेऽपि विशिखे कङ्कपक्षिणि ॥ १९७ ॥
भार्यारुः शैलभेदे स्यान्मृगभेदे च तत्र च ॥
क्रीडायां परभार्यायां पुत्रो येनोपपादितः ॥ १९८ ॥
कुठारुः पादपे कीशे कटप्रूः स्यान्महानटे ॥
विद्याधरे रक्षसि च कटप्रूरक्षदेवने ॥ १९९ ॥
दासेरो दासिकापुत्रे दासेरः स्यात् क्रमेलके ॥
मयूरो बर्हिचूडायामपामार्गे शिखण्डिनि ॥ २०० ॥
खर्ज्जूरं रजते विद्याद्वृश्चिकद्रुमभेदयोः ॥
खर्ज्जूरश्चाऽथ कर्च्चूरं शटीकाञ्चनयोर्मतम् ॥ २०१ ॥
सिन्दूरस्तरुभेदे स्यात् सिन्दूरं रक्तचूर्णके ॥
सिन्दूरी रोचनीरक्तचेलिकाधातकीषु च ॥ २०२ ॥
वल्लूरं स्याद्वनक्षेत्रे वाहनोषरयोरपि ॥
वल्लूरमाहुः संशुष्कमांसशूकरमांसयोः ॥ २०३ ॥
एकाग्रमेकताने स्यादेकाग्रश्चाप्यऽनाकुले ॥
नरेन्द्रो वार्त्तिके राज्ञि विषवैद्येऽपि कथ्यते ॥ २०४ ॥
महेन्द्रः पर्वते शक्रे जलेन्द्रो वरुणेऽम्बुधौ ॥
जम्भलेऽपि जलेन्द्रः स्यात् सामुद्रं देहलक्षणे ॥ २०५ ॥
सामुद्रश्च समुद्रीयलवणादिषु भेद्यवत् ॥

खण्डाभ्रमभ्रलेशे स्यात् स्त्रीणां दन्तक्षतान्तरे ॥ २०६ ॥
कटित्रं रसनायां स्याच्चर्माङ्गे कटिवाससि ॥
शिलीन्ध्रं कदलीपुष्पे करकात्रिपुटाख्ययोः ॥ २०७ ॥
शिलीन्ध्रः कथितो धीरैस्तङ्गमीनप्रभेदयोः ॥
मृदा गण्डूपदी प्रोक्ता शिलीन्ध्री विहगीभिदि ॥ २०८ ॥
तमिस्रं तिमिरे कोपे तमिस्रा च तमस्ततौ ॥
कृष्णपक्षनिशायाञ्च त्वक्पत्रन्तु वराङ्गके ॥ २०९ ॥
त्वक्पत्रीति च कारव्यां कलत्रं श्रोणिभार्ययोः ॥
दुर्गस्थाने नृपादीनां पवित्रं वर्षणे कुशे ॥ २१० ॥
पवित्रं ताम्रपयसोमेध्ये चाऽपि तदन्यवत् ॥
सावित्रः शङ्करे प्रोक्तः सावित्री देवतान्तरे ॥ २११ ॥
दैत्यारिस्त्रिदशे विष्णौ तित्तिरिर्विहगे मुनौ ॥
शङ्करिर्विभेदे स्कन्दे जैमुरिः पावके पवौ ॥ २१२ ॥
मन्दुरा वाजिशालायां समीपार्थे च वस्तुनि ॥
उर्वरा सर्वसस्याढ्यभूमौ स्याद् भूमिमात्रके ॥ २१३ ॥
असुरा रजनीवास्योरसुरो दानवे रवौ ॥
वासुरा वासितायां स्याद्वासितेय्यां मता भुवि ॥ २१४ ॥
मसूरा मसुरा व्रीहिप्रभेदे पण्ययोषिति ॥
मसूरमसुरौ च द्वावेतावप्येतयोर्मतौ ॥ २१५ ॥
शर्करा खण्डविकृतावुपलाकर्परांशयोः ॥
शर्करान्वितदेशे च रुग्भेदे सकलेऽपि च ॥ २१६ ॥
कच्छुरा शूकशिम्ब्याञ्च शटीदुःस्पर्शयोरपि ॥
कच्छुरं वाच्यवत् प्राहुः पामरे पुंश्चलेऽपि च २१७ ॥
मर्मरा तु दरीभाण्डमुररानिकुलासु च ॥
गायत्री कथिता छन्दःप्रभेदे खदिरेऽपि च ॥ २१८ ॥

सैरिन्ध्री परवेश्मस्थशिल्पकृत्स्ववशस्त्रियाम् ॥
वर्णसङ्करसम्भूतस्त्रीमहल्लिकयोरपि ॥ २१९ ॥
खदिरी शाकभेदे स्यात् खदिरो दन्तधावने ॥
सुन्दरी स्त्रीतरुभिदोः शर्वरी रात्रियोषितोः ॥ २२० ॥
हरिद्रायाश्च कवरी केशशाकविशेषयोः ॥
कवरं लवणेऽम्ले च तुम्वरी शरमर्द्दयोः ॥ २२१ ॥
मञ्जरी वल्लरीस्थूलमुक्तातिलकशाखिषु ॥
मर्म्मरी पीतदारौ स्याद्वस्त्रभेदे च मर्म्मरः ॥ २२२ ॥
टट्टरी स्यान्मृषावादे लम्पापटहवाद्ययोः ॥
शक्वरा मेखलानद्योश्छन्दोभेदेऽपि शक्करी ॥ २२३ ॥
सल्लरी सिल्लरी च द्वे हुडुक्के चारचक्रके ॥
कावेरी स्यात् सरिद्भेदे पण्यनारीहरिद्रयोः ॥ २२४ ॥

रचतुष्कम् ॥

भवेत् परिकरो व्राते पर्यङ्कपरिवारयोः ॥
प्रगाढगात्रिकाबन्धे विवेकारम्भयोरपि ॥ २२५ ॥
व्यतिकरः समाख्यातो व्यसनव्यतिषङ्गयोः ॥
विभाकरोऽग्नौ तपनेऽवस्करो गूथगुह्ययोः ॥ २२६ ॥
कर्म्मकरस्तु कीनाशे भृत्ये वेतनजीविनि ॥
कर्म्मकरी तु मूर्वायां बिम्बिकायामपि क्वचित् ॥ २२७ ॥
अरुष्कारो व्रणकृति भल्लाते चाप्यरुष्करम् ॥
भवेत् सहचरो झिण्ट्यां वयस्यं प्रतिबिम्बके ॥ २२८ ॥
निशाचरः पेचकाहियातुधानेषु फेरवे ॥
निशाचरी पंसुलायां भवेत् पक्षचरो विधौ ॥ २२९ ॥
यूथभ्रष्टपृथक्चारी वारणेऽपि प्रकीर्त्तितः ॥
चराचरं स्याज्जगति वाच्यवज्जङ्गमेङ्गयोः ॥ २३० ॥

विदुर्दशपुरं देशे मुस्तायां पत्तनेऽपि च ॥
अभिमरो वधे युद्धे तथा स्वबलसाध्वसे ॥ २३१ ॥
आहुः प्रतिसरं हस्तसूत्रे माल्येऽपि मण्डने ॥
वृणशुद्धौ चमूपृष्ठे नियोज्यारक्षकङ्कणे ॥ २३२ ॥
मन्त्रभेदेऽप्यवसरो वर्षप्रस्तावयोरपि ॥
स्मृतः परिसरो मृत्यौ दैवोपान्त्यप्रदेशयोः ॥ २३३ ॥
दिगम्बरः स्यात् क्षपणे नग्ने तपसि शङ्करे ॥
पीताम्बरः पद्मनाभे भवेत् पीताम्बरो नटे ॥ २३४ ॥
कादम्बरन्तु दध्यग्रे मद्यभेदे च शीधुनि ॥
कादम्बरी परभृताभारतीशारिकासु च ॥ २३५ ॥
उदुम्बरस्तु देहल्यां वृक्षजातौ च पण्डके ॥
उदुम्बरं स्मृतं ताम्रे कुष्टभेदेऽप्युदुम्बरः ॥ २३६ ॥
औदुम्बरः श्राद्धदेवे रोगभेदे च कथ्यते ॥
नीलाम्बरः प्रलम्बघ्ने कौणपे क्रूरलोचने ॥ २३७ ॥
आडम्बरः समारम्भे गजगर्ज्जिततूर्ययोः ॥
निषद्वरस्तु जम्बाले निशायाञ्च निषद्वरी ॥ २३८ ॥
उपह्वरं समीपे स्यादेकान्ते चाऽप्युपह्वरम् ॥
इन्दीवरं कुवलये वर्य्यामिन्दीवरी मता ॥ २३९ ॥
कारञ्जरो योगिचक्रे मेलके भैरवे गिरौ ॥
कारञ्जरोऽच्युते शक्रे भवेद्विश्वम्भरा भुवि ॥ २४० ॥
दुरोदरो द्यूतकरे पणे द्यूते दुरोदरम् ॥
लम्बोदरः स्यादुद्ध्माते गणानामधिपेऽपि च ॥ २४१ ॥
अनुत्तरः स्मृतः श्रेष्ठे प्रतिजल्पविवर्ज्जिते ॥
तुलाधरस्तुलाराशौ भवेद्वाणिजकेऽपि च ॥ २४२ ॥
भवेत्तोयधरो मेघे सुनिषण्णौषधेऽपि च ॥

धुरन्धरो धवतरौ धूर्वहेऽपि धुरन्धरः ॥ २४३ ॥
चक्रधरो हरौ सर्पे वाच्यवद्ग्रामजालिनि ॥
अश्वतरो वेसरे च नागराजान्तरेऽपि च ॥ २४४ ॥
विदुर्वीरतरं श्रेष्ठे शरवीरणयोरपि ॥
नभश्चरो घने वाते विद्याधरविहङ्गयोः ॥ २४५ ॥
उद्दन्तुरः स्यादुत्तुङ्गे करालोत्कटदन्तयोः ॥
द्वैमातुरो जरासन्धवारणाननयोर्मतः ॥ २४६ ॥
परम्परः प्रपौत्रादौ मृगभेदे परम्परः ॥
परम्परा परीपाट्यं सन्तानेऽपि वधे क्वचित् ॥ २४७ ॥
धराधरः क्ष्माभृति चक्रपाणौ
धाराधरस्तोयधरे कृपाणे ॥
पयोधरः स्यात् कुचकोषकार-
कसेरुकाम्भोधरनारिकेले ॥ २४८ ॥
कलिकारः करञ्जे स्याद् धूम्याटे पीतमस्तके ॥
अलङ्कारस्तूपमादौ हारकेयूरकादिषु ॥ २४९ ॥
कर्णिकारश्च सम्पाके कर्णिकारो द्रुमोत्पले ॥
रथकारस्तु माहिष्ये करणीजे च तक्षणि ॥ २५० ॥
चर्मकारः स्मृतः पादुकृति चर्म्मकषौषधे ॥
चर्म्मकारी च कथिता प्रतिकरः समे भटे ॥ २५१ ॥
घनसारस्तु कर्पूरे दक्षिणावर्त्तपारदे ॥
कृष्णसारः स्नुहीवृक्षे शिंशपामृगभेदयोः ॥ २५२ ॥
गिरिसारो भवेल्लोहे लिङ्गे मलयपर्वते ॥
पीतसारो मलयजे गोमेदकमणावपि ॥ २५३ ॥
शालसारो द्रुमे हिङ्गौ सूत्रधारः शचीपतौ ॥
नाट्यानन्तरसञ्चारिपात्रशिल्पिप्रभेदयोः ॥ २५४ ॥

दण्डधारो यमे भूपे सम्प्रहारो रणे गतौ ॥
प्रतीहारप्रतीहार्यौ द्वाःस्थे द्वारेऽप्यनन्तरे ॥ २५५ ॥
अभिहारोऽभियोगे च चौर्ये सन्नहनेऽपि च ॥
व्यवहारो द्रुभेदे स्याद्व्यवहारः पणे स्थितौ ॥ २५६ ॥
अवहारः स्मृतश्चौरे द्यूतयुद्धादिविश्रमे ॥
निमन्त्रणोपनेतव्यद्रव्ये ग्राहाख्ययादसि ॥ २५७ ॥
परिवारः परिजने खड्गकोषे परिच्छदे ॥
पारावारः समुद्रे च पारावारं तटद्वये ॥ २५८ ॥
अवतारोऽवतरणपुष्करिण्यादितीर्थयोः ॥
अकूपारः समुद्रेऽपि कूर्मराजेऽपि कीर्त्तितः ॥ २५९ ॥
शिशुमारोऽम्बुसम्भूतजन्तौ तारात्मकाच्युते ॥
सुकुमारश्च पुण्ड्रेक्षौ कोमले त्वऽभिधेयवत् ॥ २६० ॥
धुन्धुमारः शक्रगोपे गृहधूमे पदालिके ॥
कर्णपूरोऽवतंसे स्यान्नीलोत्पलशिरीषयोः ॥ २६१ ॥
करवीरः कृपाणे स्याद्दैत्यभेदाश्वमारयोः ॥
श्रेष्ठगव्यां पुत्रवत्यामदितौ करवीर्यऽपि ॥ २६२ ॥
महावीरः पवौ तार्क्ष्ये शूरे सिंहेऽपि कोकिले ॥
मखानले च कर्के च महावीरो जराटके ॥ २६३ ॥
आत्मवीरः प्राणवति श्यालपुत्रे विदूषके ॥
चार्वटीरस्त्रपावाम्रास्थ्न्यङ्कुरे गणिकासुते ॥ २६४ ॥
चित्रटीरो विधौ भालमङ्कितं येन तत्र च ॥
घण्टाकर्णोपहाराय हतच्छागास्रविन्दुभिः ॥ २६५ ॥
पात्रटीरो बुधैरुक्तो मुक्तव्यापारमन्त्रिणि ॥
लोहकांस्ये जरत्पात्रे प्रमाणे पावकेऽपि च ॥ २६६ ॥
धाराङ्कुरः सुनासीरे शीकरेऽपि घनोपले ॥

समुद्रारुः स्मृतो ग्राहे सेतुबन्धे तिमिङ्गिले ॥ २६७ ॥
विश्वकद्रुः खले ध्वाने स्यादाखेटिककुक्कुरे ॥
असिपत्रो भवेत् कोषकारे च नरकान्तरे ॥ २६८ ॥
शतपत्रो राजकीरे दार्वाघाटमयूरयोः ॥
राजीवे शतपत्रन्तु वातपुत्रो हनूमति ॥ २६९ ॥
महाधूर्त्ते च भीमे च लक्ष्मीपुत्रः स्मरे हये ॥
पूर्णपात्रं वस्तुपूर्णपात्रे वर्द्धापकेऽपि च ॥ २७० ॥
महामात्रः समृद्धेऽग्रमात्येहास्तिपकाधिपे ॥
[illegible] विदुः शारिफलके चतुरङ्गके ॥ २७१ ॥
रागसूत्रं तुलासूत्रे पट्टसूत्रेऽपि दृश्यते ॥
तालपत्रन्तु ताटङ्के रण्डायां तालपत्र्यपि ॥ २७२ ॥
अग्निहोत्रोऽग्निहविषोर्वीतिहोत्रोऽनलार्कयोः ॥
वीरभद्रोऽश्वमेधाश्वे वीरश्रेष्ठे च वीरणे ॥ २७३ ॥
पारिभद्रस्तु मन्दारनिम्बपादपयोर्मतः ॥
बलभद्रो रौहिणेये त्रायमाणौषधावपि ॥ २७४ ॥
बलभद्रा कुमार्यां स्यादर्द्धचन्द्रस्तु चन्द्रके ॥
गलहस्ते वाणभेदेऽप्यर्द्धचन्द्रा त्रिवृद्भिदि ॥ २७५ ॥
धार्त्तराष्ट्रोऽसितास्याङ्घ्रिहंसकौरवभोगिषु ॥
धृतराष्ट्रः सुराज्ञि स्यात् पक्षिक्षत्रियभेदयोः ॥ २७६ ॥
धृतराष्ट्री हंसपत्न्यां स्थिरदंष्ट्रो भुजङ्गमे ॥
वराहाकृतिविष्णौ च वक्रनक्रः शुके खले ॥ २७७ ॥
कटम्भरा प्रसारण्यां रोहिण्यां गजयोषिति ॥
कलम्बिकायां गोलायां वर्षाभूमूर्वयोरपि ॥ २७८ ॥
मणिच्छिद्रा तु मेदायामृषभाख्यौषधेऽपि च ॥
तुङ्गभद्रा नदीभेदे तुङ्गभद्रो मदोत्कटे ॥ २७९ ॥

दण्डयात्रा दिग्विजये सन्दानवरयात्रयोः ॥
देहयात्रा भोजने स्यात् कृतान्तागमनेऽपि च ॥ २८० ॥
विभावरी हरिद्रायां रजन्याञ्च विभावरी ॥
विवादे वस्त्रकुट्याञ्च कुट्टन्यां चक्रयोषिति ॥ २८१ ॥
कुम्भकारी कुलाल्यां स्यात् कुम्भकारः कुलालके ॥
तुण्डिकेरी तु कार्पास्यां बिम्बिकायामपीष्यते ॥ २८२ ॥

रपञ्चकम् ॥

पांशुसञ्चार इत्येष दूर्वाञ्चिततटीभुवि ॥
वर्द्धापके प्रशंसायां पुरोटौ धूलिगुच्छके ॥ २८३ ॥
स्यात् पादचत्वरश्छागे सैकते पिप्पलेऽपि च ॥
विप्रतीसारमिच्छन्ति कौकृत्येऽनुशये रुषि ॥ २८४ ॥
समभिहारो भृशत्वे पौनःपुन्येऽपि कथ्यते ॥
करके परदोषैकभाजि पूरुषकेऽपि च ॥ २८५ ॥
पीतकावेरमिच्छन्ति पित्तले कुङ्कुमेऽपि च ॥
तालीशपत्रं तालीशे तामलक्यामपि स्मृतम् ॥ २८६ ॥
भवेत्तुलसीपत्रन्तु तद्दले स्त्रीनखक्षते ॥
तमालपत्रं तापिञ्छे तिलके पत्रकेऽपि च ॥ २८७ ॥
सर्वतोभद्र इत्युक्तः काव्यचित्रे गृहान्तरे ॥
निम्बेऽपि सर्वतोभद्रा गम्भारीनटयोषितोः ॥ २८८ ॥
वस्वौकसारा श्रीदस्य शक्रस्य नलिनीपुरोः ॥
भवेत् कपिलधाराख्या स्वर्नदीतीर्थभेदयोः ॥ २८९ ॥

इति रान्तवर्गः ॥

—:०:—

लद्विकम् ॥

बलं गन्धरसे रूपे स्थामनि स्थौल्यसैन्ययोः ॥

बलो हलायुधे दैत्यभेदे वलिनि वायसे ॥ १ ॥
वाव्यालके बला तूक्ता पलश्चोन्मानमांसयोः ॥
फलं हेतुसमुत्थे स्यात् फलके व्युष्टिलाभयोः ॥ २ ॥
जातीफलेऽपि कक्कोले सस्यवाणाग्रयोरपि ॥
फालिन्यान्तु फलं प्राहुस्त्रिफलायां फलं क्वचित् ॥ ३ ॥
जलं गोकवले नीरे ह्रीवेरे च जडेऽन्यवत् ॥
खलं भूस्थानकल्केषु क्रूरे नीचेऽधमे खलः ॥ ४ ॥
गलः सर्ज्जरसे कण्ठे चलः कम्पे चलाश्रये ॥
दलं शस्त्री छदोत्सेधतद्द्रव्ये खण्डपर्णयोः ॥ ५ ॥
नलः पोटगले राज्ञि पितृदेवे कपीश्वरे ॥
नली मनःशिलायान्तु मलिने तु नलं मतम् ॥ ६ ॥
तलं स्वरूपाधरयोः खड्गमुष्टिचपेटयोः ॥
ज्याघातवारणेऽपि स्यात्तलस्तालतरावपि ॥ ७ ॥
मलं किट्टे पुरीषे च पापे च कृपणे मलः ॥
शलन्तु शल्लकीलोम्नि शलो भृङ्गे गणे विधौ ॥ ८ ॥
खिलं भवेदप्रहते सारसंक्षिप्तवेधसोः ॥
बिलं छिद्रे गुहायाञ्च बिल उच्चैःश्रवोहये ॥ ९ ॥
वलन्तु स्खलिते व्याजे पुलन्तु पुलिनेऽन्यवत् ॥
पुलः स्यात् पुलके चाऽपि कुलं जनपदे गृहे ॥ १० ॥
सजातीयगणे गोत्रे देहेऽपि कथितं कुलम् ॥
कालो मृत्यौ महाकाले समये यमकृष्णयोः ॥ ११ ॥
कृष्णात्रिवृत्तौ काला तु नीलीमञ्जिष्ठयोरपि ॥
काली गौर्य्यां क्षीरकीटे कालिकामातृभेदयोः ॥ १२ ॥
नवाम्बुवाहवृन्देऽपि परिवादेऽपि च क्वचित् ॥
भालं ललाटमहसोर्गालः स्कन्दमहीरुहोः ॥ १३ ॥

शालो हालनृपे मत्स्यप्रभेदे सर्ज्जपादपे ॥
शाला गृहे तरुस्कन्धशाखागारैकदेशयोः ॥ १४ ॥
मालं क्षेत्रे गृहे मालो माला पुष्पादिदामनि ॥
सालः पादपमात्रं स्यात् प्राकारे शङ्कुकद्रुमे ॥ १५ ॥
तालः करतलेऽङ्गुष्ठमध्यमाभ्याञ्च सम्मिते ॥
गीःकालक्रियामाने तालः खड्गादिमुष्टिषु ॥ १६ ॥
द्रुमभेदे करास्फाले तालन्तु हरितालके ॥
वाद्यभाण्डे च कांस्यस्य तालश्छदिषि कम्पने ॥ १७ ॥
जालं गवाक्ष आनाये क्षारके दन्तवृन्दयोः ॥
जालो नीपद्रुमे जाली कोषातक्यामुदाहृता ॥ १८ ॥
व्यालो भुजङ्गमे क्रूरे श्वापदे दुष्टदन्तिनि ॥
नालं दण्डे सरोजस्य नाली शाककलम्बके ॥ १९ ॥
स्थालं भाजनभेदेऽपि स्थाली स्यात् पाटलोखयोः ॥
फालं शिरोपकरणे कार्पासादिकवाससि ॥ २० ॥
वालः कचे शिशौ मूर्खे ह्रीवेरे श्वेभपुच्छयोः ॥
अलङ्कारान्तरे मेध्ये वाली वाला त्रुटिस्त्रियोः ॥ २१ ॥
चेलो नीचेऽन्यवच्चेलमंशुके गर्हितेऽन्यवत् ॥
भेलः प्लवे भीरुके च निर्बुद्धिमुनिभेदयोः ॥ २२ ॥
कोलोऽङ्कपालावुत्सङ्गे भेलके पोत्रिचित्रयोः ॥
कोला कणायां चव्ये च कोलन्तु बदरीफले ॥ २३ ॥
शैलो भूभृति शैलन्तु शैलेये तार्क्ष्यशैलके ॥
शीलं स्वभावे सद्वृत्ते नीलः कृष्णे नगान्तरे ॥ २४ ॥
नीलः कपीश्वरे नीली वृक्षलाञ्छनभेदयोः ॥
कूलं स्तूपे तडागे च सैन्यपृष्ठप्रतीरयोः ॥ २५ ॥
कूलः पिचौ भवेत् कूलं ब्रह्मदारुविहायसोः ॥

मूलमाद्ये शिफायां स्याद्वनिकुञ्जान्तिकेषु च ॥ २६ ॥
शूलं प्रहरणे मृत्यौ केतने रोगयोगयोः ॥
शूला दुष्टवधार्थाय कीलके पण्ययोषिति ॥ २७ ॥
स्थूलं स्यात् पीवरे कूटे निष्प्रज्ञे पुनरन्यवत् ॥
अम्लो रसप्रभेदे स्यादाम्ली चाङ्गेरिकौषधौ ॥ २८ ॥
शुक्लो योगान्तरे श्वेते शुक्लश्च रजते मतम् ॥
मल्लः पात्रे कपाले च मत्स्यभेदे बलीयसि ॥ २९ ॥
भल्लो भल्ली च बाणे स्याद्भल्लो भल्लुक इष्यते ॥
भल्लातक्यान्तु भल्ली स्यादोल्लश्चार्द्रे च शूरणे ॥ ३० ॥
चुल्लचिल्लौ मतौ क्लिन्ने नेत्रे क्लिन्नाक्षिण पिल्लवत् ॥
आतापिनि भवेच्चिल्लश्चिल्ली स्याद्गौडवास्तुके ॥ ३१ ॥
चुल्ली चितायामुद्धाने क्वचिद्वाद्येऽप्युदीरिता ॥
बल्ली वीरुधि सन्ताने वल्कले कुसुमाम्बरे ॥ ३२ ॥
खल्ली तु हस्तपादावमर्दनाख्यरुजि स्मृता ॥
खल्लो वस्त्रप्रभेदे स्यान्निम्ने चर्मणि चातके ॥ ३३ ॥
आलुर्गलन्तिकायां स्यात् कन्दभेदे च भेलके ॥
पीलुर्गजे द्रुमे काण्डे परमाणुप्रसूनयोः ॥ ३४ ॥
पीलुस्तालास्थिखण्डे च मालुः पत्रलतास्त्रियोः ॥
शालुः कषायद्रव्ये स्याच्चौरकाख्यौषधेऽपि च ॥ ३५ ॥
वलिश्चामरदण्डे च जरया श्लथचर्मणि ॥
उदरावयवे दैत्ये करपूजोपहारयोः ॥ ३६ ॥
गृहदारुविशेषे च गन्धकेऽपि क्वचिन्मतः ॥
दोला यानान्तरे नील्यां मेला स्यान्मेलके मुनौ ॥ ३७ ॥
इला कलत्रे सौम्यस्य धरित्र्यां गवि वाचि च ॥
कीलः कफोणौ निर्घाते शङ्काज्वाले तु कीलवत् ॥ ३८ ॥

जगलः पिष्टमद्ये च मेदके मदनद्रुमे ॥ ६२ ॥
कितवे छगलश्छागे छगली छागमातरि ॥
वृद्धदारकभैषज्ये छगलं नीलवाससि ॥ ६३ ॥
पिप्पलो बोधिवृक्षे स्यात् पक्षिभेदे निरङ्कुले ॥
पिप्पलं वसनच्छेदे भेदेऽपि सलिले मतम् ॥ ६४ ॥
कणायां पिप्पली चोक्ता धवलः सुन्दरे सिते ॥
महोक्षे चाऽथ धवली सौरभेय्यामुदीरिता ॥ ६५ ॥
कुवलश्चोत्पले मुक्ताफलेऽपि बदरीफले ॥
कुशलः शिक्षिते क्षेमपर्याप्तिसुकृतेषु च ॥ ६६ ॥
कुशलं मुषलं तु स्यादयोऽग्रे मुषली मता ॥
तालमूल्यामाखुपर्णी गृहगोधिकयोरपि ॥ ६७ ॥
निचुलो हिज्जलतरौ निचुलश्च निचोलके ॥
पिचुलो झावुकेऽपि स्याद् हिज्जले जलवायसे ॥ ६८ ॥
विपुलः पृथुलेऽगाधे मेरुपश्चिमभूधरे ॥
तुमुलः कलिवृक्षे स्यात्तुमुलं रणसङ्कुले ॥ ६९ ॥
बहुलः कृष्णपक्षेऽग्नौ शितौ च बहुला गवि ॥
एलायां नीलिकायाञ्च बहुला कृत्तिकासु च ॥ ७० ॥
बहुलं प्राज्यनभसोर्मातुलो मदनमद्रुमे ॥
मातृभ्रातरि धुत्तूरे व्रीहिभेदेऽपि मातुलः ॥ ७१ ॥
कुटिलं वाच्यवद् भुग्ने कुटिला सरिदन्तरे ॥
जटिलस्तु जटायुक्ते जटिला मांसिकौषधौ ॥ ७२ ॥
सुतलप्रतलौ चेति पातालभुवनद्वये ॥
स्यातामट्टालिकाबन्धे तताङ्गुलिकरे क्रमात् ॥ ७३ ॥
पित्तलं तैजसद्रव्ये पित्तलः पित्तसङ्गते ॥
पित्तला तोयपिप्पल्यां निस्तलं वर्तुले चले ॥

कुन्तलः स्याद्यवे देशे केशल्लाङ्गलयोरपि ॥ ७४ ॥
कम्वलो नागराजे स्यात् सास्नाप्रावारयोः कृमौ ॥
कम्वलश्चोत्तरासङ्गे कम्वलं सलिले मतम् ॥ ७५ ॥
शम्वलं कुलपाथेयमत्सरेषु समीरितम् ॥
कन्दलस्तु कपाले स्यादुपरागे नवाङ्कुरे ॥ ७६ ॥
कलध्वनौ कन्दली तु मृगपक्षिविशेषयोः ॥
पिङ्गलः स्यान्मुनौ रुद्रे चण्डांशोः पारिपार्श्वके ॥ ७७ ॥
निधिभेदे कपावह्नौ पिङ्गलः कपिलेऽन्यवत् ॥
करायिकायां वेश्यायां पिङ्गला कुमुदस्त्रियाम् ॥ ७८ ॥
जङ्गलो जलनिर्मुक्तदेशे मांसे च जङ्गलम् ॥
मङ्गलं श्रेयसि श्वेतदूर्वायामपि मङ्गला ॥ ७९ ॥
सर्वार्थलक्षणे चापि मङ्गलं समुदीरितम् ॥
कुण्डलं वलये पाशे कुण्डलं कर्णपूरणे ॥
गुडूच्यां काञ्चनादौ च कुण्डली समुदीरिता ॥ ८० ॥

स्यान्मण्डलं द्वादशराजके च
देशे च विम्वे च कदम्वके च ॥
कुष्ठप्रभेदेऽप्युपसूर्यकेऽपि
भुजङ्गभेदे शुनि मण्डलः स्यात् ॥ ८१ ॥

स्यादर्गलन्तु कल्लोले दण्डे चान्तःकपाटयोः ॥
निर्म्मलं विमले विद्यान्निर्म्माल्याभ्रकयोरपि ॥ ८२ ॥
शौष्कलः शुष्कमांसस्य पणके पिशिताशिनि ॥
पांशुलः पुंश्चले शम्भोः खट्वाङ्गे पांशुला भुवि ॥ ८३ ॥
सङ्कुलं वाच्यवद्व्याप्तेऽविस्पष्टार्थवचस्यपि ॥
उज्ज्वलो दीप्तशृङ्गारविशदेषु विकाशिनि ॥ ८४ ॥

वञ्जुलो वेतसाशोकतिनिशेष्वऽथ मञ्जुलम् ॥
निकुञ्जे शैवले मञ्जौ जलरङ्कौ तु मञ्जुला ॥ ८५ ॥
पिञ्जलन्तु हरिद्राभे कुशपत्रेऽपि पिञ्जलम् ॥
पुद्गलः सुन्दराकारे पुद्गलश्चात्मदेहयोः ॥
जम्भलो देवताभेदे जम्बीरेऽपि च जम्भलः ॥ ८६ ॥
कुम्भिलः श्यालके चौरे श्लोकच्छायाहरे झषे ॥
चन्द्रिलो नापिते ख्यातो हरवास्तुकशाकयोः ॥ ८७ ॥
ग्रन्थिलो ग्रन्थिसहिते करीरद्रौ विकङ्कते ॥
वामिलो दाम्भिके यामे रामिलो रमणे स्मरे ॥ ८८ ॥
वार्दलं दुर्दिने मेलानन्दायामपि वार्दलः ॥
तण्डुलाख्या विडङ्गे स्याद्धान्यादिनिकरेऽपि च ॥ ८९ ॥
वृषलः कथितः शूद्रे चन्द्रगुप्ते च वाजिनि ॥
निष्कलस्तु कलाशून्ये नष्टबीजे तु वाच्यवत् ॥ ९० ॥
पाकलं कुष्ठभैषज्ये पाकलः कुञ्जरज्वरे ॥
पाचलो राधनद्रव्येऽप्यनिलानलयोरपि ॥ ९१ ॥
माचलो वन्दिचौरे स्याद्ग्राहे रक्षसि चाऽमये ॥
पाटलः श्वेतरक्ते स्यादाशुव्रीहौ च पाटलः ॥ ९२ ॥
पाटलौ पाटलाऽपि स्यादस्याः पुष्पेऽपि पाटलम् ॥
लौहलः शृङ्खलाधार्ये भवेदव्यक्तवाचि च ॥ ९३ ॥
कोहलो मद्यभेदे स्यात् कोहलः स्यान्मुनावऽपि ॥
तैतिलो गण्डके मोक्तस्तैतिलं करणान्तरे ॥ ९४ ॥
हेमलः स्वर्णकारे स्यात् कृकलासे शिलान्तरे ॥
श्यामलो मेचकेऽश्वत्थे कोमलो मृदुले दले ॥ ९५ ॥
कामलः कामुके रोगे मरुदेशवसन्तयोः ॥
पेशलो रुचिरे दक्षे गोकिलो मुषले हले ॥ ९६ ॥

गौरिलो लोहचूर्णे स्याद्गौरिलो गौरसर्षपे ॥
फेनिलः स्यादरिष्टे च फेनिलं बदरीफले ॥ ९७ ॥
मदनस्य फले चाऽथ वाच्यवत् फेनवत्यपि ॥
शावलाख्या तु शैवाले शैलेयेऽपि च शावलम् ॥ ९८ ॥
शैवलं पद्मकाष्ठे च शैवलश्च जलाश्चले ॥
शीतलं पुष्पकासीसे शैलजे मलयोद्भवे ॥ ९९ ॥
भवेदासनपर्ण्याश्च शीतलः शिशिरेऽन्यवत् ॥
कल्लोलो हर्ष उल्लोले कल्लोलः परिपन्थिनि ॥ १०० ॥
पटोलमोषधीवस्त्रभिदोर्ज्योत्स्न्यां पटोल्यऽपि ॥
काकोलो विषभेदे स्याद्द्रोणकाककुलालयोः ॥ १०१ ॥
तमालस्तिलके खड्गे तापिञ्छे वरुणद्रुमे ॥
सुवेलः प्रणते शान्ते सुवेलः पर्वतान्तरे ॥ १०२ ॥
अवेलस्त्वपलापे स्यादवेला पूगचूर्णके ॥
कपालं शिरसोऽस्थ्नि स्याद् घटादिशकले व्रजे ॥ १०३ ॥
कुष्ठरोगविशेषे च गोपालो गोपभूपयोः ॥
किट्टालस्ताम्रकलशे किट्टालो लोहगूथके ॥ १०४ ॥
पातालं नागलोके स्यात् पातालं वडवानले ॥
प्रवालो वल्लकीदण्डे विद्रुमे नवपल्लवे ॥ १०५ ॥
अरालः कुटिले सर्ज्जरसे समददन्तिनि ॥
करालो दन्तुरे तुङ्गे करालश्च कुठेरके ॥ १०६ ॥
करालोद्धूनतैलेऽपि करालो भीषणेऽन्यवत् ॥
शृगालो जम्बुके दैत्ये शृगाली डमरे विदुः ॥ १०७ ॥
कुलालः कुम्भकारे स्यात् कुक्कुभे कौशिकेऽपि च ॥
कुद्दालो युगपत्रे स्यात् कुद्दालो भूमिदारणे ॥ १०८ ॥
विडालो नेत्रपिण्डे स्याद्विडालोऽपि खगान्तरे ॥

विडाली पूतनाभेदे लताघूकेऽपि शस्यते ॥
जम्बालं शैवले पङ्के कीलालं रुधिरे जले ॥ १०९ ॥
चण्ठीलं शूरयोर्युद्धे नौकायाश्च खनित्रके ॥
आभीलश्चाऽपि कृच्छ्रे स्यादाभीलश्च भयानके ॥ ११० ॥
नाभीलं नाभिगर्भाण्डे वङ्क्षणे प्रोक्तमस्त्रियाः ॥
उत्फुल्लः करणे स्त्रीणामुत्ताले च विकस्वरे ॥ १११ ॥
शयालुः स्यादजगरे निद्राशीलेऽपि कुक्कुरे ॥
श्रद्धालुर्दोहदिन्यांश्च श्रद्धावति तु वाच्यवत् ॥ ११२ ॥
लाङ्गुलं मेहने पुच्छे शार्दूलो राक्षसान्तरे ॥
व्याघ्रे च पशुभेदे च सत्तमे तूत्तरास्थितः ॥ ११३ ॥
वातूलो वातसङ्घाते वातुले मारुतासहे ॥
कुकूलं शङ्कुसङ्कीर्णे श्वभ्रे चाऽपि तुषानले ॥ ११४ ॥
कुकूलं स्याद् दुकूलन्तुक्षौमे सूक्ष्मांशुकेऽपि च ॥
जम्बूलो जम्बुविटपे जम्बूलः क्रकचच्छदे ॥ ११५ ॥
चषालो होमकुण्डे स्याद्वृत्ते चोत्ताल उत्कटे ॥
श्रेष्ठेऽपि विकरालेऽपि स्यादुत्तालः प्लवङ्गमे ॥ ११६ ॥
चूडाली तूच्चटायां स्याच्चूडावति तु वाच्यवत् ॥
विशाला त्विन्द्रवारुण्यां विशालोऽज्जायिनीपुरि ॥ ११७ ॥
विशालो वृक्षभेदेऽपि विशालः पृथुलेऽन्यवत् ॥
मेखला खड्गबन्धे स्यात् काञ्चीशैलनितम्बयोः ॥ ११८ ॥
शृङ्खला पुंस्कटीवस्त्रबन्धेऽपि निगडेऽपि च ॥
कुचेला विद्धपर्ण्यां स्यात् कुचेलस्तु कुवाससि ॥ ११९ ॥
अचला वसुधायां स्यादचलः शैलकीलयोः ॥
चञ्चला तु तडिल्लक्ष्म्योश्चञ्चलः कामुकेऽनिले ॥ १२० ॥
इल्वला तारकाभेदे इल्वलो दैत्यमत्स्ययोः ॥

पिच्छिला शाल्मलीसिन्धुभेदपोनकिकासु च ॥ १२१ ॥
पिच्छिला शिंशपायाञ्च पिच्छिलो विज्जलेऽन्यवत् ॥
सप्तला पाटलो गुञ्जानवमालिकयोरपि ॥ १२२ ॥
भवेच्चर्म्मकशायाञ्च महिला भीरुगुन्द्रयोः ॥
सिध्मला मत्स्यचूर्णे स्यात् सिध्मलश्च किलासिनि॥१२३॥
सन्धिला तु सुरुङ्गायां नदीमन्दिरयोरपि ॥
रसाला मार्ज्जितायां स्याज्जिह्वादूर्वाविदारिषु ॥
रसालं सिह्लके बोले रसालश्चेक्षुचूतयोः ॥ १२४ ॥
विमला शीतलायां स्याद् भुवो भेदे च निर्म्मले ॥
विमले चाऽमला लक्ष्म्यामऽमलं विशदेऽभ्रके ॥ १२५ ॥
श्रीफली नीलिकाधात्र्योर्मालूरे श्रीफलः स्मृतः ॥
खण्डाली तैलमाने स्यात् सरसीकामुकस्त्रियोः ॥ १२६ ॥
पातली वागुरायां स्यान्नारीमृत्पात्रभेदयोः ॥
जाङ्गली शूकशिम्ब्यां स्याज्जाङ्गलश्च कपिञ्जले ॥ १२७ ॥
लाङ्गली गजपिप्पल्यां लाङ्गलं कुसुमान्तरे ॥
सीरेऽपि लाङ्गलं तालगृहदारुविशेषयोः ॥ १२८ ॥
अङ्गुली करशाखायां कर्णिकायां गजस्य च ॥
जाङ्गुली विषविद्यायां जाङ्गुलं जालिनीफले ॥ १२९ ॥
कदली वैजयन्त्याञ्च रम्भायां हरिणान्तरे ॥
कदला शाल्मलीब्राह्मीडिम्बिकासु च कथ्यते ॥ १३० ॥
नकुली कुक्कुटीमांस्योर्नकुलः पाण्डवे पशौ ॥
नाकुली कुक्कुटीकन्दे नाकुली चव्यरास्नयोः ॥ १३१ ॥
नैपाली नवमालीमनःशिलासुवहासु च ॥
ताम्बूली नागवल्ल्याञ्च ताम्बूलं क्रमुकेऽपि च ॥ १३२ ॥
पञ्चाली पुत्रिकागीत्योः पञ्चालो जनदेशयोः ॥

शाल्मली तरुभेदे स्याद्द्वीपभेदे च शाल्मली ॥ १३३ ॥
केवलो ज्ञानभेदे स्यात् केवलश्चैककृत्स्नयोः ॥
निर्णीते केवलश्चोक्तं केवलः कुहने क्वचित् ॥ १३४ ॥
काहली तु तरुण्यां स्यात् काहलं भृशशुष्कयोः ॥
वाद्यभाण्डविशेषे तु काहला काहले खले ॥ १३५ ॥
गन्धोली वरटाभद्राशटीषु कथिता बुधैः ॥
अञ्जली कुडवे विद्यादञ्जलिः करसम्पुटे ॥ १३६ ॥

लचतुष्कम् ॥

मदकलः स्यान्मत्तेभे मदेनाव्यक्तवाचि च ॥
भवेत् कलकलः सर्ज्जरसे कोलाहलेऽपि च ॥ १३७ ॥
स्मृतो विचिकिलो मल्लीप्रभेदे मदनेऽपि च ॥
बृहन्नलो गुडाकेशे महापोटगले मतः ॥ १३८ ॥
परिमलो विमर्दे च स्यान्मनोहरगन्धवत् ॥
रतोपमर्दविकसद्देहरागादिसौरभे ॥ १३९ ॥
यवफलः स्मृतो वेणौ मांसीकुटजयोरपि ॥
मुक्ताफलन्तु कर्पूरे मौक्तिके लवलीफले ॥ १४० ॥
सदाफलः स्कन्दफले नारिकेलेऽप्युदुम्बरे ॥
विदुः कर्मफलं कर्मरङ्गकर्मविपाकयोः ॥ १४१ ॥
मृत्युफलो महाकाले कदल्यां मृत्युफल्यऽपि ॥
भवेद्वायुफलं शक्रकार्मुके करकेऽपि च ॥ १४२ ॥
हलाहलोविषे ज्येष्ठ्यां हयलालाह्वयोरगे ॥
कुतूहलं कौतुके स्यात् प्रशस्तेऽपि कुतूहलम् ॥ १४३ ॥
दलामलं दमनके तथा मरुवकेऽपि च ॥
महाबलं सीसके स्याद् बलाढ्येऽपि महाबला ॥ १४४ ॥
वेदातिबलायाञ्च खतमालो बलाहके ॥

धूमेऽपि कन्दरालः स्यात् पर्कटीगर्दभाण्डयोः ॥ १४५ ॥
महाकालस्त्रिनयने किम्पाके प्रमथान्तरे ॥
महानीलो भृङ्गराजे मणिनागविशेषयोः ॥ १४६ ॥
भवेद् बहुफलाभिख्याऽऽमलकीनीपवृक्षयोः ॥
जलाञ्चलं स्वतोवारिनिर्गमे शैवलेऽपि च ॥ १४७ ॥
गण्डशैलो ललाटे स्याच्च्युते स्थूलोपले गिरेः ॥
उलूखलं गुग्गुले स्यात् कण्डन्यर्थे उलूखलम् ॥ १४८ ॥
चक्रवालोऽद्रिभेदे स्याच्चक्रवालन्तु मण्डले ॥
स्मृतः पोटगलः काशे नले पोटगलो झषे ॥ १४९ ॥
हस्तिमल्लोऽभ्रमातङ्गे हस्तिमल्लो विनायके ॥
भस्मतूलं ग्रामकूटे पांशुवर्षे हिमेऽपि च ॥ १५० ॥
वातकेलिः कलालापे पिङ्गानां दन्तलेखने ॥
कमण्डलुः स्यात् करके पर्कटीपादपेऽपि च ॥ १५१ ॥
अक्षमालाऽक्षसूत्रे स्यादरुन्धत्यामपि स्मृता ॥
मणिमाला स्मृता हारे स्त्रीणां दन्तक्षतान्तरे ॥ १५२ ॥
ध्वनिलीला स्मृता वेणौ काहलावीणयोरपि ॥
रजस्वला पुष्पवत्यां सैरिभेऽपि रजस्वलः ॥ १५३ ॥
एकाष्ठीलामपि प्राहुः शिवमल्लौषधीभिदोः ॥
अतिबला बलाभेदे प्रवालेऽतिबलो मतः ॥ १५४ ॥
भद्रकाली तु गन्धोल्यामुमायामोषधीभिदि ॥
हरिताली नभोरेखादूर्वाखड्गलतासु च ॥ १५५ ॥
अन्धपाली स्मृता कोव्यां धात्रिकापरिरम्भयोः ॥
गन्धफली प्रियङ्गौ स्यात् कोरके चम्पकस्य च ॥ १५६ ॥

लपञ्चकम् ॥

आसुतीबल इत्याख्या कन्यापालकयज्वनोः ॥

स्यात् पण्डुकम्बलः श्वेतकम्बले च शिलान्तरे ॥ १५७ ॥
एककुण्डल इत्येष सौनन्दिनि धनाधिपे ॥
भवेदुद्दण्डपालस्तु सर्पमत्स्यप्रभेदयोः ॥ १५८ ॥
कूपीटपालमिच्छन्ति केनिपातसमुद्रयोः ॥
भवेत् सुरतताली तु दूतिकायां शिरःस्रजि ॥ १५९ ॥
इति लान्तवर्गः ॥

—:०:—

वैककम् ॥
वं प्रचेतसि जानीयादिवार्थे च तदव्ययम् ॥
स्वं ज्ञातावात्मधनयोरात्मीये च प्रचक्ष्यते ॥ १ ॥
वद्विकम् ॥
भवः संसारसम्प्राप्तिश्रेयःशङ्करजन्मसु ॥
दवो दाव इव ख्यातो वनाग्निवनयोरपि ॥ २ ॥
द्रवः प्रद्रावरसयोर्गतौ नर्मणि विद्रवे ॥
धवः पत्यौ नरे धूर्त्ते वृक्षभेदेऽपि कीर्त्तितः ॥ ३ ॥
जवो वेगिनि वेगे स्यादोण्ड्रपुष्पे जवा मता ॥
लवो लेशे विनाशे च छेदने रामनन्दने ॥ ४ ॥
प्लवः कारण्डवे भेके कुलके भेलके कपौ ॥
शब्दे प्लुतगतौ प्लक्षे चण्डालजलकाकयोः ॥ ५ ॥
प्लवं गन्धतृणे प्रोक्तं कैवर्त्तीमुस्तकेऽपि च ॥
हवो यज्ञे तथाह्वाने निदेशेऽपि हवो मतः ॥ ६ ॥
शवो मृते शवं नीरे सवः सन्धानयज्ञयोः ॥
क्षवः क्षुते राजिकायां नवं नव्ये स्तवे विदुः ॥ ७ ॥
ध्रुवः कीले शिवे शङ्कौ वसौ योगे वटे मुनौ ॥
ध्रुवा मूर्वाशालपर्ण्योर्गीतिस्रुग्भेदयोरपि ॥ ८ ॥

ध्रुवन्तु निश्चिते तर्के निश्चले शाश्वतेऽन्यवत् ॥
स्तुवाख्या सल्लकीमूर्वास्रुग्भेदेषु च विश्रुता ॥ ९ ॥
शिवं मोक्षे सुखे भद्रे सलिलेऽथ शिवो हरे ॥
वेदे योगान्तरे कीले वालुके गुग्गुलेऽपि च ॥ १० ॥
पुण्डरीकद्रुमे चाऽपि शिवा झण्टामलौषधौ ॥
अभयाऽऽमलकीगौरीक्रोष्ट्रीसक्तुफलासु च ॥ ११ ॥
दिवं स्वर्गेऽन्तरीक्षे च क्लीवं शण्डेऽप्यपौरुषे ॥
जीवो वृक्षप्रभेदे स्याज्जीवः प्राणिनि गीष्पतौ ॥ १२ ॥
जीवा जीवन्तिकाभूम्योर्मौर्वीशिञ्जितवृत्तिषु ॥
वचायामपि जीवा स्याज्जीवं जीव्यश्च जीविते ॥ १३ ॥
भावः स्वभावेऽभिप्राये चेष्टासत्तात्मजन्मसु ॥
क्रियालीलापदार्थेषु बुधजन्तुविभूतिषु ॥ १४ ॥
देवः सुरे घने राज्ञि देवमाख्यातमिन्द्रिये ॥
देवी भट्टारिकायाञ्च तेजनीस्पृक्कयोरपि ॥ १५ ॥
सत्त्वं द्रुमे पिशाचादौ बले द्रव्यस्वभावयोः ॥
आत्मत्वे व्यवसाये च चित्ते प्राणेषु जन्तुषु ॥ १६ ॥
सान्त्वं सामनि दाक्षिण्ये कण्वं पापे मुनौ विदुः ॥
किण्वं पापे सुराबीजे बिल्वन्तु श्रीफले फले ॥ १७ ॥
तत्त्वं वाद्यप्रभेदे स्यात् स्वरूपे परमात्मनि ॥
ह्रस्वखर्वाविमौ शब्दावेकार्थौ वामनार्थयोः ॥ १८ ॥
विश्वं समस्ते जगति विश्वदेवेऽपि नागरे ॥
विश्वा चाऽतिविषायां स्यादश्वः पुम्भेदवाजिनोः ॥ १९ ॥
पार्श्वं कक्षाधरे चक्रोपान्ते पर्शुगणेऽपि च ॥
प्राध्वं सुप्रणते चातिदूरवर्त्मनि बन्धने ॥ २० ॥
पक्वं परिणतार्थे स्याद्विनाशाभिमुखेऽपि च ॥

द्वन्द्वो रहस्ये कलहे द्वन्द्वं मिथुनयुग्मयोः ॥ २१ ॥
ऊर्द्ध्वं स्यादुच्छ्रिते तुङ्गे चोपरिष्टादपि स्मृतम् ॥
दिवं द्यौः स्वर्गलोके च गगने च प्रयुज्यते ॥ २२ ॥
अविः शैले रवौ मेषे भवेन्मूषिककम्बले ॥
ऋतुमत्यामविः प्रोक्ता शिविर्भूर्ज्जे नृपान्तरे ॥ २३ ॥
कविः काव्यकरे सूरौ कविर्वाल्मीकिशुक्रयोः ॥
कवी खलीने कथिता छविः शोभारुचोर्मता ॥ २४ ॥
ग्रीवाऽपि कन्धरायां स्यात्तच्छिरायामपीष्यते ॥
रेवा तरङ्गिणीभेदे रेवा नील्यां स्मरस्त्रियाम् ॥ २५ ॥
लट्वा करञ्जभेदेऽस्य फले वाद्ये खगान्तरे ॥
नीवी परिपणे ग्रन्थौ स्त्रीणां जघनवाससः ॥ २६ ॥
पृथ्वी भूमौ पृथौ हिङ्गुपत्रिकाकृष्णजीरयोः ॥
लघ्वी ह्रस्वविवक्षायां प्रभेदे स्यन्दनस्य च ॥ २७ ॥

वत्रिकम् ॥

प्रभवो जलमूले स्याज्जन्मभूमौ पराक्रमे ॥
आद्योपलब्धयोः स्थाने विभवो निर्वृतौ धने ॥ २८ ॥
प्रसवस्तु फले पुष्पे वृक्षाणां गर्भमोचने ॥
तोकोत्पादे च सचिवः सहाये मन्त्रिणि स्मृतः ॥ २९ ॥
कितवो धूर्त्तवन्मत्ते वञ्चके कनकाह्वये ॥
त्रिदिवस्त्रिदशावासे त्रिदिवा सरिदन्तरे ॥ ३० ॥
बल्लवः सूपकारे स्याद्भीमसेनेऽपि गोदुहि ॥
पल्लवः स्यात् किसलये विटपे विस्तरे बले ॥ ३१ ॥
शृङ्गारे रक्तरागे च विद्रवस्तु पलायने ॥
युद्धे च पुङ्गवः श्रेष्ठे वृषभे भेषजान्तरे ॥ ३२ ॥
उद्धवो मातुले विष्णोरुत्सवे क्रतुपावके ॥

उत्सवो मह उत्सेक इच्छाप्रसरकोपयोः ॥ ३३ ॥
केशवो वासुदेवे स्यात् पुन्नागे केशवत्यपि ॥
कैतवन्तु छले द्यूते फेरवो जम्बुकेऽस्रपे ॥ ३४ ॥
रौरवो नरके घोरे कैरवः कितवे रिपौ ॥
कैरवं कुमुदे चोक्तं चान्द्रिकायाञ्च कैरवी ॥ ३५ ॥
भैरवं भीषणे गर्भे भैरवः समुदाहृतः ॥
सैन्धवो मणिमन्थेऽपि सिन्धुदेशोद्भवाश्वयोः ॥ ३६ ॥
वाड़वं करणे स्त्रीणामौर्वे विप्रेऽपि वाड़वः ॥
वाड़वं वड़वासङ्घे वाड़वो रागनागयोः ॥ ३७ ॥
आश्रवः स्यात् प्रतिज्ञाने क्लेशे च वचनास्थिते ॥
शात्रवं भावसंहत्योः शत्रूणां शात्रवो द्विषि ॥ ३८ ॥
माधवस्तु वसन्ते स्याद्वैशाखे गरुड़ध्वजे ॥
माधवी मदिरायाञ्च कुट्टन्यामतिमुक्तके ॥ ३९ ॥
मधुनः शर्करायाञ्च गालवो मुनिलोध्रयोः ॥
आर्त्तवन्त्वृतुसम्भूते स्त्रीरजःपुष्पयोरपि ॥ ४० ॥
भार्गवः पर्शुरामे स्याद्गजे शुक्रे सुधन्विनि ॥
भार्गवी हैमवत्याञ्च कमलासितदूर्वयोः ॥ ४१ ॥
आहवः सङ्गरे यागे राघवो रघुवंशजे ॥
महामीनप्रभेदेऽपि जलधे राघवः स्मृतः ॥ ४२ ॥
ताण्ड़वं कथितं नृत्ये तृणभेदेऽपि ताण्ड़वम् ॥
निह्नवं निकृतौ विघादविश्वासापलापयोः ॥ ४३ ॥
सम्भवः कथितो होतावुत्पत्तौ मेलकेऽपि च ॥
आधारानतिरिक्तत्व आधेयस्य च सम्भवः ॥ ४४ ॥
बान्धवो बन्धुसुहृदोः पञ्चत्वं निधने स्मृतम् ॥
पञ्चनामपि भावे च प्रभावः शक्तितेजसोः ॥ ४५ ॥

अभावः स्यादसत्तायामभावो निधनेऽपि च ॥
विभावः स्यात् परिचितौ कामस्योऽद्दीपनेऽपि च ॥ ४६ ॥
निष्पावः सूर्यपवने राजमाषे कडिङ्गरे ॥
पचने शिम्बिकायाश्च निष्पावो निर्विकल्पके ॥ ४७ ॥
सुग्रीवः शोभनग्रीवे सुग्रीवो वानराधिपे ॥
राजीवाख्या मृगे मत्स्ये पद्मे राजोपजीविनि ॥ ४८ ॥
गाण्डीवं गाण्डिवं जिष्णोः कोदण्डे कार्मुकेऽपि च ॥
अक्षीवश्च शिरे विद्यादमत्तेऽक्षीवमन्यवत् ॥ ४९ ॥
पार्थिवो नृपतौ भूमिविकारे पार्थिवोऽन्यवत् ॥
पार्थिवी स्यात् क्षमायाश्च दीदिविर्धिषणान्नयोः ॥ ५० ॥
प्रसेवः कथितो धीरैर्वीणाङ्गस्यूतयोरपि ॥
वडवाऽश्वाकुम्भदास्योः स्त्रीविशेषे द्विजास्त्रियाम् ॥ ५१ ॥
कारवी मधुरादीप्यत्वक्पत्रीकृष्णजीरके ॥
सुषवी कारवेल्ले स्यात् कृष्णजीरकजीरयोः ॥ ५२ ॥

वचतुष्कम् ॥

भवेदभिषवः स्नाने मद्यसन्धानयज्ञयोः ॥
उपप्लवः सैंहिकेये विप्लवोत्पातयोरपि॥ ५३ ॥
परिप्लवश्चश्चले स्यादाकुलेऽपि परिप्लवः ॥
कुशीलवस्तु वाल्मीकौ नटयाचकयोरपि ॥ ५४ ॥
अपह्नवोऽपलापे च स्नेहे चाऽपह्नवो मतः ॥
पराभवस्तिरस्कारे विनाशे च पराभवः ॥ ५५ ॥
भवेत् पारशवः पारस्त्रैणे शूद्रासुते द्विजात् ॥
शस्त्रेऽप्यादीनवो दोषे परिक्लिष्टदुरन्तयोः ॥ ५६ ॥
विदुः शीतशिवं शम्याँ शैलेयशतपुष्पयोः ॥
सैन्धवेऽपि पुटग्रीवो गर्गरीताम्रकुम्भयोः ॥ ५७ ॥

धामार्गवस्त्वपामार्गे देवदाल्यामपि स्मृतः ॥
अनुभावः प्रभावे स्यान्निश्चये भावसूचने ॥ ५८ ॥
बलदेवः स्मृतो वाते कालिन्दीभेदनेऽपि च ॥
बलदेवामपि प्राहुस्त्रायमाणौषधे बुधाः ॥ ५९ ॥
जलविल्वस्तु पञ्चाङ्गे कर्कटे जलचत्वरे ॥
रोहिताश्वो बृहद्भानौ हरिश्चन्द्रे नृपात्मजे ॥ ६० ॥
सहदेवा बलादण्डोत्पलशारिवभेषजे ॥
सहदेवी तु सर्पाक्ष्यां सहदेवश्च पाण्डवे ॥ ६१ ॥
जीवञ्जीवश्चकोरे स्याद् द्रुमपक्षिविशेषयोः ॥

वपञ्चकम् ॥

आशितम्भवमन्नाद्ये तृप्तावाप्याशितम्भवः ॥ ६२ ॥

इति वान्तवर्गः ॥

—:०:—

शैककम् ॥

शं सुखे शर्मणि प्रोक्तं श्रेयसि शश्च शस्त्रके ॥

शद्विकम्

वशमायत्ततायां स्याद्वशमिच्छाप्रभुत्वयोः ॥
वशा वन्ध्यासुतायोषास्त्रीगवीकरिणीषु च ॥ १ ॥
कुशो रामसुते दर्भे योक्त्रे द्वीपे कुशं जले ॥
कुशी फालेऽपि वल्गायां कुशा पापिष्ठमत्तयोः ॥ २ ॥
कुशो वाच्यवदाख्यातः स्पशः प्रणिधियुद्धयोः ॥
शशो गन्धरसे लोध्रे स्यात् पशौ पुरुषान्तरे ॥ ३ ॥
दर्शस्तु सङ्गमे सूर्यचन्द्रयोरवलोकने ॥
पक्षान्ते वैदिकविधौ दर्शश्च समुदाहृतः ॥ ४ ॥
स्पर्शो रुजायां दाने च स्पर्शने स्पर्शकेऽपि च ॥
विट् स्मृतो वैश्यमनुजप्रवेशे तु मनीषिभिः ॥ ५ ॥

पाशः कचान्ते सङ्घार्थः कर्णान्ते शोभनार्थकः ॥
छात्राद्यन्ते च निन्दार्थः पाशः पक्ष्यादिबन्धने ॥ ६ ॥
नाशः पलायने प्रोक्तो निधनानुपलम्भयोः ॥
काशस्तृणे स्यात् क्षवथौ वाराणस्यां तु काश्यपि ॥ ७ ॥
केशो दैत्यान्तरे बाले ह्रीवेरे च प्रचेतसि ॥
कीशो दिगम्बरे प्रोक्तः कीशः शाखामृगेऽपि च ॥ ८ ॥
ईशः प्रभौ शङ्करे स्यादीशा लाङ्गलदण्डके ॥
वेशो वेश्यागृहे प्रोक्तो नेपथ्ये गृहमात्रके ॥ ९ ॥
क्लेशो दुःखेऽपि रागादौ व्यवसायेऽपि च क्वचित् ॥
वंशो वेणौ कुले वर्गे पृष्ठस्यावयवेऽपि च ॥ १० ॥
दंशः स्यात् खण्डने दोषे दंशो मर्मणि कीर्त्तितः ॥
सर्पक्षतेऽपि सन्नाहवनमक्षिकयोरपि ॥ ११ ॥
अंशुर्लेशे रवौ रश्मावाशुर्व्रीहौ च सत्वरे ॥
पांशुर्धूलिषु शस्यार्थचिरसाश्रितगोमये ॥ १२ ॥
दृग्दर्शने लोचने च दृग्बुद्धौ वीक्षकेऽपि च ॥
दशा वर्त्तावस्थायां वस्त्रांशे स्युर्दशा अपि ॥ १३ ॥
निशा दारुहरिद्रायां स्यात् त्रियामाहरिद्रयोः ॥
आशा तृष्णादिशोः प्रोक्ता राशिर्मेषादिपुञ्जयोः ॥ १४ ॥
पेशी पललपिण्ड्यां स्यान्मांस्यां खड्गपिधानके ॥
अण्डभेदेऽपि पेशी स्यात् सुपक्ककणिकेऽपि च ॥ १५ ॥

शत्रिकम् ॥

कापिशः सिह्लके श्यावे माधव्यां कपिशी मता ॥
कुलिशो मत्स्यचण्डे स्याद्दम्भोलौ कुलिशं स्मृतम् ॥ १६ ॥
विवशः स्यादवश्यात्मा क्लिष्टदुष्टधियोरपि ॥
निस्त्रिंशो निर्दयेखड्गे सदृशन्तूचिते समे ॥ १७ ॥

बालिशः शावके मूर्खे लोमशो लोमसंयुते ॥
मेण्डके चाथ कासीसशृगालीजटिलासु च ॥ १८ ॥
लोमशा शूकशिम्ब्याञ्च मर्कटीकाकजङ्घयोः ॥
महामेदातिबलयोः शाकिनीभिदि चेष्यते ॥ १९ ॥
विकाशो विजने व्यक्तौ सकाशः सदृशेऽन्तिके ॥
प्रकाशोऽतिप्रसिद्धे स्यात् प्रहासातपयोः स्फुटे ॥ २० ॥
नीकाशो निश्चये तुल्ये हताशो निर्दये खले ॥
कीनाशः कर्कशे क्षुद्रे कृतान्तपशुघातिनोः ॥ २१ ॥
सुखाशो राजतिनिशे शोभनाऽऽशप्रचेतसोः ॥
पिङ्गाशो मत्स्यभेदे स्यात्तथा पल्लीपतावपि ॥ २२ ॥
पिङ्गाशी नीलिकायाञ्च पिङ्गाशं जात्यकाञ्चने ॥
पलाशः किंशुके शठ्यां हरिते राक्षसेऽपि च ॥ २३ ॥
पत्रे पलाशं संवेशः शयने चासनेऽपि च ॥
निवेशः शिबिरोद्वाहविन्यासेषु प्रकीर्त्तितः ॥ २४ ॥
निर्वेशो मूर्च्छने भोगे निर्वेशो वेतनेऽपि च ॥
प्रदेशो देशमात्रे स्यात्तर्ज्जन्यङ्गुष्ठसम्मिते ॥ २५ ॥
भित्तावपि प्रदेशः स्यात् सदेशोऽभ्यर्णदेशयोः ॥
निदेशः शासनोपान्तभाषणेऽपि प्रयुज्यते ॥ २६ ॥
आदर्शो दर्पणे टीकाप्रतिपुस्तकयोरपि ॥
कर्कशः परुषे क्रूरे कृपणे निर्दये दृढे ॥ २७ ॥
इक्षौ [illegible] काशमर्दकम्पिल्लयोरपि ॥
गिरीशो वाक्पतौ रुद्रे गिरीशोऽद्रिपतावपि ॥ २८ ॥
उड्डीशो ग्रन्थभेदे स्यादुड्डीश[illegible] ॥
तुङ्गीशः शङ्करे चन्द्रे पक्षीशस्तार्क्ष्यकृष्णयोः ॥ २९ ॥
उपांशुर्जपभेदे स्यादुपांशु विजनेऽव्ययम् ॥

दुःस्पर्शाख्या खरस्पर्शे कण्टकार्याञ्च वासके ॥ ३० ॥
विपाशाख्या सरिद्भेदपाशवर्ज्जितयोर्मता ॥
विकेशी पट्टवर्त्तौ स्याद्विकेशी निष्कचास्त्रियाम् ॥
भूकेशी बल्वजेषु स्याद् भूकेशः शैवले वटे ॥ ३१ ॥

शचतुष्कम् ॥

अपदेशः स्मृतो लक्ष्ये निमित्तव्याजयोरपि ॥
जीवितेशो यमे कान्ते जीवातौ जीविताधिपे ॥ ३२ ॥
आश्रयाशो हुतवहे भवेदाश्रयनाशके ॥
नागपाशः स्मृतः स्त्रीणां करणे वरुणायुधे ॥ ३३ ॥
पुरोडाशो हविर्भेदे चमस्यां पिष्टकस्य च ॥
रसे सोमलतायाश्च हुतशेषेऽपि कीर्त्तितः ॥ ३४ ॥
परिवेशः परिवृत्तौ भानोः सविधमण्डले ॥
प्रतिष्कशः सहाये स्याद्वार्त्ताहरपुरोगयोः ॥ ३५ ॥
उपस्पर्शः स्पर्शमात्रे स्नानाचमनयोरपि ॥
भूमिस्पृग्वैश्यनरयोः पूरदक् स्यात् खले शनौ ॥ ३६ ॥
अपभ्रंशोऽपशब्दे स्याद्भाषाभेदावपातयोः ॥
उपदंशोऽवदंशे स्यान्मेण्ढ्रे रोगेऽपि वर्त्तते ॥ ३७ ॥
खण्डपर्शुः पर्शुरामे शङ्करे चूर्णलेपिनि ॥
खण्डामलकभैषज्ये सिंहिकातनयेऽपि च ॥ ३८ ॥
पादपाशी खण्डकायां शृङ्खलाकटकेऽपि च ॥
स्मृता पञ्चदशी पौर्णमास्यमावास्ययोरपि ॥ ३९ ॥

शपञ्चकम् ॥

धूर्जटौ खण्डपरशुर्जामदग्न्ये विधुन्तुदे ॥
खण्डामलकभैषज्ये चूडालेऽपि स्मृतो बुधैः ॥ ४० ॥

इति शान्तवर्गः ॥

वृषः स्याद्वासके धर्मे सौरभेये च शुक्रले ॥
पुंराशिभेदयोः शृङ्ग्यां मूषिकश्रेष्ठयोरपि ॥ १ ॥
कपिकच्छ्वां वृषा प्रोक्ता व्रतिनामासने वृषी ॥
विषन्तु गरले तोयेऽतिविषायां विषा भवेत् ॥ २ ॥
तुषो धान्यत्वचि ख्यातो विभीतकतरावपि ॥
निषश्च स्पर्शने व्याजे तर्षो लिप्सापिपासयोः ॥ ३ ॥
वर्षं संवत्सरे वृष्टौ जम्बूद्वीपे घने विदुः ॥
प्रावृट्काले तु वर्षाः स्युः कर्षः कर्षणमानयोः ॥ ४ ॥
माषो व्रीह्यन्तरे मूर्खे मानत्वग्दोषभेदयोः ॥
मेषो राशिविशेषे स्यादुरणे भेषजान्तरे ॥ ५ ॥
शेषः संकर्षणेऽनन्त उपयुक्ततरे वधे ॥
प्रसादान्निजनिर्माल्यदाने शेषेऽपि कीर्त्तिता ॥ ६ ॥
शोषस्तु शोषणे राजयक्ष्मण्यपि निगद्यते ॥
दोषः स्याद् दूषणे पापे दोषा रात्रौ भुजेऽपि च ॥ ७ ॥
कोषस्तु कुड्मले पात्रे दिव्ये खड्गपिधानके ॥
जातिकोषेऽर्थसङ्घाते पेश्यां शब्दादिसङ्ग्रहे ॥ ८ ॥
घोषस्तु घोषके ध्वाने गोपालाभीरपल्लिषु ॥
घोषा तु शतपुष्पायां घोषः कांस्येऽम्बुदध्वनौ ॥ ९ ॥
प्रैषः स्यात् प्रेषणे क्लेशे मर्दनोन्मानयोरपि ॥
पौषो मासविशेषे स्यात् पौषन्तु महयुद्धयोः ॥ १० ॥
त्विट् कान्तौ व्यवसाये च जिगीषायां रुचौ गिरि ॥
विट् व्यापने च विष्ठायां शुषिः शोषे विलेऽपि ॥ ११ ॥
ऋषिर्वेदे वशिष्ठादौ दीधितावपि पठ्यते ॥
उषा वाणसुतारात्र्योरुषः कामिनि गुग्गुलौ ॥ १२ ॥
झषा नागबलायां स्याद्वैसारिणि झषो मतः ॥

कर्षूः करीषदहने कुल्यायामपि चेष्यते ॥ १३ ॥

षत्रिकम् ॥

निकषः शाणफलके निकषा यातुमातरि ॥
नहुषो राज्ञि भुजगे कलुषश्चाविलैनसोः ॥ १४ ॥
किल्विषे वृजिने रोगेऽप्यपराधेऽपि किल्विषम् ॥
निमेषनिमिषौ कालप्रभेदेऽक्षिनिमीलने ॥ १५ ॥
परुषं कर्बुरे रूक्षे स्यान्निष्ठुरवचस्यपि ॥
पुरुषः पूरुषे साङ्ख्यज्ञे च पुन्नागपादपे ॥ १६ ॥
पौरुषं पुरुषस्योक्तं भावे कर्मणि तेजसि ॥
ऊर्ध्वविस्तृतदोःपाणिनृमानेऽपि च पौरुषः ॥ १७ ॥
कल्माषो राक्षसे कृष्णे कल्माषं कृष्णपाण्डुरे ॥
कुल्माषो यावके प्रोक्तः कुल्माषं काञ्जिकेऽपि च ॥ १८ ॥
उष्णीषन्तु शिरोवेष्टे किरीटे लक्षणान्तरे ॥
तरीषः शोभनाकारे भेलेऽब्धिव्यवसाययोः ॥ १९ ॥
रोहिषं कत्तृणे ज्ञेयं रोहिषो हरिणान्तरे ॥
विश्लेषः स्याद्विघटने विश्लेषो विधुरेऽपि च ॥ २० ॥
प्रदोषः कालभेदे स्यात् प्रदोषो दोष इष्यते ॥
अभीषुः प्रग्रहे रश्मौ प्रत्यूषोऽहर्मुखे वसौ ॥ २१ ॥
गण्डूषो मुखपूर्त्तौ स्यात् करिहस्ताङ्गुलावपि ॥
प्रसृतोन्मिते शैलूषः कथितो नटबिल्वयोः ॥ २२ ॥
मारिषः शाकभेदे स्यान्मारिषा दक्षमातरि ॥
नाट्योक्त्यां मारिषश्चार्ये तारीषः कनकेऽम्बुधौ ॥ २३ ॥
आमिषं पलले लोभे सम्भोगोत्कोचयोरपि ॥
आमिषं सुन्दराकाररूपादिविषयेऽपि च ॥ २४ ॥
आकर्षः शारिफलके पाशके द्यूत इन्द्रिये ॥

आकर्षणेऽपि चाऽकर्षः कोदण्डाभ्यासवस्तुनि ॥ २५ ॥
संहर्षमाहुः स्पर्द्धायां प्रमोदेऽपि प्रभञ्जने ॥
शुश्रूषा श्रोतुमिच्छायां परिचर्याकथानयोः ॥ २६ ॥
जेगीषा जेतुमिच्छायां व्यवसायप्रकर्षयोः ॥
महिषी नृपपत्न्याञ्च सैरिभ्यामोषधीभिदि ॥ २७ ॥

षचतुष्कम् ॥

अनिमिषः सुरे मत्स्येऽप्यनुकर्षोऽनुकर्षणे ॥
अनुकर्षो रथस्याऽधःस्थिते दारुणि चेष्यते ॥ २८ ॥
अनुतर्षः सुरापानपात्रे तृष्णाभिलाषयोः ॥
वातरूषस्तु वातूलोत्कोचयोः शक्रकार्म्मुके ॥ २९ ॥
अम्बरीषं रणे भ्राष्ट्रेऽप्यम्बरीषो नृपान्तरे ॥
मार्त्तण्डे खण्डपरशावाम्रातककिशोरयोः ॥ ३० ॥
परिघोषो निनादे स्यादवाच्ये जलदध्वनौ ॥
नन्दिघोषोऽर्ज्जुनरथे घोषे वन्दिजनस्य च ॥ ३१ ॥
महाघोषो मतङ्गे च महाघोषोऽतिघोषणे ॥
स्मृता कर्कटशृङ्ग्याश्च महाघोषा मनीषिभिः ॥ ३२ ॥
किम्पुरुषः किन्नरे स्याल्लोकभेदेऽप्यलम्बुषः ॥
छर्दनेऽलम्बुषा प्रोक्ता मुण्डीरीस्वर्ग वेश्ययोः ॥ ३३ ॥
पलङ्कषा गोक्षुरकरास्नागुग्गुलुकिंशुके ॥
मुण्डीरीलाक्षयोश्चाऽपि राक्षसेऽपि पलङ्कषः ॥ ३४ ॥

इति षान्तवर्गः ॥

—:०:—

सद्विकम् ॥

रसो गन्धरसे स्वादे चित्तादौ विषरागयोः ॥
शृङ्गारादौ द्रवे वीर्ये देहधातौ च पारदे ॥ १ ॥

रसा तु सल्लकीपावाजिह्वाधरणिकङ्गुषु ॥
भासो भासि समाख्यातो घोष्टकुक्कुटगृध्रयोः ॥ २ ॥
दासः शूद्रे दानपात्रे भृत्यधीवरयोरपि ॥
दासी चेट्याश्च झिण्ट्याश्च रासः कोलाहले ध्वनौ ॥ ३ ॥
भाषाशृङ्खलके रासः क्रीडायामपि गोदुहाम् ॥
वासः सुवर्णचेले स्यात् प्रभेदे किष्कुपर्वणः ॥ ४ ॥
भाः प्रभावे मयूखे च माः स्मृतश्चन्द्रमासयोः ॥
अदः परस्मिन्नत्राऽपि गोसो गन्धरसोषयोः ॥ ५ ॥
वत्सस्तर्णकपुत्रादिवर्षे वत्सन्तु वक्षसि ॥
बुत्सः स्तम्बे हारभेदे स्तबके ग्रन्थिपर्णके ॥ ६ ॥
वासो गेहेऽप्यवस्थाने वासा स्यादटरूषके ॥
व्यासो मुनौ स्याद्विस्तारे त्रासो भीमणिदोषयोः ॥ ७ ॥
हंसो विहङ्गभेदे स्यादर्के विष्णौ हयान्तरे ॥
योगिमन्त्रादिभेदेषु परमात्मनि मत्सरे ॥ ८ ॥
निर्लोभनृपतौ हंसः शारीरमरुदन्तरे ॥
अंसः स्कन्धे विभागे च कंसो दैत्यान्तरे स्मृतः ॥
कांस्ये च कांस्यपात्रे च मानभेदेऽपि कीर्त्तितः ॥
मांसः स्यादामिषे मांसी कक्कोलीजटयोरपि ॥ ९ ॥

वसुर्मयूखाग्निजनाधिपेषु
योक्त्रे वके स्माद्वसुहट्टके च ॥
वृद्ध्यौषधश्यामधनेषु रत्ने
वसु स्मृतं स्यान्मधुरेऽन्यवच्च ॥ १० ॥

नासा तु नासिकायां स्यान्नासा द्वारोर्ध्वदारुणि ॥
मृत्सा तु कथिता वासिश्रेष्ठमृत्तिकयोर्बुधैः ॥ ११ ।
हिंसा चौर्यादिवधयोः शंसा वचनवाञ्छयोः ॥

मिसिस्तु मधुरामांस्योर्गजपुष्पाजमोदयोः ॥ १२ ॥
काम्बूर्विकलवाचि स्यात् लाम्बूः शस्त्रायुधेऽपि च ॥
प्रसूरश्वाजनन्योश्च कन्दलीवीरुधोरपि ॥ १३ ॥

सत्रिकम् ॥

अलसः पादरोगे स्यात् क्रियामन्दे द्रुमान्तरे ॥
अलसा हंसपद्याञ्च रभसो वेगहर्षयोः ॥ १४ ॥
पनसः कण्टकिफले कण्टके कपिरुग्भिदोः ॥
सुरसः स्यात् सुमधुरे पर्णासे सुरसाऽपि च ॥ १५ ॥
सारसः पक्षिभेदे स्यात् सारसं सरसीरुहे ॥
श्रीवासो यक्षधूपे स्यात् पङ्कजे पीतवाससि ॥ १६ ॥
साहसन्तु बलात्कारकृतकार्ये दमेऽपि च ॥
वाहसो जलनिर्यासेऽजगरे सुनिषण्णके ॥ १७ ॥
लालसो लालसाऽपि स्याद्याच्ञातृष्णातिरेकयोः ॥
औत्सुक्ये च समासस्तु संक्षेपे च समर्थने ॥ १८ ॥
कीकसः कृमिजातौ स्यादस्थ्नि कीकसमिष्यते ॥
पायसं परमान्ने स्याच्छ्रीवासेऽपि च पायसः ॥ १९ ॥
वायसो नाडिजङ्घे स्याच्छ्रीवासे चागुरुद्रुमे ॥
काकोदुम्बरिकायाञ्च काकमाच्याञ्च वायसी ॥ २० ॥
मानसं सरसि स्वान्तेऽप्याश्वासो निर्वृतौ मतः ॥
आख्यायिकापरिच्छेदेऽप्यभ्यासो व्यसनेऽन्तिके ॥ २१ ॥
उच्छ्वासः प्राणनाश्वासगद्यबन्धगुणान्तरे ॥
इष्वासो धन्विधनुषोर्विलासो गललीलयोः ॥ २२ ॥
वीतसो बन्धनोपाये मृगाणां पक्षिणामपि ॥
तेषामपि च विश्वासहेतोः प्रावरणे स्मृतम् ॥ २३ ॥
उत्तंसः कर्णपूरे स्याच्छेकरे च वतंसवत् ॥

बीभत्सो विकृते क्रूरेऽप्यर्जुने च घृणात्मान ॥ २४ ॥
विद्वानात्मविदि प्राज्ञे पण्डिते चाभिधेयवत् ॥
भूयान् बहुतरार्थे स्यात् पुनरर्थे त्वदोऽव्ययम् ॥ २५ ॥
ज्यायान् वृद्धे च शस्ते च हविर्होतव्यसर्पिषोः ॥
रेपाः स्यादधमे क्रूरे कृपणेऽपि च कथ्यते ॥ २६ ॥
वेधा विधौ बुधे विष्णावागः पापापराधयोः ॥
वर्चो दीप्तौ पुरीषे च वर्चो रूपेऽपि च क्वचित् ॥ २७ ॥
छन्दः पद्ये च वेदे च स्वैराचाराभिलाषयोः ॥
एनोऽपराधे कलुषे मनश्चित्तमनीषयोः ॥ २८ ॥
रोदश्च रोदसी चाऽपि दिवि भूमौ पृथक् पृथक् ॥
सह प्रयोगेऽप्यनयो रोदः स्यादपि रोदसी ॥ २९ ॥
ओजस्तेजसि धातूनामवस्तम्भप्रकाशयोः ॥
भुजो बले च दीप्तौ च तेजो धाम्नि पराक्रमे ॥ ३० ॥
प्रभावरेतसोश्चाथ रजः स्यादार्त्तवे गुणे ॥
रजःपरागे रेणौ तु रजवत् परिकीर्त्तितम् ॥ ३१ ॥
वपुर्भव्याकृतौ देहे पयः स्यात् क्षीरनीरयोः ॥
वयः पक्षिणि बाल्यादौ वयो यौवनमात्रके ॥ ३२ ॥
श्रेयस्तु मङ्गले धर्मे श्रेयान् शस्ते तु वाच्यवत् ॥
श्रेयसी करिपिप्पल्यामभयारास्नयोरपि ॥ ३३ ॥
स्रोतोऽम्बुवेगेन्द्रिययोरोकः सद्मनि चाश्रये ॥
शिरः प्रधाने सेनाग्रभागमस्तकयोरपि ॥ ३४ ॥
तपश्चान्द्रायणादौ स्याद्धर्मे लोकान्तरेऽपि च ॥
तपा माघे च शिशिरे सरस्तोयतडागयोः ॥ ३५ ॥
उषः प्रभाते सन्ध्यायामुरः श्रेष्ठे च वक्षसि ॥
तमोऽन्धकारे स्वर्भानौ तमःशोके गुणान्तरे ॥ ३६ ॥

नभो व्योम्नि नभा मेघे श्रावणे च पतद्ग्रहे ॥
घ्राणे मृणालसूत्रे च वर्षासु च नभाः स्मृतः ॥ ३७ ॥
तरो बले च वेगे च रेतः शुक्रे च पारदे ॥
अर्चिर्मयूखशिखयोर्बर्हिः कुशहुताशयोः ॥ ३८ ॥

सहो बले ज्योतिषि मार्गशीर्ष-
हेमन्तयोश्चाऽपि सहः प्रदिष्टः ॥
रहोऽपि गुह्ये सुरते च तत्त्वे
महो भवेदुत्सवतेजसोश्च ॥ ३९ ॥
ज्योतिः प्रकाशे दृशि तारकासु
ज्योतिर्दिनेशानलयोरपि स्यात् ॥
धनुः प्रियालद्रुमराशिभेदयोः
शरासने चापि धनुर्धनुर्धरे ॥ ४० ॥

आशीरुक्ता हिताशंसापवनाशनदंष्ट्रयोः ॥
राक्षसीति च दंष्ट्रायां राक्षसी रक्षसः स्त्रियाम् ॥ ४१ ॥
तामसीति च दुर्गायां तामसो भुजगे खले ॥
पुक्कसी कालिकानील्योः पुक्कसः श्वपचेऽधमे ॥ ४२ ॥

सचतुष्कम् ॥

भवेद्घनरसः सान्द्रनिर्यासमोरटाप्सु च ॥
कर्पूरे पीलुपर्ण्यां च सस्ये सिद्धरसेऽपि च ॥ ४३ ॥
सर्वरसः स्मृतो वाद्यभाण्डभेदे च धूनके ॥
स्मृतं तामरसं पद्मे ताम्रकाञ्चनयोरपि ॥ ४४ ॥
सिद्धरसो रसे व्याधिप्रभृतीषु च दृश्यते ॥
महारसः स्यात् खर्जूरे कोशकारकसेरुणोः ॥ ४५ ॥
रासेरसस्तु रासे स्याद्रसासिद्धिबलावपि ॥

षष्ठीजागरिके गोष्ठ्यां शृङ्गारपरिहासयोः ॥ ४६ ॥
श्वःश्रेयसञ्च भद्रे स्यात् परानन्दे च शर्मणि ॥
निःश्रेयसञ्च कल्याणे चन्द्रचूडापवर्गयोः ॥ ४७ ॥
कुम्भीनसो विषज्वालाकुलदृष्टिभुजङ्गमे ॥
कुम्भीनसी जनन्याञ्च लवणाख्यस्य रक्षसः ॥ ४८ ॥
मलीमसन्तु मलिने पुष्पकासीसलोहयोः ॥
पौर्णमासपौर्णमास्यौ यज्ञपूर्णिमयोः क्रमात् ॥ ४९ ॥
अधिवासो निवासे च संस्कारे धूपकादिभिः ॥
चन्द्रहासो दशग्रीवकरवालेऽसिमात्रके ॥ ५० ॥
विश्वावसुः स्याद्गन्धर्वभेदे विश्वावसुर्निशि ॥
विभावसुर्दिनमणौ हारभेदे च पावके ॥ ५१ ॥
पुनर्वसुर्भवेदृक्षे कात्यायनमुनावपि ॥
राजहंसो नृपश्रेष्ठे कादम्बकलहंसयोः ॥ ५२ ॥
कलहंसस्तु कादम्बे राजहंसे नृपोत्तमे ॥
अवध्वंसः परित्यागे निन्दनेऽप्यवचूर्णने ॥ ५३ ॥
स्मृता मधुरसा द्राक्षा मूर्विका दुग्धिकासु च ॥
नीलङ्गसाऽप्सरोभेदे सरिद्भेदेऽपि विद्युति ॥ ५४ ॥
सुमेधास्तु सुबुद्धौ स्याज्ज्योतिष्मत्यामपीष्यते ॥
सुमनाः पुष्पमालत्योस्त्रिदशे कोविदेऽपि च ॥ ५५ ॥
प्रचेतास्तु मुनौ हृष्टे स्यात् प्रतीचीपतावपि ॥
विहायास्तु शकुन्ते स्याद्विहायः सुरवर्त्मनि ॥ ५६ ॥
त्रिस्रोता जह्नुकन्यायां त्रिस्रोताः सरिदन्तरे ॥
अगौकाश्च नगौकाश्च शरभे सिंहपक्षिणोः ॥ ५७ ॥
उदर्चिरुत्प्रभे वह्नौ दिवौकाश्चातके सुरे ॥
दीर्घायुः शाल्मलौ काके मार्कण्डेयेऽतिजीविनि ॥ ५४ ॥

सप्तार्चिः पावके प्रोक्तः सप्तार्चिः क्रूरलोचने ॥
कनीयाननुजेऽत्यल्पे कनीयानतियूनि च ॥ ५९ ॥
वरीयानतियूनि स्याद्वरिष्ठे श्रेष्ठयोगयोः ॥
साधीयानतिबाढे स्यादतिसाधौ च वाच्यवत् ॥ ६० ॥

सपञ्चकम् ॥

स्यान्नभश्चमसश्चन्द्रे चित्रापूपेन्द्रजालयोः ॥
हिङ्गुनिर्यास इत्येष निम्बे हिङ्गुरसेऽपि च ॥ ६१ ॥
दिव्यचक्षुः सुगन्धस्य भेदेऽन्धे च सुलोचने ॥

सषट्कम् ॥

हिरण्यरेतसम्प्राहुर्दिवाकरहविर्भुजोः ॥ ६२ ॥

इति सान्तवर्गः ॥

—:०:—

हद्विकम् ॥

सहो बले सहा मुद्गपर्ण्याश्च नखभेषजे ॥
सहा देवीकुमार्योश्च सहः कान्ते सहा भुवि ॥ १ ॥
ग्रहोऽनुग्रहनिर्बन्धग्रहणेषु रणोद्यमे ॥
सूर्यादौ पूतनादौ च सैंहिकेयोपरागयोः ॥ २ ।
वहः स्याद्वृषभस्कन्धदेशे गन्धवहेऽपि च ॥
बर्हं दले केकिपिच्छे गृहाः पत्न्यां गृहे स्मृताः ॥ ३ ॥
ग्राहो ग्रहेऽवहारे च नाहो बन्धनकूटयोः ॥
स्नेहस्तैलप्रदेकरसद्रव्ये स्यात् सौहृदेऽपि च ॥ ४ ॥
प्रोहो निपुणतर्के स्यात् प्रोहो हस्त्यङ्घ्रिपर्वणोः ॥
मोहमिच्छन्ति मूर्च्छायामविद्यायाश्च सूरयः ॥ ५ ॥

लोहस्तु शस्त्रके लोहं जोङ्गके सर्वतैजसे ॥
व्यूहः स्याद् बलविन्यासे निर्माणे वृन्दतर्कयोः ॥ ६ ॥
सिंहः कण्ठीरवे राशौ सत्तमे चोत्तरस्थितः ॥
सिंही क्षुद्रा बृहत्योः स्याद्वासके राहुमातरि ॥ ७ ॥
बहुः स्याद्विपुले त्र्यादि सङ्ख्यासु त्वभिधेयवत् ॥
अहिर्वृत्रासुरे सर्पेऽपीहा तूद्यमवाञ्छयोः ॥ ८ ॥
गुहा तु गह्वरे सिंहपुच्छ्यां स्कन्दे गुहो मतः ॥
वाहो भुजायां वाहस्तु मानभेदे वृषे हये ॥ ९ ॥
मही भूमौ मही नद्यां मह उत्सवतेजसोः ॥
कुहूः स्यात् कोकिलारावनष्टेन्दुकरदर्शयोः ॥ १० ॥

हत्रिकम् ॥

पटहस्तु समारम्भ आनकं पटहं मतम् ॥
कलहः खड्गकोशे स्याद्भण्डने युद्धराढयोः ॥ ११ ॥
प्रग्राहस्तु तुलासूत्रे बन्द्यां नियमने भुजे ॥
हयादिरश्मौ रश्मौ च सुवर्णहालिपादपे ॥ १२ ॥
निग्रहो भर्त्सने प्रोक्तो मर्यादायाञ्च बन्धके ॥
विग्रहः समरे काये विस्तारप्रविभागयोः ॥ १३ ॥
सङ्ग्राहो बृहदुत्तुङ्गे मुष्टिसंक्षेपयोरपि ॥
आग्रहोऽनुग्रहाशक्त्योराक्रमे ग्रहणेऽपि च ॥ १४ ॥
नवाहः स्यान्नवदिने नवाहः प्रतिपत्तिथौ ॥
प्रवाहो व्यवहारे स्यादपि स्रोतसि वारिणः ॥ १५ ॥
कटाहो घृततैलादिपाकपात्रे च खर्परे ॥
कटाहः कूर्मपृष्ठे च स्तूपे च महिषीशिशौ ॥ १६ ॥
उत्साहस्तूद्यमे सूत्रेऽप्यारोहे दैर्घ्यमानयोः ॥

आरोहणे नितम्बे च समुच्छ्रयनिषादिनोः ॥ १७ ॥
निर्यूहः शेखरे द्वारे निर्यासे नागदन्तके ॥
विदेहो देहशून्ये स्याद्विदेहो मिथिले स्मृतः ॥ १८ ॥
निरूहो वस्तिभेदे स्यात् तर्कनिश्चितयोरपि ॥
दात्यूहः कालकण्ठे स्याद्दात्यूहश्चातकेऽपि च ॥ १९ ॥
अत्यूहा नीलिकायां स्यादत्यूहश्चित्रमेखले ॥
स्रुवहा सल्लकीगोधापदीशेफालिकासु च ॥ २० ॥
एलापर्ण्यांश्च सुवहा वल्लकीरास्नयोरपि ॥
सम्यग्वाहे तु सुवहो वाच्यवत् समुदाहृतः ॥ २१ ॥
वैदेही रोचनासीतावणिक्स्त्रीपिप्पलीष्वपि ॥
वाराही मातृभेदे स्याद् वृष्टिनामौषधेऽपि च ॥ २२ ॥

हचतुष्कम् ॥

अवग्रहा इति ख्यातो वृष्टिरोधे गजालिके ॥
स्वतन्त्रतानिषेधेऽपि प्रतिबन्धेऽप्यवग्रहः ॥ २३ ॥
प्रतिग्रहः स्वीकरणे सैन्यपृष्ठे पतद्ग्रहे ॥
द्विजेभ्यो विधिवद्देये तद्ग्रहे च ग्रहान्तरे ॥ २४ ॥
परिग्रहः परिजने पत्न्यां स्वीकारमूलयोः ॥
शापेऽप्युपग्रहो वन्द्यामुपयोगेऽनुकूलने ॥ २५ ॥
अभिग्रहोऽभियोगेऽभिग्रहणे गौरवेऽपि च ॥
परिवर्हन्तु राजार्हवस्तुन्यऽपि परिच्छदे ॥ २६ ॥
पितामहो विरिञ्चौ स्यात्तातस्य जनकेऽपि च ॥
तमोऽपहः सहस्रांशुमृगाङ्कजिनवह्निषु ॥ २७ ॥
उपनाहो व्रणालेपपिण्डे वीणानिबन्धने ॥
परीवाहो जलोच्छ्वासे महीभृद्भोग्यवस्तुनि ॥ २८ ॥

तनूरुहं गरुल्लोम्नोर्वरारोहाकटावपि ॥
वरारोहस्तु कथितो हस्त्यारोहावरोहयोः ॥ २९ ॥
अवरोहोऽवतरणे तरोरङ्गे लतोद्गमे ॥
अश्वारोहाऽश्वगन्धायामश्वारोहोऽश्ववारके ॥ ३० ॥
महासहा माषपर्ण्यामम्लानकुसुमेऽपि च ॥
गन्धवहा तु नासायां वायौ गन्धवहो मतः ॥ ३१ ॥
भवेदेकसहाभिख्या सूते दण्डोत्पलौषधौ ॥

हपञ्चकम् ॥

प्रपितामह इत्येष विधौ पितृपितामहे ॥ ३२ ॥

इति हान्तवर्गः ॥

—:o:—

षान्ताः स्युर्यद्यपि क्षान्ता वर्णानामनुरोधतः ॥
पृथक्क्रमेण कथ्यन्ते तथाऽप्येते समन्वयात् ॥ १ ॥

क्षद्विकम् ॥

अक्षः कर्षे तुषे चक्रे शकटे व्यवहारयोः ॥
आत्मज्ञे पाशके चाक्षं तुत्थसौवर्चलेन्द्रिये ॥ २ ॥
ऋक्षोऽद्रिभेदे भल्लूके शोणके कृतवेधने ॥
ऋक्षमुक्तश्च नक्षत्रे यक्षः श्रीदे च गुह्यके ॥ ३ ॥
दक्षः पटौ हरवृषे ताम्रचूडे प्रजापतौ ॥
मुनिभेदे द्रुमे वह्नौ दक्षो दक्षा भुवि स्मृता ॥ ४ ॥
पक्षो मासार्द्धके पार्श्वे ग्रहे साध्यविरोधयोः ॥
पक्षश्च परतो वृन्दे बले सखिसहाययोः ॥ ५ ॥
पतत्रे चुल्लिरन्ध्रे च देहाङ्गे राजकुञ्जके ॥
लक्षं शरव्ये सङ्ख्यायां लक्षं छद्मनि कथ्यते ॥ ६ ॥

प्लक्षो द्वीपविशेषे स्यात् पर्कटीगर्दभाण्डयोः ॥
पिप्पले द्वारपार्श्वे च गृहस्य परिकीर्त्तितः ॥ ७ ॥
न्यक्षः परशुरामे स्यान्न्यक्षः कात्स्न्यें निकृष्टयोः ॥
चोक्षो गीते शुचौ दक्षे तथा तीक्ष्णमनोज्ञयोः ॥ ८ ॥
ध्वाङ्क्षस्तु काकबकयोस्तर्कुके भिक्षुके गृहे ॥
ध्वाङ्क्षी कक्कोलिकायां स्यात् कक्षो दोर्मूलकच्छयोः ॥ ९ ॥
सैरिभे च वृषे कक्षः शुष्ककाननवीरुधोः ॥
कक्षा प्रा[illegible]श्चीप्रकोष्ठगजरज्जु[illegible] ॥ १० ॥
सार्द्धे पदे परीधानपश्चादञ्चलपल्लवे ॥
रथभागेऽपि कक्षा स्याद्दीक्षा विस्मयदृश्ययोः ॥ ११ ॥
मोक्षो मुष्ककवृक्षे स्यादपवर्गे च मोचने ॥
रूक्षः पादपजातौ स्याद् रूक्षोऽप्रेमण्यचिक्कणे ॥ १२ ॥
भिक्षा भृतौ च याच्ञायां सेवाभिक्षितवस्तुनोः ॥
प्रेक्षाऽनुत्प्रेक्षणे बुद्धौ रक्षा रक्षणरक्षयोः ॥ १३ ॥

क्षत्रिकम्

अध्यक्षोऽधिकृते प्रोक्तः प्रत्यक्षेऽध्यक्षमिष्यते ॥
गोरक्षो नागरङ्गे स्याद् गवाश्व परिरक्षके ॥ १४ ॥
आरक्षो रक्षणीये स्याच्छीर्षमर्माणि दन्तिनाः ॥
रक्ताक्षः कासरे क्रूरे पारावतचकोरयोः ॥ १५ ॥
समीक्षा ग्रन्थभेदे स्यात् तत्त्वबुद्धौ निभालने ॥
उत्प्रेक्षाऽनवधाने स्यात् काव्यालङ्करणेऽपि च ॥ १६ ॥
मृगाक्षी चेन्द्रवारुण्यां मृगनेत्रात्रियामयोः ॥
गवाक्षी शक्रवारुण्यां गवाक्षो जालके कपौ ॥ १७ ॥

क्षचतुष्कम् ॥

वीरवृक्षस्तु भल्लातककुभद्रुमयोर्मतः ॥

राजवृक्षः प्रियाले स्यात् सुवर्णालुतरावपि ॥ १८ ॥
देववृक्षः सप्तपर्णे मन्दरादिषु गुग्गुलौ ॥
भूतवृक्षस्तु शाकोटे तथा श्योनाकपादपे ॥ १९ ॥
विशालाक्षो हरे तार्क्ष्ये विशालाक्षी वरस्त्रियाम् ॥
सकटाक्षो धवद्रौ स्यात् कटाक्षसहितेऽपि च ॥ २० ॥

इति क्षान्तवर्गः ॥

इति श्रीसकलवैद्यराजचक्रमुक्ताशेखरस्य
गद्यपद्यविद्यानिधेः श्रीमहेश्वरस्य कृतौ
विश्वप्रकाशे अनेकार्थशब्द-
परिच्छेदः प्रथमः ॥

द्वितीयः परिच्छेदः ॥ २ ॥

अव्यानि ॥

अथाव्ययानि वक्ष्यन्ते व्यक्तं पूर्वाक्षरक्रमात् ॥
अकारादिकमप्यास्ति नाधिकं पूर्वतोऽपि च ॥ १ ॥

अ ॥

अ स्यादभावे स्वल्पार्थे विष्णावीशे त्वनव्ययम् ॥

आङ् ॥

आङ् सीमायां परिव्याप्तौ क्रियायोगेषदर्थयोः ॥ २ ॥

आ ॥

आ प्रगृह्यः स्मृतौ वाक्ये आः स्यात् सन्तापकोपयोः ॥

इ ॥

इ खेदे च रुषोक्तौ च कामदेवे त्वनव्ययम् ॥ ३ ॥

ई ॥

ई दुःखभावने कोपे लक्ष्म्यामीः स्यादनव्ययम् ॥

उ ॥

उ सम्बुद्धौ रुषोक्तौ च शम्भुवाची त्वनव्ययम् ॥ ४ ॥

ऊ ॥

ऊ वाक्यारम्भेऽनुकम्पारक्षाहूतिष्वनव्ययम् ॥

ऋ

ऋ वाक्ये चाऽपि कुत्सायां देवाम्बायान्त्वनव्ययम् ॥५॥

ए ऐ ॥

ए–ऐ–शब्दौ तु हे–है–वत् स्मृत्यामन्त्रणहूतिषु ॥

ओ औ ॥

ओऔशब्दौ च होहौवत् सम्बुद्ध्याह्वानयोर्मतौ ॥ ६ ॥

कान्ताः ॥

कु पापे चेषदर्थे च कुत्सायाञ्च निवारणे ॥
मनागल्पे च मन्दे च धिग् निर्भर्त्सननिन्दयोः ॥ ७ ॥

गान्ताः ॥

अङ्ग सम्बोधने हर्षे पुनरर्थे च कीर्त्तितम् ॥

चान्ताः ॥

तिर्यक् तिरोऽर्थे वक्रे च विहङ्गादौ त्वनव्ययम् ॥ ८ ॥
चान्वाचये समाहारेऽप्यन्योन्यार्थे समुच्चये ॥
पक्षान्तरे तथा पादपूरणेऽप्यवधारणे ॥ ९ ॥
प्राक् प्रभातेऽप्यतीते च दिग्देशकालतः स्मृतम् ॥
प्रागग्रेऽपि च पूर्वस्मिन् भवे प्रागप्यनन्तरे ॥ १० ॥
ननुच प्रश्नदृष्टयोक्त्योः सम्यग्गाढप्रशंसयोः ॥
किञ्चारम्भे च साकल्ये हिरुग् मध्यविनार्थयोः ॥ ११ ॥

ञान्ताः ॥

नञऽभावे निषेधे च स्वरूपार्थे व्यतिक्रमे ॥
ईषदर्थे च सादृश्ये तद्विरुद्धतदन्ययोः ॥ १२ ॥

ठान्ताः ॥

सुष्ठु प्रशंसनेऽपि स्यादत्यर्थेऽपि च कथ्यते ॥
अपष्ठु निरवद्ये स्याच्छोभमानेऽपि च स्मृतम् ॥ १३ ॥

णान्तः ॥

अन्तरेण-पदं विद्याद्विनामध्यार्थयोरपि ॥

तान्ताः ॥

तु पादपूरणे भेदे समुच्चयेऽवधारणे ॥ १४ ॥
अस्तु स्यादभ्यनुज्ञानेऽप्यसूयानीहयोरपि ॥

किंस्वित् प्रश्ने वितर्के च शश्वत् पुनःसदार्थयोः ॥
पश्चात् प्रतीच्यां चरमे साक्षात् प्रत्यक्षतुल्ययोः ॥
सकृत् सहैकवारे स्यादाराद् दूरसमीपयोः ॥ १५ ॥
यावत् तावत् परिच्छेदे कात्स्न्र्ये मानेऽवधारणे ॥
पुरस्ताच्चतुर्षु प्राच्यां पुरार्थे प्रथमेऽग्रतः ॥ १६ ॥
उत प्रश्ने वितर्के स्यादुताऽप्यर्थविकल्पयोः ॥
किमुतातिशये प्रश्ने विकल्पे च प्रयुज्यते ॥ १७ ॥
हन्त हर्षे विषादे च वाक्यारम्भविवादयोः ॥
स्वस्त्याशीःक्षेमपुण्यादौ तद्वत् प्रश्नविकल्पयोः ॥ १८ ॥
बताऽमन्त्रणसन्तोषखेदानुक्रोशविस्मये ॥
अहोबताऽनुकम्पायां खेदे सम्बोधनेऽपि च ॥ १९ ॥
तत आदौ परिप्रश्ने पञ्चम्यर्थे कथान्तरे ॥
आनन्तर्ये कुतः प्रश्ने पञ्चम्यर्थे च निह्नवे ॥ २० ॥
अतो भवेत् कारणापदेशनिर्देशयोरपि ॥
पञ्चम्यर्थे ततः प्रोक्तं पञ्चम्यर्थे च शासने ॥ २१ ॥
सम्भावनावयवयोरन्ततः–पदमिष्यते ॥
इतो यतश्च नियमे पञ्चम्यर्थविभागयोः ॥ २२ ॥
इति प्रकरणे हेतौ प्रकाशादिसमाप्तिषु ॥
निदर्शनप्रकारे स्यादनुकर्षे च सम्मतम् ॥ २३ ॥
अतिशब्दः प्रशंसायां प्रकर्षे लङ्घनेऽप्यति ॥
नितान्तासम्प्रतिक्षेपवाचकोऽप्येष दर्शितः ॥ २४ ॥
प्रति प्रतिविधौ वीप्सा लक्षणेषु प्रयोगतः ॥
मात्रार्थे चाभिमुख्ये च प्रतिदानादिषु प्रति ॥ २५ ॥

थान्ताः ॥

अथो अथ च सम्प्रश्ने मङ्गलारम्भयोरपि ॥

अनन्तरे च कात्स्न्र्ये च संशये च प्रकीर्तितः ॥ २६ ॥
यथाशब्दस्तु निर्दिष्टस्तुल्ययोगानुमानयोः ॥
तथा स्यान्निश्चये पृष्टप्रतिवाक्ये समुच्चये ॥ २७ ॥
उभौ चोद्देशनिर्देशसादृश्येषु प्रकाशितौ ॥
कारकस्योऽपपत्तौ च सर्वथा हेतुबाढयोः ॥ २८ ॥
अन्यथा वितथार्थे स्यादन्यथा चाऽपरार्थके ॥
वृथा निष्कारणे वन्ध्ये वृथा स्याद्विधिवर्ज्जिते ॥ २९ ॥

दान्ताः ॥

उत् प्रकाशे विभागे च प्राबल्यास्वास्थ्यशक्तिषु ॥
प्राधान्ये बन्धने भावे मोक्षे लाभोर्द्धकर्मणोः ॥ ३० ॥

नान्ताः ॥

नु स्यात् प्रश्ने विकल्पार्थेऽप्यतीतानुनयार्थयोः ॥
ननु प्रश्नेऽप्यनुनयेऽनुज्ञानेऽप्यवधारणे ॥ ३१ ॥
आमन्त्रणे चाऽपि ननु किन्तु प्रश्नवितर्कयोः ॥
नाना विनार्थेऽपि भवेन्नानाऽनेकोभयार्थयोः ॥ ३२ ॥
स्थाने तु कारणार्थे च युक्तसादृश्ययोरपि ॥
अनु हीने सहार्थे च पश्चात् सादृश्ययोरनु ॥ ३३ ॥
आयामे च नियामे च लक्षणादावनुक्रमे ॥
नि निवेशभृशार्थाधोभावविन्यासराशिषु ॥ ३४ ॥
आश्रये बन्धने मोक्षे दारकर्मणि दर्शने ॥
अन्तर्भावे च सामीप्यकौशलोपरमेषु च ॥
नित्यार्थे संयमे चाऽपि क्षेपार्थेऽपि च विश्रुतम् ॥ ३५ ॥

पान्ताः ॥

अप स्यादपकृष्टार्थे वर्ज्जनार्थवियोगयोः ॥

विपर्ययेऽपि विकृतौ चौर्ये निर्देशहर्षयोः ॥ ३६ ॥
उप सामर्थ्यदाक्षिण्यदोषाख्यानात्ययेषु च ॥
आचार्यकरणे दाने व्याप्तावारम्भपूजयोः ॥ ३७ ॥
तद्योगेऽपि च लिप्सायां भरणार्थोपमार्थयोः ॥
उप हीनेऽधिके प्रोक्तोऽप्यासन्नेऽप्युप कीर्त्तितः ॥ ३८ ॥
अपि सम्भावनाप्रश्नशङ्कागर्हासमुच्चये ॥
तथा युक्तपदार्थेषु कामचाराक्रियासु च ॥ ३९ ॥

वाऽन्ताः ।

वशब्द उपमायां स्याद्वरुणे वानुनयेऽपि च ॥
वा स्याद्विकल्पोपमयोरेवार्थेऽपि समुच्चये ॥ ४० ॥
वि श्रेष्ठातीतनानार्थे विः स्यात् पक्षिष्वनव्ययम् ॥
वै स्यात् सम्बोधने पादपूरणेऽनुनयेऽपि च ॥ ४१ ॥

भान्ताः ॥

अभीऽत्थम्भूतकथनेऽप्यभि वीप्साभिमुख्ययोः ॥

मान्ताः ॥

स्म पादपूरणेऽतीते सामि निन्दार्द्धयोर्मतम् ॥ ४२ ॥
अमा सहार्थान्तिकयोर्नूनं निश्चिततर्कयोः ॥
कामम् प्रकामेऽनुमतावसूयानुगमेऽपि च ॥ ४३ ॥
नाम प्राकाश्यसम्भाव्यकुत्साभ्युपगमेषु च ॥
साम्प्रतं चाधुनार्थे स्याद् युक्तार्थेऽपि च साम्प्रतम् ॥ ४४॥
हुं वितर्के परिप्रश्ने हुं रुषोक्त्यनुनीतिषु ॥
तुम् प्रश्नेऽङ्गीकृतौ रोषे आस्मृतौ चावधारणे ॥ ४५ ॥
कुं प्रश्नेऽपि रुषोक्तौ च प्राध्वं नम्रानुकूलयोः ॥
किं प्रश्नेऽपि च कुत्सायां कं शिरःसुखवारिषु ॥ ४६ ॥

नुमित्यनुमतौ प्रोक्तं प्रणवे चाऽप्युपक्रमे ॥
एवं प्रकारोपमयोरङ्गीकारेऽवधारणे ॥ ४७ ॥
अलं भूषणपर्याप्तिवारणेषु निरर्थके ॥
अलं शक्तौ च निर्दिष्टं शं कल्याणे सुखेऽपि च ॥ ४८ ॥
सं सङ्गार्थे प्रकृत्यर्थे शोभनार्थसमर्थयोः ॥
जोषं सुखे प्रशंसायां तूष्णींलङ्घनयोरपि ॥ ४९ ॥
तूष्णीकं तु स्मृतं मौने मौनशीले त्वनव्ययम् ॥
तद्दिनं दिनमध्ये स्यात् तद्दिनं प्रतिवासरे ॥ ५० ॥
अभीक्ष्णं मुहुरश्रान्ते शीघ्रप्रकर्षयोरपि ॥
अभीक्ष्णं तु तथापौनःपुन्ये स्यात् सन्ततेऽपि च ॥ ५१ ॥
इदानीं वाक्यभूषायां सम्प्रत्यर्थे च वर्त्तते ॥
कथं प्रश्ने सम्भ्रमे च प्रकारार्थे च सम्भवे ॥ ५२ ॥
किमु सम्भावनायां स्याद्विमर्षे च किमु स्मृतम् ॥
भृशं प्रकर्षे चात्यर्थेऽवश्यं नित्यप्रयत्नयोः ॥ ५३ ॥

यान्ताः ॥

अयि प्रश्नानुनययोः समयान्तिकमध्ययोः ॥
अये क्रोधे विषादे च सम्भ्रमे स्मरणेऽपि च ॥ ५४ ॥

रान्ताः ॥

प्र प्रकर्षे गताद्यर्थे दुः स्यात् कष्टनिषेधयोः ॥
पुनरप्रथमे भेदे स्वः स्वर्गपरलोकयोः ॥ ५५ ॥
परा विमोक्षप्राधान्यप्रतिलोमेषु वर्त्तते ॥
आभिमुख्ये भृषार्थे च विक्रमे च गतौ वधे ॥ ५६ ॥
पुरा पुराणे निकटप्रबन्धातीतभाविषु ॥
परि स्यात् सर्वतोभावे वर्ज्जने लक्षणादिषु ॥ ५७ ॥

पूजालिङ्गनवीप्सासु भूषणे व्याधिशोकयोः ॥
दोषाख्यानेऽप्युपरमे व्याप्तौ निवसनेऽपि च ॥ ५८ ॥
प्रादुः प्राकाश्यवृत्तौ स्यात् सम्भाव्ये च प्रयुज्यते ॥
निर्निश्चये क्रान्ताद्यर्थे निर्निःशेषनिषेधयोः ॥ ५९ ॥
अन्तर्मध्ये तथा प्रान्ते स्वीकारार्थेऽपि दृश्यते ॥
उररी चोररी चोरी विस्तारेऽङ्गीकृतौ त्रयम् ॥ ६० ॥
अन्तराऽपि विनार्थे स्यान्मध्यार्थनिकटार्थयोः ॥

लान्ताः ।

किलशब्दस्तु वार्त्तायां सम्भाव्यानुनयार्थयोः ॥ ६१ ॥
खलु स्याद्वाक्यभूषायां जि[illegible] च सान्त्वने ॥
निषेधनेऽपि वीप्सायां खलु माने च कीर्त्तितम् ॥६२॥

वाऽन्ताः ॥

अवाऽलम्बनविज्ञानवियोगव्याप्तिशुद्धिषु ॥
ईषदर्थे परिभवेऽप्येवौपम्येऽवधारणे ॥ ६३ ॥

षान्ताः ॥

उषा रात्रौ तदन्ते स्यादत्रानव्ययमप्युष ॥
दोषा रात्रिमुखे रात्रावत्रानव्ययमप्यसौ ॥ ६४ ॥
निकषा त्वन्तिके मध्ये रक्षोमातर्यनव्ययम् ॥
सु पूजायां भृषार्थानुमतिकृच्छ्रसमृद्धिषु ॥ ६५ ॥
पुरतः प्रथमे चाऽग्रेऽप्यग्रतः प्रथमाग्रयोः ॥
पुरोऽग्रे प्रथमे च स्यादञ्जसा तत्त्वतूर्णयोः ॥ ६६ ॥
अभितः शीघ्रसाकल्यसम्मुखोभयतोऽन्तिके ॥
भूयः पुनः पुनः ख्यातं प्रभूतार्थे त्वनव्ययम् ॥ ६७ ॥
निर्निश्चये निषेधे च साकल्यातीतयोरपि ॥

तिरोऽन्तर्द्धौ तिर्यगर्थे मिथोऽन्योन्यं मिथो रहः ॥ ६८ ॥
पूर्वेद्युरिष्यते प्रातः पूर्वेद्युः पूर्ववासरे ॥
शनैः शनैश्चरे स्वैरे नीचैः स्वैराल्पयोर्मतम् ॥ ६९ ॥

हान्ताः ॥

ह स्यात् सम्बोधने पादपूरणेऽनव्ययं शिवे ॥
हा विषादे च शोके च दुःखार्थेऽपि च कथ्यते ॥ ७० ॥
हि पादपूरणे हेतौ विशेषेऽप्यवधारणे ॥
ही दुःखहेतावुद्दिष्टो ही विस्मयविषादयोः ॥ ७१ ॥
हाहा दुःखे हुहू हर्षे गन्धर्वेऽमू त्वनव्यये ॥
हे है व्यस्तौ समस्तौ च हूतिसम्बोधनार्थयोः ॥ ७२ ॥
हो हौ चैवंविधौ ज्ञेयौ सम्बुद्ध्याह्वानयोरपि ॥
सह साकल्यसादृश्ययौगपद्यसमृद्धिषु ॥ ७३ ॥
विद्यमाने च सम्बन्धे सहशब्दः प्रकीर्त्तितः ॥
अहो धिगर्थे शोके च करुणार्थविषादयोः ॥ ७४ ॥
आहो उताहो द्वावेतौ परिप्रश्नविचारयोः ॥
अह-शब्दो नियोगार्थे क्षेपार्थेऽपि निगद्यते ॥

क्षान्ताः ॥

मङ्क्षु शीघ्रे भृषार्थे च तत्त्वार्थेऽपि क्वचिन्मतम् ॥ ७५ ॥

इत्यव्ययानेकार्थवर्गः ॥

यद्यपूर्वतया किञ्चिन्नामात्र प्रतिभाति च ॥
तत्तदन्विष्यतां सद्भिर्नामपारायणादिषु ॥ १ ॥

तत्तत्कवीन्द्रैरथ पण्डितेन्द्रैः
प्रयोगसम्बोधफलद्वयाप्त्यै ॥
यैर्नामकण्ठाभरणं कृतं तैः
सर्वज्ञता स्वप्रणयीकृतैव ॥ २ ॥

स्वैरप्रचारैः परिकल्पिताभिः
शब्दार्थसम्बोधकथाप्रथाभिः ।
व्याख्याभिरप्राप्तमुदां प्रमोद-
माधातुमत्रैष परिश्रमो नः ॥ ३ ॥
एतां कृतिं कृतधियः कृतकृत्यभाव-
मापादयन्तु सदयं, सदयं तु चेतः ।
नित्यं महेश्वरकवेः परिभावयन्तः
सन्तः परोन्नतिरता हि भवन्ति लोके ॥ ४ ॥
रामानलव्योमरूपैः शककालेऽभिलक्षिते ।
कोषं विश्वप्रकाशाख्यं निरमाच्छ्रीमहेश्वरः ॥ ५ ॥

इति श्रीसकलवैद्यराजचक्रमुक्ताशेखरस्य गद्यपद्यविद्यानिधेः श्रीमहेश्वरस्य कृतौ विश्वप्रकाशे अनेकार्थाव्ययपरिच्छेदो द्वितीयः ॥

समाप्तोऽयं विश्वप्रकाशः ॥

शुभमस्तु ।